॥ श्रीः ॥

लौकिकन्यायसंग्रहः ।

उदासीनश्रीरघुनाथवर्म्मविरचितः ।

काशिकराजकीयसंस्कृतपाठशालायाम् ।

साहित्यदर्शनप्रधानाध्यापकेन महामहोपाध्याय-
श्रीगङ्गाधरशास्त्रिणा संशोधितः ।

LAUKIKANYĀYASAṂGRAHA

BY

RAGHUNATHA VARMA UDĀSĪNA

EDITED BY

MAHĀMAHOPĀDHYĀYA GANGĀDHARA ŚĀSTRI,

PROFESSOR, SANSKRIT COLLEGE, BENARES.

काश्याम् ।

ई० जे० लाजरसकम्पन्याख्येन मुद्रयित्वा प्रका[illegible]

सं० १९५८ । सन् १९०२ ईस्वी ।

॥ श्रीः ॥

भूमिका ।

यत्रेव प्रकाश्यते लौकिकन्यायसंग्रहनामा निबन्धो मुद्रयित्वा । अस्य निर्माता किलोदासीनसंप्रदायस्थो रघुनाथवर्मा नाम कश्चिदभिनवो विपश्चित् । सोऽयमष्टोत्तर[illegible]: संगृह्य भूयसो लौकिकान् शास्त्रीयांश्च न्यायान् परस्परासंबद्धानपि तान् वेदान्तनिबन्धं प्रस्तुत्य पूर्वपक्षोत्तरपक्षोपपादकतया क्रमसंगतान् संयोजयन्नेति प्रशंसनीयमस्य तत्संगतिसंपादनकौशलम् । अयं मान्यं प्रबन्धमापाद्य संतुष्टचेतोत्कर्षमभ्युपगतां तदभ्युपगमप्रमाणवचनमादर्शं तन्निरासेऽर्थिकमवकाशयुक्तो: काशीमुक्तिविचारं जैमिनीयनयोपयोगिगुरुत्वादिवत्तावचिन्तां तदपेक्षितविषयांश्च प्रकृतानुपयोगिनोऽपि विषयान् तथा निबध्नन्य यदेते ऽपेक्षा इति न प्रतिभाति प्रत्युत विस्तरभीरुपाठकमभ्युन्नेतुमनपेक्षितानीति मामकीनो विश्वासः ।

पुरा किल काशीविद्यासुधानिधिनामके काशिकराजकीयसंस्कृतपाठशालास्थपत्रिकोपक्रमे , मासिकपुस्तके मुद्रयितुमुपक्रान्तो मदीयगुरुचरणैरुदाराशयाशयैः श्रीमद्बालशास्त्रिभ्यामनुपलभ्य लौकिकन्यायविचारप्रधानं हीननिबन्धान्वाख्यातस्य स्वयमेव तादृशो निबन्धो विधातुमुपक्रान्तो न त्ववाप्तस्ताद्गुल्येन समपूर्यत । तत्तु तथाविधनिबन्धाप्रकाशनावश्यकतां तेन विना शास्त्रेषु प्रवृत्तानामपि लौकिकन्यायानां विषयस्वरूपनिर्धारणस्य दुःसंपादतां च निश्चिन्वद्भिः साम्प्रतिककाशिकराजकीयपाठशाला

प्रधानाध्यक्षैरार्थरश्रीवेनिससाहिबमहोदयैः समादिष्टो ऽहं मार्गव-
मासत्रयात्पूर्वं निबन्धं समासाद्यमस्मद्ग्रामण्यो नेपालराजगुरुश्री-
हेमराजशर्मपण्डितवरेभ्यः सुन्दरमयमेकमेव पुस्तकम् । आलोच-
यितुं तत्र बहूनां न्यायानामसंबद्धमाकलय्यापि मीमांसालङ्कारादि-
सर्वग्रन्थपाठाभ्यासपरीक्षोपयिकभागपाठनादिकार्यव्यापृततया ऽत्य-
न्ताल्पावकाशः सांप्रतमियतैव निर्वाहयन्तु सर्वेऽप्युत्साहिनः
सत्यवसरे ऽन्यानिबद्धान् न्यायान् क्रमेण संगृह्य विस्तृत्य च यथामति
तत्स्वरूपविनियोगोपयोगान् प्रकाशयेयं समयान्तरमिति मन्यमानः प्रारम्भे
सत्वरमिदं कार्यं समापयं च । समापिते मुद्रणे द्वितीयपुस्तकदर्श-
नावसरोपलब्धमधिकं पाठं तत्स्थले शुद्धिपत्रे च समयोजयम् ।
तदिदं निबन्धमालोच्यावगच्छन्तु तत्रस्थतत्तन्न्यायस्वरूपं जिज्ञासवः
संगृह्य चावशिष्टान् न्यायान् प्रबोधयन्तु मां क्षाम्यन्तु चैकमात्रगु-
प्ताश्रयबलम्बेनाभ्यस्तटीकाराधि स्खलितानि गुणैकपक्षपातिन इति ।
शुभम् ।

महामहोपाध्यायो
गङ्गाधरशास्त्री ।

॥ श्रीः ॥

लौकिकन्यायसंग्रहस्य शुद्धिपत्रम् ।

पृ.	पं.	अशुद्धम्	शुद्धम्
४	५	अशेक्य	अशेष्य
४	६	त्रिवर्ण	त्रिवर्णवर्णं
६	१३	सन्यात्	धन्यात्
१०	२०	सूपस	सूपकार
१०	२७	साऽऽनन्द	साऽऽनन्द
१३	८	त्रिनाम	दीनाम
१४	१८	गुण	गुणज
२०	७	यशो	यशे
२०	८	यथा	पथ्य
२२	६	श्रुति	श्रुत
२३	११	ज्ञाप	ख्यात
२७	१२	दीगध	दिग्ध
२८	१३	शीत	शीघ्र
३३	५	शुद्ध	शुद्ध
३३	४	प्रयर	प्रत्यय
३७	१७	चिन्तु	चिन्तु
४१	६	ताऽन्ति	ताऽन्ति
४३	१०	रुचाय	रुचीय
४७	२८	शिशा	शिष
४८	१२	कार्य	कार्य
४९	१७	नाऽऽपा	नाऽऽपा
४९	२४	तीरपा	तीरथ
५१	१८	कथा	कार्य
५४	६	विकाः	विकारः
५४	१३	पाचेन	पाचेन
५६	६	स्वपतीः	स्वपतीः
५७	५	यथाह	यथाऽऽह
५८	१२	कतुत्वं	केतुत्वं
५८	२५	लेखा	लेखो
५६	२७	व्यक्तिं	व्यक्तिं
५६	२६	सन्तर	सन्तर
५९	१६	सर्व	सर्वे
६१	१७	विकारा	विकारो
६२	११	सर्वं	सुखं
६३	२७	कुम्भवत्	कुम्भवत्
६६	८	विषयमीक्षा	विषयमयता
६७	१६	काव्य	काव्य
६३	२६	पद्र	भद्र
६४	११	विष	विषे
६६	३	माऽऽलिन्य	मालिन्य
६६	१४	प्रति	प्रीति
६६	२६	अथ	अथा
७२	१२	धनम्	धनम्
७३	२०	भिक्षुक	भिक्षुक
७४	८	काष्ठ	काष्ठा
७६	२१	मधु	मोहु
७७	२१	विकारि	विकार
७८	१४	मत्र	मत्रः
७९	२१	स्वकमा	स्वकीमा
७६	२५	गत	गत
[illegible]	१७	पुष्प	पुष्पं
८४	८	कुत	कुशि
८७	२०	सन	सेन
८८	६	सुमुखी	सुमुखी
९०	१५	मुक	मर्त
९२	१६	स्वर्तं	स्वप

पृ०	पं०	अशुद्धम्	शुद्धम्
९५	१०	क्रांति	क्रांति
९९	१२	[illegible]	[illegible]
१०७	३१	[illegible]	[illegible]
१०७	२६	[illegible]	[illegible]
१११	२३	[illegible]	[illegible]
११२	५	विश	विश्वो
११६	८	सार्थं	सार्थो
११७	१२	[illegible]	[illegible]
११९	३५	[illegible]	[illegible]
१२३	२७	दापा	[illegible]
१२४	२३	[illegible]	स्वेन
१३०	३	[illegible]	[illegible]
१३७	९	[illegible]	[illegible]
१४१	१	[illegible]	[illegible]
१४९	१३	[illegible]	[illegible]
१५२	७	[illegible]	[illegible]
१४४	७	[illegible]	[illegible]
१४२	१२	[illegible]	[illegible]
१४२	१७	[illegible]	[illegible]
१३५	१८	[illegible]	[illegible]
१४६	२०	[illegible]	[illegible]
१४८	१८	[illegible]	[illegible]
१५१	२१	[illegible]	[illegible]
१५२	२६	[illegible]	[illegible]
१५३	२९	[illegible]	[illegible]
१५४	१९	[illegible]	[illegible]
१५८	३	[illegible]	[illegible]
१५९	६	[illegible]	[illegible]
१६०	११	[illegible]	[illegible]
१६२	६	[illegible]	[illegible]
१६२	२०	[illegible]	[illegible]
१६४	२०	[illegible]	[illegible]

पृ० पं०

१३२ १३ [illegible]

॥ श्रीः ॥

लौकिकन्यायसंग्रहस्थन्यायानां सूचीपत्रम् ।

श्रीगणेशाय नमः ।

लौकिकन्यायसङ्ग्रहः ।

यत्कीर्तिप्रभया सुशुक्लभुवने मायाप्रभावैः प्रभो-
र्लीलादेशेनिता ऽनीतिरचिता यैः संवृता शोभते ।
यच्छिक्षोद्गमैः स मे गुरुवरो हार्दान्धकारापहः
श्रीमज्ज्ञानदयालुसिन्धुरमलो मोदाय भूयात्सदा ॥ १ ॥
नत्वा शंभुं हरिं गौरीं विधिं बुद्धिं च भारतीम् ।
क्रियते रघुनाथेन लौकिकन्यायसंग्रहः ॥ २ ॥
लौकिकन्यायरत्नानामाकरे यत्प्रदर्शितम् ।
तस्य संक्षेप एवेह धीप्रबोधाय वर्ण्यते ॥ ३ ॥
न्यायार्थं विवृतं चैषोदाहृतिं च यथामति ।
यद्विद्यातो ऽत्र संक्षेपाद्विस्तरादपि न क्व चित् ॥ ४ ॥
प्रसङ्गादागतानां तु न्यायानां तत्र विस्तृतेः ।
अर्थमात्रं यद्विज्ञाय क्व चिन्न्यायादुदाहृतिम् ॥ ५ ॥
प्रसङ्गादागता अपि निगदव्याख्यातविग्रहा
न ते व्याख्यायन्ते पुनरुक्तकुत्साञ्च निरताः ।
पुनर्व्याख्यायन्ते विषयकथनाद्विप्रवितताः
पुरो ऽप्याकाङ्क्षायामनुसरति यद्विन्यासि विषये ॥ ६ ॥
अधीत्यैषां न यत्नार्थं वृत्त्याद्या सूक्तसूक्तयः ।
पूर्वैर्न्यायविदुषा प्रोक्ता यद्विख्याततमास्तथा ॥ ७ ॥
उदाहृतिं यद्विज्ञायः प्रोचिरे येवान्यथाक्रमात् ।
मीमांसान्यायकर्ता कां चिन्तां विचारपराङ्मुखान् ॥ ८ ॥
आचार्यविस्तारेण नियन्त्र्यं न तावता ।
व्याकीर्णेऽभ्यासतु तथा इति न्यायकलापमाचरेत् ॥ ९ ॥

पञ्चीकृतस्य सूक्ष्मादेः पृथिवीत्यादिकं यथा ।
आम्नायात्तन्निबन्धत्वं तथा ऽत्र स्यादसंशयम् ॥ १० ॥
अस्यार्थधर्मकस्य गन्धवत्त्वादिकस्य वै ।
उपलम्भात्तथात्वं चेत्तत्रैवात्रापि चास्तिवत् ॥ ११ ॥
शास्त्रैकदेशसंबन्धं शास्त्रकार्यान्तरे स्थितम् ।
इति तद्रूपसंबन्धो विद्यते ऽत्र यतो ध्रुवम् ॥ १२ ॥
उपासनाः क्रियारूपाः श्रुत्यन्तेषु तथा ऽऽकरे ।
दृश्यन्ते हि तथा ऽप्येषां वेदान्तत्वं यथा ध्रुवम् ॥ १३ ॥
यथा चान्यनिबन्धेषु बहुशश्चान्यथोत्तरः ।
विचारो दृश्यते तद्बहुलत्वेऽत्रापि न क्षतिः ॥ १४ ॥
सत्स्वन्यर्थे ऽपि गौणे हि रूपे गौणत्ववद् ध्रुवम् ।
श्रुत्यन्तस्य निबन्धत्वं निबन्धस्यास्य गम्यताम् ॥ १५ ॥
तत्तदीयैरनुबन्धैरिदं स्यादनुबन्धवत् ।
तदीयाः के ऽनुबन्धाः स्युरिति चेद्वच्म्यवेहि तान् ॥ १६ ॥
स्याद्वेदोपनिषन्नाम छन्दसां काण्ड उत्तरः ।
वेदान्तस्तदनुग्राहि सूत्रभाष्यादिकं तथा ॥ १७ ॥
अधिकारी सविषयः सम्बन्धः सप्रयोजनः ।
अनुबन्धा इति ख्याताश्चत्वारः सन्ति शास्त्रगाः ॥ १८ ॥
अधीतवेदवेदाङ्गो ह्यापातग्रहणबोधवान् ।
बहुजन्मार्जितैः पुण्यैः सम्यगाराधितेश्वरः ॥ १९ ॥
ब्रह्म नित्यमनित्यं तु जगदेवं विवेचकः ।
ऐहिकामुष्मिकेभ्यश्च भोगेभ्यो विरतः सदा ॥ २० ॥
शमेन मनसो नित्यं विषयेभ्यो निवर्तकः ।
तेभ्यो बाह्येन्द्रियाणां च दमादाकर्षकः सदा ॥ २१ ॥
उभयेषां निवृत्तानां तथा स्थापनयत्नवान् ।
शीतोष्णसुखदुःखानां तथा मानापमानयोः ॥ २२ ॥

सहिष्णुः श्रवणादौ च सर्वदैव समाहितः ।
गुरुवेदान्तवाक्येषु केवलाद्वैतवृत्तिषु ॥ २३ ॥
इत्थंविधात्मवान्धीरः सत्यवादी दयान्वितः ।
अहं बद्धो विमुक्तः स्यां कथमेवं विचिन्तकः ॥ २४ ॥
वेदान्तेष्वधिकारी स्याद्वेदान्तार्थैर्विनिश्चितः ।
तद्विषयस्तु जीवस्यात्यन्ताभेदः परात्मना ॥ २५ ॥
तत्रैव तस्य तात्पर्यं नान्यत्रैवं विनिश्चितः ।
स एव विषयस्तस्य न्यायविद्भिर्विनिश्चितः ॥ २६ ॥
तत्परः शब्द इत्यादेर्न्यायादर्थव्यवस्थितिः ।
गङ्गायां घोष इत्यादिलौकिकेऽपि दृश्यते ॥ २७ ॥
प्रयोजनवति श्रुत्या तात्पर्यं च विनिश्चितम् ।
स्वाध्यायस्य विधेर्नूनं विरोधो ह्यन्यथा भवेत् ॥ २८ ॥
तच्च प्रयोजनं ब्रह्माद्वैतज्ञानेन सिध्यति ।
ब्रह्मविद्भवति ब्रह्मेत्यादिविद्यानुशासनात् ॥ २९ ॥
न भेदे तस्य तात्पर्यं सिद्धत्वादन्यमानतः ।
प्रयोजनविहीनत्वाद्विच्छिन्नत्वाच्च सर्वथा ॥ ३० ॥
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।
अल्पमप्यन्तरं कुर्वन्बिभेतीति श्रुतौ श्रुतम् ॥ ३१ ॥
प्रवादादौ न तात्पर्यं श्रुतेः किं त्वन्तरात्मनि ।
उपक्रमोपसंहारमुखैर्लिङ्गैर्विनिश्चयात् ॥ ३२ ॥
मतान्तरनिरासेन द्वैतदृष्टिप्रपञ्चजम् ।
भणिता ऽसौ तद्वेतस्य विस्तरादुपरम्यते ॥ ३३ ॥
प्रतिपाद्यस्य चैक्यस्य जीवात्मपरमात्मनोः ।
वेदान्तानां च संबन्धं बोध्यबोधकतां विदुः ॥ ३४ ॥
तेषामैक्यबोधेनोत्पाद्योत्पादकतां तथा ।
प्रयोज्यप्रयोजकत्वं संबन्धः प्राप्यप्रापकयोः ॥ ३५ ॥
हेतुमद्धेतुभावश्च संबन्धो मोक्षबोधयोः ।

संबन्धो ऽभिहितो ऽभिन्नैकत्वभेदैश्चतुर्विधः ॥ ३६ ॥
यद्वैतावरकत्वाच्च पूर्वाज्ञानस्य बाधनम् ।
साधिष्ठानस्य संसारिस्वानन्दस्य प्रयोजनम् ॥ ३७ ॥
कल्पितस्य निवृत्तिश्च नाधिष्ठानातिरेकिणी ।
रज्जुसर्पनिवृत्तिर्हि न रज्जोरतिरिच्यते ॥ ३८ ॥
अत्यन्तास्थिततया तस्य प्राप्तत्वे ऽपि च सर्वदा ।
कण्ठचामीकरन्यायात्तस्याप्तिरुपचर्यते ॥ ३९ ॥
ब्रह्मैव सन्नयं ब्रह्म प्राप्नोतीति श्रुतेः श्रुतम् ।
विमुच्यते विमुक्तश्च निवृत्तश्च निवर्तते ॥ ४० ॥
अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।
इष्टस्यार्थस्य संप्राप्तौ को विद्वान् यत्नमाचरेत् ॥ ४१ ॥
इति न्यायं समाश्रित्य मुमुक्षुर्दुष्कृतक्षयः ।
यास्ताः सम्पत्तिरस्ताः स्युः श्रुतिन्यायसमाश्रयात्॥४२॥
अनाद्यविद्यया तस्याः शुक्तेः सो ऽभासवद्भवेत् ।
विद्यया तन्निवृत्तौ तु प्राप्त इत्युपचर्यते ॥ ४३ ॥
स्वाधिष्ठानातिरेकेण न सत्ता कल्पितस्य वै ।
विद्यया तन्निवृत्तिस्तूपचारादिति निश्चितु ॥ ४४ ॥
स्वप्नादौ कल्पमानस्य भुजङ्गस्य निवर्तनम् ।
न दृष्टं वस्तुनो लोके द्रष्टान्तैर्नाखसर्पवत् ॥ ४५ ॥
अतश्च विविधे ऽपि स्यादैकरूप्यं प्रयोजनम् ।
चात्मरूपेण संज्ञानं ततः सिद्धं प्रयोजनम् ॥ ४६ ॥
संक्षेपेणानुबन्धा हि श्रोतुः प्रोक्ता यथामति ।
तदनुग्राहिशास्त्रादेस्तथैवं विनिश्चितु ॥ ४७ ॥
तथा तस्य निबन्धानामनुबन्धास्तथैव च ।
ज्ञेयाश्चैतन्निबन्धस्यानुबन्धा भवन्ति ते ॥ ४८ ॥

अत्र सर्वत्र निबन्धपदं प्रकरणपरम् । ननु किमिदं सुखादेः श्रुत्यन्तरादित्वं तदर्थावबोधहेतुत्वमिति येन तत एव तत्सम्बन्धेन तदवबोधात् अन्यथा विषयासिद्धेर्विचा-रानुपपत्तेः । स्वीकृत्येदमुच्यते । वस्तुतस्तु वेदान्तविषय एव न सम्भवति जीवब्रह्मणोरन्यस्य तद्विषयत्वाद्विरुद्धधर्मकयो-श्च तयोरैक्यायोगादिति । उच्यते । यद्यपि वेदान्तेभ्य एव तदर्थज्ञानं जायते तथाऽपि तेषां परपरिकल्पितार्थान्तर-परत्वसंशयात्सम्भावनादिपुरुषदोषप्रतिबन्धवशाच्च प्र-माणसम्भावना जायमानाऽपि सा नाविद्यानिवर्तनक्षमा किं तु मन्दमनोऽज्ञानन्यायेनाप्रतिष्ठितेव भवति । अतस्ता-दृशप्रतिबन्धनिरासेन प्रमाणजन्यायाः प्रमितेः स्वविषय-प्रतिष्ठत्वस्थिरीकरणाय विचारशास्त्रमारम्भणीयम् । यत्तु विरुद्धधर्माक्रान्तत्वाज्जीवब्रह्मणोरैक्यासम्भव इति तन्न । विरोधस्य भेदाधीनतया तदसिद्धावसिद्धाऽद्वैतवादिनं प्रति स्वरूपासिद्धेः । अनुमानेन श्रुतिबाधायोगाच्च । किञ्च सर्वमानोपजीव्यप्रत्यक्षविरोधेऽप्यागमस्यैव प्राबल्यमित्यु-क्तम्: तथा च तत्पादोपजीविनो वराकस्यानुमानस्य का कथा । तथा च स्मृतिः प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतमिति । तथा च न विषयविचारयोरसिद्धिरिति सिद्धम् । नूतनतार्किकोत्थापितकुतर्कनिराकरणेन मन्दाव-बोधान्प्रत्याप्युक्ततात्पर्यघटनेन च प्रकरणानां साफ-ल्यम् । अस्य तु प्रकरणान्तरैस्तुल्यायामान्तरविषयादिमत्त्वे ऽपि सर्वशास्त्रेतिहासपुराणसाहित्यव्याकरणकाव्यनाटका-ख्यायिकादिषु प्रसिद्धानन्तरगतलौकिकन्यायनिचयार्थ-विजयाभ्युदयनेन सर्वोपकारित्वात्पृथगारम्भसाफल्यम् । पर-मतिपत्त्यादयो यद्यपि प्रकरणानां सामान्या एव तथाऽपि प्रकरणान्तरादेषामान्तरविषयादयः सन्त्येव । तत्र सारं जि-

मुमुक्षुरेवात्राधिकारी । सगुणनिर्गुणरूपविषयभेदं विहाय निर्गुणमात्रमिह विषयः सर्वैकदेशसंपन्नमित्यंशेन संगृहीतः । तस्मात्प्रबन्धारम्भप्रतिबन्धकाज्ञानात्पर्यालोचनादिकं च तार्किकोद्भावितश्रौततात्पर्यपरिपन्थिकुतर्कनिराकरणं चावान्तरप्रयोजनं शेषेण संगृहीतम् । संबन्धस्तु विषयानुरूप इत्यलं प्रपञ्चेन ।

अथ अरुन्धतीन्यायव्याख्यानमारभ्यते । तत्र तात्पर्यावसरके प्राक्त्वंपदार्थशोधनम् । ततो ऽग्रे तत्त्वमस्यादिवाक्ये तत्पदार्थशोधनपुरःसरं वाक्यार्थनिरूपणं करिष्यति । स्थूलनिखननसिंहावलोकनन्यायाभ्यामुक्तार्थदार्ढ्याय तद्विरुद्धमतान्तरनिरासाय चोत्तरग्रन्थप्रवृत्तिः । अत्रापि सूक्ष्मार्थज्ञापनाय क्रमेण तत्समीपसमीपतरतारापातो ऽर्थस्तस्योच्यते तत्र स्थूलारुन्धतीन्यायो ऽवतरति । यथा शुभलग्नपत्नीं च दर्शयतीति विधिवशादरुन्धत्यास्तद्दर्शने प्राप्ते ऽतिसूक्ष्मत्वात्तस्याः झटिति दर्शयितुमशक्यतया तावच्चन्द्रं तमवेत वदन्ति । ततश्चन्द्रेतरास्तत्समीपस्थास्तारकाः । ततः सप्तर्षिसंज्ञकाः समीपतराः । ततः समीपस्थं वसिष्ठं तदनेनाप्यथ तमेव तदथा बोधयन्ति तथा सूक्ष्मादीनात्मानमिव मन्यमानाः प्राकृता गृहे नष्टे नष्टो ऽहमिति शोचन्तो रुदन्ते । तान्वारयन्ती श्रुतिः आत्मा वै जायते पुत्र इति तावत्पुत्रमात्मत्वेन वदति । ततो ऽस्य धीः पुत्रात्मत्वे मा पर्यवस्यत्विति स वा एष पुरुषो ऽन्नरसमय इति देहमात्मानं वदति ततो देहमेवात्मानं न जानीयादिति तात्पर्यवती श्रुतिस्ते ह प्राणाः प्रजापतिं पितरमेत्य ब्रूयुरित्यादिना श्रोत्रादीनां चेतनत्वं सूचयन्ती तद्विनाभूतमात्मत्वं सूचयति । तथैव पुनरन्यो ऽन्तर आत्मा प्राणमय इति प्राणात्मत्वं ब्रूते । इन्द्रिया-

स्तत्त्वे निरात्मत्वापत्तिः न च तस्य चित्तादे ऽन्नादिपुरुष पुच्छस्यान्यत्वे ऽपि तस्य चित्तलोमोभे ऽन्नमयादिपुरुषत्वे स एवायं पट इति यद्वतिशाख्यात्मत्वमिता न विरुध्यते परिधृन्न्यायेन च तत्कार्यनिर्वाहो ऽपीति वाच्यम् । उत्तर-पुच्छस्य पूर्वपङ्क्तिसत्त्वया पूर्वपादमूलत्वोत्तरेणाकरणा-पत्तेः शान्यदृष्टं अत्यन्त इति न्यायात् । एकस्य कस्य चिदात्मत्वं तु विनिगमनाविरहेणाशक्यं वक्तुं तेषां प्रत्येकं चेतनत्वे स्वातन्त्र्ये च बहूनामेकमत्यासम्भवेन विरुद्धदि-क्क्रियया मधुमक्षिकाकुलसम्मर्दन्यायेन देहोन्मथनप्रसङ्गः । न च बलेशोक्तिन्यायेनैकमत्यं यदा चित्तसंलग्ने ऽपि सदा सं-भवात् । एकस्य प्राधान्योपगमे तु तस्यैवात्मत्वं पुच्छस्य स्वामिभृत्यभावस्य देहभेदन्यायस्यातद्देह्ये स्वामिभृत्य-न्यायस्यानुपपत्तेः तथानुक्ता भूत्वा तेष्वात्मत्वधी-निरासाय प्राणस्यात्मत्वोक्तिः । प्राणे ऽपि तन्निरासाया-न्योन्तरात्मा मनोमय इति वदति । एवमन्योऽन्तरात्मा विज्ञानमयो ऽन्योन्तरात्मा ऽऽनन्दमय इत्यादावपि बो-ध्यम् । ततः पुच्छाधारब्रह्मणोऽन्नात्मनात्मत्वं दर्शयन्ती श्रुतिर्निर्विशेषानन्तस्यैवात्मत्वेन दर्शयति । तथा हि क-श्चिद्धीरः प्रत्यगात्मानमैक्षत् अस्थूलमनण्वह्रस्वमदीर्घमच-क्षुरश्रोत्रम् अप्राणो ह्यमनाः शुभ्रः अनन्तश्चात्मा विश्वरूपो ह्यकर्ता न चास्ति वेत्ता मम चित्सदा ऽहं चिन्मात्रो ऽहं सदाशिवः एष त आत्मा सर्वान्तर इत्याद्याः श्रुतयो ऽन्ना-दिवशाखाचन्द्रन्यायेनार्थवादादिप्रसिद्धस्य प्रकृतन्यायेन शु-द्धात्मत्वे मुमुक्षुधीनिर्वेधाय एकैकभूम्याभासानुवृ-त्तस्य पुच्छाधारस्यास्वस्य बाधपूर्वकमात्मत्वं प्रतिपादयति । किं च पुच्छात्मत्वश्रुतेर्गौणत्वं स्फुटमेव भेदप्रसिद्धेः ते ह आत्मा इत्यादिश्रुतौ प्रधानादिप्रबन्धः तत्र बहेतावपरा इति

स्वपूर्वाकरणत्वात् । अन्नमयाद्यानन्दमयान्तश्रुतेर्दुर्गादिदृष्टी-
कोदरणन्यायेन सर्वान्तरब्रह्मपुच्छप्रत्यगर्थस्यैवाभावावधि-
भूतात्मतत्त्वप्रतिपत्त्युपायार्थत्वेनोपन्यस्तत्वान्न तस्याः स्वा-
र्थपरत्वं प्रत्यगात्मत्वादिश्रुतीनां तूपक्रमादिलिङ्गैः स्वार्थ-
परत्वात्प्राबल्यम् । प्रयोगश्च पुत्राद्यानन्दमयान्तं जगदना-
त्मा स्वयम्प्रकाशत्वादिति । आत्मा स्वेतरचैतन्यभास्यः पदा-
र्थत्वादित्याद्यनुमानं त्वन्यदेव तद्विदितादित्यादिश्रुति-
बाधितं ज्ञानेनैकान्तिकं च । ज्ञानमपि वेद्यं स्ववेद्यत्वे
आत्माश्रयः परवेद्यत्वे ऽनवस्था । अस्तु को दोषो मूलक्ष-
याभावात् न चैव न ज्ञायते तदेवासत्त्वं पद्यते । एवं
तद्वेद्यमपीति सर्वेषां गड्डलिकाप्रवाहन्यायेनाप्रामाणिक-
त्वप्रयुक्तासत्यलक्षणान्यत्वमुपपन्नं स्यात् । ततश्च कथं न
मूलक्षयप्रसक्तो जगदान्ध्यरूपदोष इत्यलम् । तस्मादेहादी-
तरस्तत्साक्षी वेदान्तैः अरुन्धतीन्यायेन बोध्यते इति सिद्धम् ।
पञ्चकोशावरणन्यायस्तु श्रुतिमात्रसिद्धत्वान्न लौकिकः
एतत्तुल्यविषयत्वेनात्र । तथा हि ये स्थूलदेहादयः श्रुत्या
ऽन्नमयादिशब्दैरुक्तास्ते कोशकारकृमेरात्मावरकत्वा
द्वेहेतुत्वात्कोशा इत्युच्यन्ते । तत्र पञ्चीकृतभूतोत्पन्नः
स्थूलदेहो ऽन्नमयकोशः । पञ्चीकरणं त्वचिन्त्यशक्तिरीश्वर
एकैकं भूतं द्विधा विभज्य तेषु पञ्च भागानस्त्येकं चतुर्धा
विभाय तेषां स्वस्वद्वितीयभागानन्यभूतभागेषु योज-
यति । एवं च द्वे प्रत्येकं पञ्चपञ्चात्मका भवन्तीति । तेषु
पृथिव्यादिव्यवहारस्तु भूयस्त्वन्यायेन स्वांशाधिक्यात् ।
ननु पुराणोक्तं तारतम्यं पृथ्व्यादेर्जलपञ्चक इत्याद्युक्तेस्त-
स्थूलनिष्ठाकाशस्य व्योमादिपञ्चांशसाम्यं बाध्यतेति
गम्यते । तथा चाकाशस्यापि वाय्वादिसर्वांशापेक्षया
ऽत्याधिक्यात्सर्वत्र तद्व्यवहार एव स्यादिति वक्ष्यते ।

न्यूनाधिकभावो हि ब्रह्माण्डादेषु स्थूलेष्वेव नान्तरीयेषु समुपलम्भात् । यथा ऽऽहुः ब्रह्माण्डाचरणोर्य्येषा न्यूनाधिकविचारणेति । तानि चापञ्चीकृतान्येवेति वाचस्पत्यादौ प्रथितं यथा च भौमादिविद्यालयसमव्यवहारयोग्यानि सूक्ष्माण्येव वेदितानि । कस्तु क निस्तत्त्वं विभजतेति पाठः तत्र समकमिति संपाताद्यातम् । यद्वा सर्वं तत्त्वदंशाभिव्यक्तत्वव्यवहारयोग्यं यथा स्यात् तथेति समर्थनीयम् । एवं हि व्योम्नि शब्दोऽभिव्यज्यते वायौ स्पर्शोऽपि । एवमन्येऽपि बोध्यम् । न च सर्वत्र सर्वं कुतो नाभिव्यज्यन्ते ऽभिव्यञ्जकस्य पञ्चीकरणस्य साम्यात् तत्र प्राणिकर्मानुगुणाभिव्यञ्जकत्वाङ्गीकारात् । न चैवं सर्वत्रैकगुणाभिव्यक्तिरेव स्यात् । कार्ये कारणगुणानुवृत्तिस्वीकारेण व्योमादिषु क्रमेणैकद्वित्रिचतुःपञ्चगुणानां प्रागपि तत्त्वात् । त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणत्वाच्च तत्त्वाप्रमाणिकत्वम् । तेभ्यश्च स्थूलदेहादयो जायन्ते । ते च न हि त्रिगुणो त्रिगुण इति कथ्यते इति न्यायेन पाञ्चभौतिका उच्यन्ते प्रचुरभागस्य भूतस्य प्राधान्यविवक्षायां देवदत्तपुत्रन्यायेन भौमादिव्यवहारभाजो भवन्ति । अथकार्यादिरूपकार्योपलक्षणाय कार्येण कारणसंप्रत्यय इति न्यायेनैकदेशे कारणतया पञ्चभूतं तत्त्वऽथार्थो । स चैतानेकप्राणगोचरतया बलवत्त्वसमष्टिव्यष्टिश्च भवति । यथा व्यक्तिषु जातिवत्तत्त्वं व्यष्टिष्वनुस्यूतमनेकात्मकं समष्टिः प्रत्येकं शरीरं व्यष्टिः एतदुपहितं चैतन्यं विश्वनराभिमानित्वाद्विविधं राजमानत्वाच्च वैश्वानर इति विराडिति चोच्यते । व्यष्ट्युपहितं विश्वशरीराभिमानित्वाद्विश्वः तथा हि । जीवस्य त्रय उपाधयः । तत्र शुद्धिसंस्कारोपरञ्जितमज्ञानमानन्दमयोपाधिः स्थूलो लिङ्गशरीरं तत्प्राणोपरञ्जितमन्नमयं इति प्रतीतेः । जाग्रे

सूक्ष्मशरीरसंसृष्टं स्थूलशरीरं चैतेऽ ऽयं त्रिविधोऽन्नमयो ऽन्नविकारत्वात् एतदेवान्नविकारत्वादन्नमय इत्युच्यते । न च पञ्चीकरणविरोधः पञ्चीकृताया इव एवाकाशाकारेण परिणतस्याप्यद्वैतेनैव तदस्तु किं तेनेति न्यायेन पाञ्चभौतिकत्वानपायात् । तमःप्रधानाज्ञानोपहितचैतन्याच्छो-भादयो जायन्ते । तेषु च कारणगुणप्रक्रमन्यायेन सत्त्वादयो जायन्ते तत्र राजसरजोंऽशेभ्यो मिलितेभ्यः प्राणो जायते स चैको ऽपि स्थानभेदात्प्राणापानादिसंज्ञां लभते । ननु व्योमवत्पृथिव्यम्भसोर्मध्यस्थितो बाह्यवायुरेवास्तु पञ्चरात्रन्यायेन प्राणादीनां सामान्यवृत्तिरूपा क्रिया वा ऽस्तु किं निर्गुणकल्पनागौरवेण धर्मिकल्पनातो धर्मकल्पना गरीयसीति न्यायादिति चेन्न । एतस्माज्जायते प्राण इति श्रुतौ वायोरिन्द्रियाणां च प्राणात्पृथङ्निर्देशात् । तथा च न्यायः न वायुक्रिये पृथगुपदेशादिति । रजोंशेभ्यस्तु क्रमेण वागादीनि जायन्ते । तत्सहितः प्राणः प्राणमयकोशो भवति । सत्त्वांशिकांशेभ्यो मिलितेभ्यो-ऽन्तःकरणं जायते तच्च मनोबुद्ध्याख्यवृत्तिभेदाद् द्विविधम् । सत्त्वांशेभ्यश्च तेभ्यः क्रमेण श्रोत्रादीनि जायन्ते तैः सहिते मनोबुद्धी मनोमयविज्ञानमयकोशावुच्येते । एतत्कोशत्रयं मिलितं सप्तदशावयवं सूक्ष्मशरीरमिति लिङ्गमिति चोच्यते । भूतानि समष्टिव्यष्टिव्यवहारः पूर्ववज्जलभेदेन ज्ञेयः । तत्र समष्ट्युपहितं चैतन्यं हिरण्यगर्भ इत्युच्यते व्यष्ट्युपहितं तु तैजस इति । अनिर्वचनीयं ज्ञानबाध्यं भावरूपं त्रिगुणात्मकमज्ञानम् । तदेव जीवेश्वराभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतौ मायाविद्या-शब्देनोच्यते । तच्च शुद्धसत्त्वप्रधानं मायेत्युच्यते मलिनसत्त्वप्रधानं त्वविद्येति । सा च विपर्ययादिसहिता ऽनन्त-

प्रचुरत्वादानन्दमयो बन्धहेतुत्वात्कोशः सूक्ष्मस्थूलदेहका-रणत्वात्कारणशरीरमिति चोच्यते । तदुपहिता चित्प्राज्ञ इत्युच्यते । मायोपहिता त्वीश इति । एतयोरैक्यमत्र पश्यामः । कोशानामनात्मत्वे तु पूर्वा एव युक्तयो ऽनुसन्धेयाः । संघातानात्मत्वरूपीन्द्रियवृन्दानात्मत्वमभिप्रेयमिति दिक् । इति स्थूलारुन्धतीन्यायः । अस्मादित आरभ्यैतावद्ग्रन्थसन्दर्भे प्रसङ्गाद् ग्रन्थान्तरेष्वपि ये न्यायाः पठितास्ते पाठक्रमेणैव लिख्यन्ते सङ्गतिस्तु सुधीष्वेव यथास्वं वि-तुपाद्यप्रसारणन्यायेनातिदेशसङ्गतिः । प्रासङ्गिकेष्वपि न-स्यान्यस्य सङ्गतिर्भविता तस्याप्यर्थमात्रं वदिष्यामः । एवमग्रेऽपि बोध्यम् ।

यश्चार्थादर्थो न स चोदनार्थ इति न्या० । शबरस्वामिवचनमिदम् । अस्य यः श्रुतार्थान्तरीयकतया लभ्यते न स वेदार्थ इत्यर्थः लोकसाधारण्यात् न स शब्दार्थ इति गम्यते ॥ १ ॥

अनन्यलभ्यः शब्दार्थ इत्यप्येतादृशः ॥ २ ॥

यत्परः शब्द इति योऽर्थः परः तात्पर्यविषयो यस्य स यत्परः स्पष्टमन्यत् ॥ ३ ॥

कण्ठचामीकरन्या० । यथा कण्ठगतं हेमभूषणमज्ञानादप्राप्तमिव कण्ठे तं पश्येत्युपदेशात् ज्ञातं प्राप्तमित्युपचर्यते तथा प्रकृते ऽपीत्यर्थः ॥ ४ ॥

अर्के चेदिति न्या० । अर्के गृहकोणे । स्पष्टमन्यत् ॥ ५ ॥

मज्जनोन्मज्जनन्या० । यथा नद्यादौ पतितस्तरणानभिज्ञः कदा चिन्मज्जति कदा चिदुन्मज्जति तथेत्यर्थः ॥ ६ ॥

यदा तत्र पतितः सो ऽन्यदालम्बनमलभमानो व्याकुलचित्तः कुशकाशादीनालम्बते तदा कुशकाशावलं-

खननन्यायः । अनेन हि हस्तासु शुक्तिषु निरस्तासु निर्वेशा शुक्तीरवखन्यवानो ऽवखनेन कुशकाशावलम्बनन्यायेनेति निरस्यते ॥ ७ ॥

यथा पङ्कलिप्ता तुम्बिका नदीतडागादौ मज्जन्ती पङ्कक्षये ऽवकाशे आगत्य तिष्ठति तथा जीवो देहक्षये ऽलोकाकाशे गत्वा तिष्ठति अयमेव तस्य मोक्ष इति ।

प्रासादवासिन्यायो ऽप्यवतरति । एक एव देवदत्तः कालभेदेन प्रासादोपर्यधश्च वसन्नपि प्रासादवासप्राधान्येन प्रासादवासीत्युच्यते ॥ ११ ॥

कार्येण कारणसंप्रत्यय इति न्यायः ॥ १२ ॥

तद्धेतोरेव तदस्तु किं तेनेति न्या० । तस्य कपालादेर्हेतोर्दण्डादेरेव तत् घटादिकारणत्वमस्तु किं तेनान्तर्गडुना कपालादिरूपकार्येणेत्यर्थः ॥ १३ ॥

कारणगुणप्रक्रमन्या० । कारणगुणाः कार्ये स्वसजातीयगुणानारभन्ते यथा तन्तुरूपादयः पटरूपादीनिति न्यायार्थः ॥ १४ ॥

पञ्चरथावहनन्यायः यथा सबलैर्दुर्बलैः पञ्चभिरेकक्रियोत्पादनेन पञ्चरथावहनं क्रियते तथा दुर्बलैरिन्द्रियैः प्राणस्यैकक्रियोत्पादनेन देहधारणं क्रियतामित्यर्थः । न वायुक्रिये इत्यधिकरणपूर्वपक्षन्यायो ऽयम् ॥ १५ ॥

धर्मिकल्पनात इति स्पष्टः धर्मकल्पनायाः औचित्यं च लाघवमप्युक्तम् ॥ १६ ॥

सम्भवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत इति न्याये ऽपि तथा बोध्यम् ॥ १७ ॥

प्रकृतमनुसरामः । एतेन भिक्षुपादप्रसारणन्यायो ऽपि व्याख्यातप्रायः विषयोदाहरणसाम्यात् । धर्मसङ्गी

तु यथा कश्चिद्भिक्षुर्धैर्यपुष्ट्यान्नपानसम्पदादिलाभाय प-
नाढ्यगृहे प्रविष्टो गृहपतिक्षणं दुर्लभं मन्यमानः पूर्वमिह पा-
द्यप्रसारस्तु मे भवतु पश्चात्परिचयं सम्पाद्य क्रमेण सर्वं
सम्पादयिष्यामीति भिक्षार्थं भिक्षां स्वीकरोति तथा मा-
तेवाभिहितैषिणी श्रुतिरद्वैततत्त्वे मुमुक्षुमतिमवेद्य निष्ठ-
न्ती बहुतरभेदकं च मन्यमाना पूर्वोक्तक्रमेण संसारक्षु-
क्षये तद्बोधयतीति बोध्यम् ॥ २ ॥ १८ ॥

सोपानारोहणन्यायो ऽपीह बोध्यः । यथा प्रासाद-
मारुरुक्षुर्युगपदारोढुमशक्नुवन्पूर्वां कक्षां परित्यजन्नुत्तरोत्त-
रां चारोहन् क्रमेण प्रासादमारोहति तथा स्वात्मतत्त्वम-
पि ब्रह्माज्ञानावरणनिमित्तपञ्चमात्मत्वेन ज्ञातुकामः स-
हसा ज्ञातुमशक्नुवन्नुत्तरोत्तरात्मत्वबुद्ध्या पूर्वपूर्वात्मत्वधी-
त्यागेन क्रमेण प्रपञ्चोपशमं शिवमद्वैतं चतुर्थमात्मत्वेन जा-
नातीति ॥ ३ ॥ १९ ॥

तस्माद्वा एतस्मादात्मन आकाश इत्याद्यध्यारोपे
यस्माद्यस्योत्पत्तिरुक्ता तद्व्यतिरेकेण तदभावो यत्र कथ्या-
प्यते तद्विलयस्तथा बोध्यते तत्र सोपानावरोहणन्या-
यप्रवृत्तिः । यथा येन क्रमेण सोपानमारोहन्ति तद्विपरी-
तक्रमेण ततो ऽवरोहन्ति । तथा पूर्वोक्तपञ्चकोशाद्यतरण-
न्यायेन सत्त्वशुद्धिमारोढुमिच्छुरन्नमयो भोग्यभोगायतन-
प्राणचतुर्दशभुवनतदावरणब्रह्माण्डानि पञ्चीकृतपञ्चभूते-
भ्यो नातिरिच्यन्त इति सम्भावयेत् । तानि च सह सूक्ष्म-
शरीरैरपञ्चीकृतभूतेभ्यः । एवं गन्धतन्मात्रात्मिकां पृथ्वीं
रसतन्मात्रात्मकाप्मात्रतया भावयेत् । अपश्च रूपतन्मा-
त्रात्मकतेजोमात्रत्वेन । तच्च स्पर्शतन्मात्रात्मकवायुमात्र-
त्वेन । तं च शब्दतन्मात्रात्मकाकाशमात्रत्वेन तं च अहं-

खनन्यायः । अनेन हि दृढासु युक्तिषु निरस्तासु निर्बला युक्तीरवलम्बमानो ऽप्यनेन कुशकाशावलम्बनन्यायेनेति निरस्यते ॥ ७ ॥

यथा पङ्कलिप्ता तुम्बिका नदीजलादौ मज्जन्ती पङ्कक्षये ऽवकाशे आगत्य तिष्ठति तथा जीवो देहक्षये ऽलोकाकाशे गत्वा तिष्ठति अयमेव तस्य मोक्ष इति ।

प्रासादवासिन्यायो ऽप्यनुसरति । एक एव देवदत्तः कालभेदेन प्रासादोपर्यधश्च वसन्नपि प्रासादवासप्राधान्येन प्रासादवासीत्युच्यते ॥ ११ ॥

कार्येण कारणसंभव इति न्यायः ॥ १२ ॥

तद्धेतोरेव तदस्तु किं तेनेति न्या० । तस्य कपालादेर्हेतोर्दण्डादेरेव तत् घटादिकारणत्वमस्तु किं तेनान्तर्गडुना कपालादिरूपकार्येणेत्यर्थः ॥ १३ ॥

कारणगुणप्रक्रमन्या० । कारणगुणाः कार्ये स्वसजातीयगुणानारभन्ते यथा तन्तुरूपादयः पटरूपादीनिति न्यायार्थः ॥ १४ ॥

पञ्जरचालनन्यायः यथा सपक्षैर्दशभिः पक्षिभिरेकक्रियोत्पादनेन पञ्जरचालनं क्रियते तथा दशभिरिन्द्रियैः प्राणसहैकक्रियोत्पादनेन देहचालनं क्रियतामित्यर्थः । न वायुक्रिये इत्यधिकरणपूर्वपक्षन्यायो ऽयम् ॥ १५ ॥

धर्मिकल्पनात इति स्पष्टः धर्मकल्पनायाः श्रेष्ठत्वं च लाघवप्रयुक्तम् ॥ १६ ॥

सम्भवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत इति न्याये ऽपि तथा बोध्यम् ॥ १७ ॥

मङ्गलमनुसरामः । एतेन भिक्षुपादप्रसारणन्यायो ऽपि व्याख्यातप्रायः विषयोदाहरणसाम्यात् । कर्पसङ्गती

तु यथा कश्चिद्भिक्षुर्यथेष्टान्नाच्छादनया सम्पत्त्या विनाभाय ध-नाढ्यगृहे प्रविष्टो युगपल्लाभं दुर्लभं मन्वानः पूर्वमिह पा-दप्रसारस्तु मे भवतु पश्चात्परिचयं सम्पाद्य क्रमेण सर्वं साधयिष्यामीति निर्धार्यैषां भिक्षां स्वीकरोति तथा मा-तेवातिहितैषिणी श्रुतिरद्वैततत्त्वे मुमुक्षुमतिप्रवेशमभिलष-न्ती सहसाशक्यं च मन्यमाना पूर्वोक्तक्रमेण संसारदु-क्षये तद्बोधयतीति बोध्यम् ॥ २ ॥ ३८ ॥

सोपानारोहणन्यायोऽपीह बोध्यः । यथा प्रासाद-मारुरुक्षुर्युगपदारोढुमशक्नुवन्नूर्ध्वां कक्षां परित्यजन्नुत्तरोत्त-रां चारोहन् क्रमेण प्रासादमारोहति तथा स्वात्मतत्त्वम-पि ब्रह्माज्ञानाद्यवहितमिवापरमात्मत्वेन ज्ञातुकामः स-हसा ज्ञातुमशक्नुवन्नुत्तरोत्तरात्मत्वबुद्ध्या पूर्वपूर्वात्मत्वधी-बाधेन क्रमेण प्रपञ्चोपशमं शिवमद्वैतं चतुर्थमात्मत्वेन जा-नातीति ॥ ३ ॥ ३९ ॥

तस्माद्वा एतस्मादात्मन आकाश इत्यादावध्यारोपे यथाक्रममुत्पत्तिरुक्ता तद्व्यतिरेकेण तदभावो यत्र सम्भा-व्यते तर्हि तस्य लयो बोध्यते तत्र सोपानावरोहणन्या-यप्रवृत्तिः । यथा येन क्रमेण सोपानमारोहन्ति तद्विपरी-तक्रमेण ततोऽवरोहन्ति । तथा पूर्वोक्तपञ्चकोशावतरण-न्यायेन सर्वं बुद्धिमारोहयितुमशक्तो भोग्यभोगायतनत-दाश्रयचतुर्दशभुवनसहिताण्डं ब्रह्माण्डानि पञ्चीकृतपञ्चभूते-भ्यो नातिरिच्यन्त इति दृष्ट्या भावयेत् । तानि च सह सूक्ष्म-शरीरैरपञ्चीकृतभूतेभ्यः । एवं गन्धतन्मात्रात्मिकां पृथ्वीं रसतन्मात्रात्मकाप्मात्रतया भावयेत् । अपश्च रूपतन्मा-त्रात्मकतेजोमात्रत्वेन । तच्च स्पर्शतन्मात्रात्मकवायुमात्र-त्वेन । तं च शब्दतन्मात्रात्मकाकाशमात्रत्वेन तं च अहं-

मत्वात्मतया भावयेदिति एवं च यथा पूर्वोक्तक्रमेणारोहणात्सुखेन भूमिकेति तथा तेन क्रमेण भावनात्सुखेन पुमानद्वितीयं शिवमेति। प्रलयो ऽप्यनेनैव क्रमेण बोध्यः। साक्षात्प्रकृतौ विकारलय इति न्यायात्। जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते। ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते वायुश्च लीयते व्योम्नि तदव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयत इति स्मृतेश्च। माण्डूक्योक्तैर्विश्वादीनामपि विलापनक्रम उक्तः। अकारं पुरुषं विश्वमुकारे प्रविलापयेत्। उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत्। मकारं कारणं प्राज्ञं चिदात्मनि विलापयेदिति। अत्रापि तद्व्यतिरेकेण तद्भावभावनैव विलापनम्। एवानेनैव क्रमेण प्रलये उपाधिलयप्रयुक्तो लयो ऽपि बोध्यः। चिदात्मनो ऽपि कुत्र विलापनं लयश्च स्यादिति शङ्कां वारयति श्रुतिः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति ॥ ४ ॥ ४० ॥

साक्षात्प्रकृताविति न्यायो ऽत्र प्रासङ्गिकः। घटादेर्लयो हि कपालादावेव भवति न तु परमाणुषु तथैवानुभवादिति तदर्थः ॥ १ ॥ ४१ ॥

एतेनाध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यत इति न्यायो ऽपि व्याख्यातः आद्यन्यायप्रयोगाध्यारोपस्य चतुर्थेनापवादस्य च प्रतिपादनात् ॥ ५ ॥ ४२ ॥

रेखागवयन्यायो ऽप्येतादृशः। कीदृशो गवय इति प्राचीनेन पृष्टो वन्यो विलिख्य दर्शयामास। स पशुबुद्धित्वाद्रेखागवयमेव गवयं मेने। पश्चाद्वने गवयं दृष्ट्वा रेखायां तद्बुद्धिं तत्याजेति लौकिकी गाथा। तथैव पुरुष इत्यादिश्रुतेः पूर्वोक्ततात्पर्यानभिज्ञो ऽनात्मानमेवात्मतया जानीते।

गुरुणाऽऽरोपदेशेनात्मनि ज्ञाते तदात्मबुद्धिमपनयति ॥ ६ ॥ ४३ ॥

शाखाचन्द्रन्यायोऽपीदृशः । यथा चन्द्रं दिदर्शयिषुस्तात आदौ दिगन्तरगतनक्षत्रादिभ्यो दृष्टिं वारयितुं शाखायां चन्द्र इत्यधिकरणत्वेन संबन्धविशेषेणादौ शाखामुपलक्षणमुपादत्ते । ततश्च दिगन्तरव्यावृत्तचक्षुषमम्बरवीथ्यवर्तितारकादिषु चन्द्रभ्रमो मा भूदिति तत्स्वरूपं प्रकृष्टप्रकाशात्मकं बोधयति । एवं हि बोध्यधीः सुखेन चन्द्रेऽवतारिता भवति तथा पञ्चकोशावतरणवाक्येऽपि बोध्यम् । एवं ब्रह्मविदाप्नोति परमित्युपक्रम्य प्रकरणद्-शायामेकत्र प्रयोगदर्शनान्मुमुक्षुभिर्ज्ञेयो ब्रह्मपदार्थः क इति जिज्ञासोर्जगत्कारणत्वोपन्यासेन येषु जीवादिषु जगत्कारणत्वं न सम्भवति तेषां कार्योपाधितद्योपाधिद्वारा सर्वज्ञकोटौ निषिद्धत्वेन अस्तूनामसम्भावितेभ्यो व्यावृत्तबुद्धेरपि सम्भवज्जगत्कारणभावेषु प्रधानादिषु ब्रह्मत्वभ्रममपनेतुं स्वरूपलक्षणमुपन्यस्यते । न हि जडानां तेषां ज्ञानादिरूपतोपपद्यते । तत्राद्यं लक्षणं केषाञ्चिद्व्यावृत्तिनिश्चयपूर्वकबुद्धिस्थिरीकरणार्थं द्वितीयं तु सर्वभ्रमनिवृत्तिपूर्वकवस्तुस्वरूपसाक्षान्निश्चयार्थं त्वंपदार्थगतस्वरूपलक्षणयोरपीदृशमेव प्रयोजनं बोध्यम् ॥ ७ ॥ ४४ ॥

तत्रैकस्य वस्तुनो वराभेदेन बहूनि रूपाणि तत्तच्छास्त्रेषु प्रतिपाद्यमानान्युपलभ्य किंवा हि विकल्प्यते न वस्त्विति न्यायाद्वस्तुनि विकल्पासम्भवं च मत्वा विकल्पानां समुच्चयस्याप्यसम्भवेन तेष्वेकतमप्रतिपादितं सर्वसिद्धं वस्तु स्वीक्रियते तत्र तृणजलूकान्यायः प्रवर्तते । यथा तृणजलूकः तृणान्तरस्थितैः पूर्वमिदं शाखा अङ्कलिकया पूर्वमित्यमिति भिन्नभिन्नप्रास्तानन्यायादौ निषे-

जितः तद्वासनैव च केन चित्सर्वज्ञपुरुषप्रकल्पने प्रेरितः सर्वैः पूर्वप्रधानस्याङ्गतया यौगपद्यात्कल्पनेन कल्पित-फलत्वेऽपगतो ऽपि सर्वाविरोधाभिव्यक्तिचिकीर्षया पूर्वं प्रकल्पयति तत्प्रकल्पनेन च सर्वाः शाखा अपि प्रकल्पिताः स्युरिति भवति सर्वैरविरोधः तथा योगादारभ्य शाबरान्तोक्तवादिभिरविरोधायौपनिषदाभिमतो महेशो ऽङ्गीकार्यो वीतरागैर्मुमुक्षुभिः ।

ननु के तत्तदभिमता ईशाः कश्चौपनिषदाभिमतः । कथं च तत्स्वीकारे सर्वैरविरोध इति चेच्छृणु तावद्योगाभिमतमीश्वरं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः । सो ऽपि जीववदसङ्गचिद्रूपश्च परस्य जीवेभ्यस्तद्भिन्नत्वात् । प्रधानक्षेत्रज्ञपतिर्गुणेश इति श्रुतेः । ननु चिन्मात्रं नाम तत्तत्कर्मकारयितृत्वं तत्रासङ्गत्वादनुपपन्नं यः कारयति स करोत्येवेति न्यायेन कर्तृत्वस्य दुर्निवारत्वात् । दृश्यते हि योधविजयेषु नृपेषु दानादिकर्तृत्वं स्वयं योद्धृत्वं चेति । न लोहचुम्बकन्यायेनासङ्गस्यापि प्रेरकत्वोपपत्तेः । न च तन्नियामकाभावः । भीषाऽस्माद्वातः पवत इत्यादिश्रुतिसिद्धत्वात् । बन्धमोक्षादिव्यवस्था पुण्यपापवशाद्धिप-क्षणदर्शितसिद्धत्वाच्च । जीवानामपि स्वतः क्लेशादिरहितत्वे ऽपि बुद्ध्या सह विवेकाग्रहेण क्लेशादिमत्त्वाङ्गीकारात् । ईशस्तु सदा तैरसंस्पृष्ट इति विशेष इति । एतेन सेश्वरसांख्यवादो ऽपि व्याख्यातः । एतत्तुल्ययोगक्षेमत्वात् ।

तार्किकास्त्वत्र नित्यज्ञानवत्त्वसत्त्वादात्मा नित्यबुद्धीच्छाकृतिमानात्मविशेष ईश्वरः । पुंविशेषत्वमप्यस्य बुद्ध्यादिगुणकत्वादेव नान्यथा नित्यज्ञानादिमत्त्वादनित्यज्ञानादिमज्जीवेभ्यस्तद्वैलक्षण्यमपि सिध्यति । क्षित्यादि सक-

तुकं कार्यत्वादित्यनुमानं तत्र मानम् । स च साधकापेक्षः सर्वत्र कार्योपलब्धेर्विभुश्च । ज्ञानादेर्नित्यत्वं चलुक्तौ ऽप्य-ङ्गीकार्यो बाधकाभावादिति न्यायेन न्यायोपासनसर्वेषु-स्मदादीत्यास्तर्कश्च । सत्यकामः सत्यसङ्कल्पः यः सर्वज्ञः सर्वविदित्यागमो ऽपि तत्र मानमित्याहुः । पुण्यविद्या-कामकर्माद्यभावाज्जन्यं सुखमीश्वरे न सम्भवति तथा ऽपि नित्यसुखाङ्गीकारे बाधकाभावात् । आनन्दं ब्रह्मणो विद्वानित्यादिश्रुतेश्च नित्यसुखाश्रयत्वमपीश्वरस्यान्यत्सर्वं समानमिति तदेकदेशिनः ।

नित्यज्ञानादिमत्त्वे सदा सर्गप्रसङ्गानित्यत्वनिर्दोषा-मत्वे सदा प्रलयापत्तेश्च नैतन्मतं साधु यतो लिङ्गदेहसम-ष्ट्युपहितो हिरण्यगर्भ ईशः न च देहयोगे जीवत्वं शङ्क्यं तत्कर्मनियताविद्याद्यभावेन तस्यासम्भवात् । कथं तर्हि शरीरपरिग्रहः लीलयैवेति गृहाण । न च तदीश्वरत्वे मा-नाभावः स्वर्णाद्यजायमानस्य तत्र मानत्वादिति हैरण्यगर्भाः ।

स्थूलदेहं विना सूक्ष्मस्यानुपलब्धेः स्थूलसमष्ट्युप-हितो विराडेवेशः स च सर्वतोमस्तकादिमान् । सहस्र-शीर्षा पुरुषः सहस्राक्षः सहस्रपादित्यादिश्रुतेः । सर्वतः पाणिपादं तदित्यादिस्मृतेश्च । सदेहत्वे ऽपि जीवत्वाभा-वादिकं पूर्ववदिति विराडुपासकाः ।

त्रिविक्रमोपासीनास्तु प्रकृतापरिच्छेदत्वं नेशत्वप्रयोज-कम् अन्यथा कृमिविशेषस्य सहस्रपादादेरपीशत्वप्रसङ्गात् तस्मात् श्रुतिस्मृत्यादिसर्वशास्त्रप्रसिद्धचतुःशरीरया भगवत्या सर-स्वत्या सदोपासितः सत्यलोकाधिपतिर्ब्रह्मैवेशः । धातो वेत्यादिसामान्यवाक्यान्यप्यस्मिन्नेव चतुर्भिः करोमीतिवि-शेषवाक्येन पुरोडाशमष्टाकपालं निर्वपेत्प्रजापतिः प्रजा असृजतेत्यादिविशेषवाक्यानुसारतयैव नेयानि । स च

कस्य स्वतन्त्रतादाविष्कर्ता हरेरप्यस्तु स्वभावार्थप्रवर्तकेषु नियोजकः । क चित्तयोः स्तुत्यादौ प्रवृत्तिस्तु लोकसंग्रहाय, सा च विधेः स्वीयैव तयोः स्वांशत्वादित्याहुः ।

श्रीविष्णुनाभ्युद्भूतपद्मोत्पन्नो हि विधिः स चैतत्किंनिष्ठमिति विचारितवान् । सो ऽपश्यत्पुष्करपर्णे ऽतिष्ठत्सो ऽमन्यत नास्ति चैतदन्यत्किंचिदस्तीति श्रुतेः । ततो यदुत्थानिष्ठानं तन्मे मूलमिति तन्निश्चयार्थं चिरं भ्रमन्नपि नापश्यत् । पश्चात्समाधिना चित्ते ऽवभातमपश्यत् चिरं तत्प्रसादात्प्रजोत्पादे समर्थो बभूव तत एव च वेदान्सृष्ट्वा सर्वज्ञतामवापेति भागवतादिषु प्रथितम् । अतो विष्णुरीशः स च स्वकृतधर्ममर्यादापालनाय स्वेच्छया ऽवतरति न तु कस्य चिदाज्ञया । यथा ऽऽह यदा यदा हि धर्मस्येत्यादि । किं च महोपनिषदि । एको ह वै नारायण आसीन्न ब्रह्मा नेशान इत्यादिना ब्रह्मेशानादिसर्वस्यनच्छेदेनैकत्वेन हरेः सर्गादौ सद्भावं ततः प्रपञ्चोत्पत्तिं चाभिधायाथ पुनरेव नारायणः सो ऽन्यत्कामो मनसा ऽध्यायत । तस्य ध्यानान्तःस्थस्य ललाटात्स्वेदो ऽपतत्ता इमा आपः । तासु तेजो हिरण्मयमण्डमभवत्तत्र ब्रह्मा चतुर्मुखो ऽजायतेत्यादिना अथ पुनरेव नारायणः सो ऽन्यत्कामो मनसा ऽध्यायत तस्य ध्यानान्तःस्थस्य ललाटात्त्र्यक्षः शूलपाणिः पुरुषो ऽजायतेत्यादिना च ब्रह्मरुद्रयोस्तत्सकाशादुत्पत्तिवर्णनं दृश्यते । दृश्यते चैतदुपबृंहणं भारतादिषु तस्माद्विष्णुरेवेश इति वैष्णवाः ।

के चित्तु नृसिंहतापनीये मायाशबलं ब्रह्म नारायण इति मन्यन्ते । स एव वासुदेव इति महाविष्णुरिति चोच्यते । तेषां ब्रह्मा दक्षादयः कालस्थैर्याखिलजन्तवः ।

विश्वाद्यो हरेरेता जगतः स्थितिहेतवः । विष्णुर्मन्वादयः
कालस्तथैवाखिलजन्तवः । स्थितेर्निमित्तभूतस्य विष्णो-
रेता विभूतयः । रुद्रः कालोऽन्तकाद्याश्च समस्ताश्चैव जन्त-
वः । चतुर्धा प्रलयायैते जनार्दनविभूतय इत्यादिवचना-
न्यनुकूलानि ।

शैवास्तु ततो ह्यस्य बन्धविपर्ययौ फलमत उपपत्ते-
रित्यादिन्यायेन पशुस्थानीयानां जीवानां बन्धमोक्षसुख-
दुःखादिलक्षणं फलं यदधीनं स ईश्वरः तच्च शैवलैङ्गादिषु
शिवाधीनं प्रतिपादितं तस्येश्वरत्वं ज्ञापयति । तथा हि
ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः । पशवः परि-
कीर्त्यन्ते संसारवशवर्तिनः । तेषां पतित्वाद्देवेशः शिवः
पशुपतिः स्मृतः । मलमायादिभिः पाशैः स बध्नाति पशून्प-
तिः । स एव मोचकस्तेषां भक्त्या सम्यगुपासितः । ब्रह्मा-
दिस्तम्बपर्यन्तान्पशून्बद्ध्वा महेश्वरः । पाशैरेतैः पतिर्देवः
कार्यं कारयति स्वकमिति । किं च जगत्कारणत्वयोग्ययोर्ब्र-
ह्मविष्ण्वोरपि यदीयानन्य कारणत्वं तदा जगत्कारणत्वे
किं वक्तव्यं यथाऽऽह श्रीकृष्णो हरिवंशे । अहं ब्रह्मा कपिलो
ऽप्यनन्तः पुत्राः सर्वे ब्रह्मणश्चातिवीर्याः । त्वत्तः सर्वे
देवदेव प्रसूता एवं सर्वेशः कारणात्मा त्वमीश इति सक-
लेषु भारते पुराणेषु च शिवस्यैवोपास्योपासकभावप्रति-
पादकानि बहूनि वचनान्युपलभ्यन्ते तत्र कानि चिद्ग्रन्था-
न्तरे दर्शितानि विस्तरभिया नेह लिख्यन्ते । कौर्मे च मार्क-
ण्डेयादीन्प्रति श्रीकृष्णः सर्वादौ महार्णवे काकता-
लीयन्यायेन स्वेन विधेः समागमं विवादं चापन्नस्तादृ-
श्येन प्रागुक्तस्य शिवमाहात्म्यस्य व्यापनायोक्तवान् ।
एवं विवादे वितते मायया परमेष्ठिनः । प्रबोधार्थं परं लिङ्गं
प्रादुर्भूतं शिवात्मकम् । कालानलसमप्रख्यं ज्वालामाला-

रुद्रस्य स्वललाटादाविष्कर्ता हरेरप्यस्तु स्वभावधर्मवत्ता-देषु नियोजकः । क चित्पोः स्तुत्यादौ प्रवृत्तिस्तु लोक-संग्रहाय सा च विधेः स्वीयैव तयोः स्वांशत्वादित्याहुः ।

श्रीविष्णुनाभ्युद्भूतपद्मोत्पन्नो हि विधिः स चैतत्क्व तिष्ठतीति विचारितवान् । सो ऽपश्यत्पुष्करपत्रे ऽति-च्छसो ऽन्यत्र क्वचित् चैतन्यक्षितिदमस्तीति श्रुतेः । ततो यदस्याधिष्ठानं तन्मे मूलमिति तज्जिज्ञासार्थं चिरं भ्रम-न्नपि नापश्यत् । पश्चात्समाधिना चित्ते ऽवभातमपश्यत् चिरं तत्प्रसादात्प्रजोत्पादे समर्थो बभूव तत एव च वेदान्पृष्ट्वा सर्वज्ञतामापेति भागवतादिषु प्रथितम् । अतो विष्णुरीश्वरः स च स्वकृतधर्ममर्यादापालनाय स्वे-च्छया ऽवतरति न तु कस्य चिदाज्ञया । यथा ऽऽह यदा यदा हि धर्मस्येत्यादि । किं च महोपनिषदि । एको ह वै नारायण आसीन्न ब्रह्मा नेशान इत्यादिना ब्रह्मेशानादि-सर्वव्यवच्छेदेनैकत्वं न हरेः सर्गादौ सद्भावं ततः प्रपञ्चो-त्पत्तिं चाभिधायाथ पुनरेव नारायणः सो ऽन्यत्कामो मनसा ऽध्यायत । तस्य ध्यानान्तःस्थस्य ललाटात्स्वेदो-पतन्ता इमा आपः । तासु तेजो हिरण्मयमण्डमभव-त्तत्र ब्रह्मा चतुर्मुखो ऽजायतेत्यादिना अथ पुनरेव नारा-यणः सो ऽन्यत्कामो मनसा ऽध्यायत तस्य ध्यानान्तःस्थस्य ललाटात्त्र्यक्षः शूलपाणिः पुरुषो ऽजायतेत्यादिना च ब्रह्म-रुद्रयोस्तस्मादुत्पत्त्युपवर्णनं दृश्यते । दृश्यते चैतदुपबृंहणं भार-तादिषु तस्माद्विष्णुरेवेश इति वैष्णवाः ।

केचित्तु नृसिंहतापनीयं मायाशबलं ब्रह्म नारायण इति मन्यन्ते । स एव वासुदेव इति महाविष्णुरिति चोच्यते । तेषां ब्रह्मरुद्रादयः कार्यास्तथैवाखिलजन्तवः ।

विभूतयो हरेरेता जगतः सृष्टिहेतवः । विष्णुर्मन्वादयः कालस्तथैवाखिलजन्तवः । स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः । रुद्रः कालोऽन्तकाद्याश्च समस्ताश्चैव जन्तवः । चतुर्धा प्रलयायैते जनार्दनविभूतय इत्यादिवचनान्यनुकूलानि ।

शैवास्तु ततो ह्यस्य बन्धविपर्ययौ फलमत उपपत्तेरित्यादिन्यायेन पशुस्थानीयानां जीवानां बन्धमोक्षसुखदुःखादिलक्षणं फलं यदधीनं स ईश्वरः तच्च शैवलैङ्गादिषु शिवाधीनं प्रतिपादितं तस्येश्वरत्वं ज्ञापयति । तथा हि ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः । पशवः परिकीर्त्यन्ते संसारवशवर्तिनः । तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः । मलमायादिभिः पाशैः स बध्नाति पशून्पतिः । स एव मोचकस्तेषां भक्त्या सम्यगुपासितः । ब्रह्मादिस्तम्बपर्यन्तान्पशून्बद्ध्वा महेश्वरः । पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकमिति । किं च जगत्कारणतयोक्तयोर्ब्रह्मविष्ण्वोरपि यदीयानस्य कारणत्वं तदा जगत्कारणत्वे किं वक्तव्यं यथाऽऽह श्रीकृष्णो हरिवंशे । अहं ब्रह्मा कपिलोऽप्यनन्तः पुत्राः सर्वे ब्रह्मणश्चातिवीराः । त्वत्तः सर्वे देवदेव प्रसूता एवं सर्वेशः कारणात्मा त्वमीश इति भक्तवर्षेषु भारते पुराणेषु च शिवस्यैवोपास्योपासकभावप्रतिपादकानि बहूनि वचनान्युपलभ्यन्ते तत्र कानि चित्प्राकरे दर्शितानि विस्तरभिया नेह लिख्यन्ते । कौर्मे च मार्कण्डेयादीनृषीन्प्रति श्रीकृष्णः सर्गादौ महार्णवे काकतालीयन्यायेन स्वेन विधेः सङ्गतं विवादं चोक्त्वा सामरस्येन प्रादुर्भूतस्य शिवमाहात्म्यस्य ख्यापनार्थमकथयत् । एवं विवादे वितते ब्रह्मणः परमेष्ठिनः । अथाग्रे परं लिङ्गं प्रादुर्भूतं शिवात्मकम् । कालानलसमप्रख्यं ज्वालामाला-

समाकुलम् । सृष्टिस्थितिविनिर्मुक्तमादिमध्यान्तवर्जितम् ।
ततो मामाह भगवानधो गच्छ त्वमाशु वै । अनन्तस्य
विज्ञानीयामूर्ध्वं गच्छेयमित्यजः । तदा ऽऽशु समयं कृत्वा
गत्वा तूर्ध्वमधश्च तौ । पितामहो ऽप्यहं नान्तं ज्ञातवन्तौ
समेत्य वै । बद्धाञ्जलिपुटौ भूत्वा वन्द्यं तुष्टुवतुः पुनरि
शिवश्चैताभ्यां स्तुतः स्वज्ञानयोरल्पलिङ्गोवाच । प्रीतो
ऽहं युवयोः संप्रत्यवरं वृणि यथेप्सितम् । ततः प्रहृष्टमनसौ
तौ प्रणिपत्य महेश्वरम् । ऊचतुः प्रेक्ष्य तच्चक्रं नारायण
पितामहौ । भक्तिर्भवतु नौ नित्यं त्वयि देव महेश्वर ।
ततः स भगवानीशः संहृष्टः परमेश्वरः । उवाच मां मह
देवः प्रीतः प्रीतेन चेतसा । प्रलयस्थितिसर्गाणां कर्ता
भरणीयते इत्यादि । अत्र प्राग्ब्रह्मविष्ण्वोरीश्वरत्वाभिमा
नादिवादे प्रवृत्ते तत्कारणाय लिङ्गाविर्भावः । तन्निराकरणाद्
स्वैश्वर्यत्वनिदाने निवृत्ते शिवाविर्भावस्तत्प्रसाद
योः सर्वसामर्थ्यम् । अत एतयोरैश्वर्यं शिवाधीनम् ।
यच्च स्वाधीनं प्रसादेनैव च तत्तन्माहात्म्यस्थापनाय
नित्कल्पे तत्त्वसंदेशाविनोद इत्याद्युपपादितम् । एवं शैव
तेऽन्यादिष्वपि प्रभृत्यर्थ । ततश्च स्वतन्त्रैश्वर्यः शिव एवाराध्यो
बोधादिकामैः । न हि भिक्षुको भिक्षुकं याचितुमर्हति सत्य-
न्यस्मिन्भिक्षुक इति न्यायात् । देवो विश्वाधिको रुद्रः
शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्येति श्रुतेश्च ।
तदैश्वर्यस्याराध्यत्वं च तत्र मन्त्रो दर्शयति । अन्तरिच्छन्ति
तं जने रुद्रं परो मनीषया गृह्णन्ति जिह्वया ससमिति ।
जनेष्वन्तर्यामित्वया तिष्ठन्तं यतः परं श्रेष्ठं ये मनीषया
सादरं ध्यायन्ति । ते तं सर्वाधिकारस्थं जिह्वया गृह्ण-
न्तीति मन्त्रेऽर्थः । ये तु पुनरन्यदेवताविषयस्तुतिं स्तुवन्ति
तु तदीयेषु जिह्वया गृह्णन्तीति मन्त्रः वस्तु बने पाना

त्रिपादेऽस्यामृतस्यांशत्वे ऽर्थे कदाचः । तथा श्रु-
तिर्न पराचरेत् । अन्तरिन्नति ये ह्यं सदा धन्यां मनी-
षया । स्पृशन्ति जिह्वया तोयं रसपूर्णं घृतोदकम् । अन्त-
र्जैवन्ति ये हृद्यं भवानीसहितं भवम् । पुरीषमेव पठन्ति
जिह्वया ते न संशय इति । अखण्डेन मनसाऽन्यो ऽर्थो
दर्शितः द्वितीयेन गम्यः । स चैष स्वयंशाखित्वयोर्षा
माहिमान्तवित्वे पर्यवस्यति । अथवायं दर्शितो ऽन्यथा ।
त्रितयं त्रिकोणं त्रिकोणं अन्त त्रिलोचनम् । येनां न वदन्ति
हृदये कुमतिप्रचिकीर्षको ऽस्य इति । तस्मात्सर्वथा शिवपदा-
र्थोऽस्माज्ज्ञानेन स्वल्पफलप्रदत्वाच्च सर्वेषः शिव इत्याहुः ।
[illegible] च निमित्तं जगतामुपादानं तु तन्मायेति केचित् ।

परमात्मोपादानं महेशो निमित्तमित्यपरे ।

[illegible]त्वे त्वीश्वरस्य द्वे शक्ती चिदात्मका आनन्दात्मका च तत्रा-
द्या गौरी तदभिन्नस्य शिवस्य निमित्तत्वं द्वितीया विष्णु-
स्तदभिन्नस्योपादानत्वम् । तयोश्च शिवस्य रूपत्वं तच्च-
कारत्वं च मायाविद्यादिशब्दवाच्या तु शक्तिरन्यैव । सा
[illegible]प्रायविधे ऽपि कारणत्वे सहकारिणीत्याहुः । एतच्चैत-
त्प्रबन्धवचनानि तु रत्नाकरे द्रष्टव्यानि । परे त्वथर्वशिरसि पूर्व-
खण्डे देवा ह वै स्वर्गलोकमगमंस्ते देवा रुद्रमपृच्छन् को
ऽसमीति पृष्टवतो देवान्प्रति सो ऽब्रवीदहमेकः प्रथममासं
वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त
इत्यादिना एवं मां यो वेद स सर्वान्देवान्वेदेत्यन्तेन प्रब-
न्धेन शिवस्य सर्वात्मत्वं प्रतिपादितम् । अनन्तरं ततो देवा
रुद्रमपश्यन् ते देवा रुद्रं ध्यायन्ति ऊर्ध्वबाहवः स्तुव-
न्तीति देवैकवाक्यत्वं दर्शितम् । ततश्च द्वितीयखण्डे यो वै
रुद्रः स भगवान्यश्च ब्रह्मा तस्मै वै नमः इत्यारभ्य यश्च
महेश्वरः यश्च महेश्वर इत्यादिप्रकारेण ब्रह्मविष्णुरुद्रेन्द्रादीनां

ब्रह्मभूतादीनां च तद्विभूतित्वं पूर्वखण्डोक्तसर्वात्मत्ववचनेन लिङ्गसमन्वयानुवादन्यायेन विविच्य दर्शितम् । तृतीय-चतुर्थयोः खण्डयोरनिर्वचनत्वेन तस्य परभावः स्पष्टीकृतः । पञ्चमे तदुपासनादेव मोक्ष इत्युक्त्वा पाशुपतयोगात्मकतदुपास्तिप्रकारो दर्शितः । तदेवमादित आरभ्यान्तं त्रिपुरतापनाथर्वशिरोजातं श्रुतित्रयादतिरिक्तः परशिवः सर्वैरा ध्यायस्त्वात्परेश इति स्पष्टीकरोति । कैवल्योपनिषदि च उमासहायं परमेश्वरं विभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तादित्यादिना मुमुक्षूपास्यत्वमुक्त्वा स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः । स एव सर्वं यद्भूतं यच्च भाव्यं सनातनम् । ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तय इति ब्रह्मादेस्तद्विभूतित्वं दर्शितम् । न च स ब्रह्मेत्यादौ तत्पदानां सन्निहिते प्राप्यत्वेनोक्ते भूतयोनौ भूतेशत्वाद्ब्रह्मादीनां तद्विभूतित्वमेव सिध्यति न तूपास्यविभूतित्वमिति वाच्यम् । भूतयोनिशब्दस्यापि यौगिकस्य सन्निहिते शिवे एव वृत्तेः तत्क्रतुन्यायात्तदुपासनात्तदात्म्येन मुक्तत्वेन तस्य शिवात्मकमुक्तित्वकल्पनाऽयोगाच्च । न च कथं ज्ञात्वा तमिति तस्य ज्ञानान्मोक्षप्रतिपादनम् । सगुणब्रह्मणि तद्भावादेव मोक्षस्योपपन्नत्वात् । निर्विशेषब्रह्मणि सगुणज्ञानान्मोक्षो नोपपद्यतइति ज्ञात्वा तमित्यत्र तत्पदस्य निर्विशेषपरत्वावश्यकतया पूर्वेष्वपि तत्परत्वं सिध्यतीति चेन्न । तत्रैव स ब्रह्मेत्यादौ तत्पदानां सविशेषे वृत्तावपि तत्त्वमसिवाक्यभूततत्पदस्य सविशेषानुपपत्त्या निर्विशेषे लक्षणाया अभ्युपगन्तव्यत्वेन ज्ञात्वा तमिति तत्पदस्य तत्र लक्षणाया न्याय्यत्वेन योग-

तत्प्राप्त्यर्थं कार्येष्वपि मङ्गलत्वमस्याप्युक्तत्वात्। तस्मादुपास्यपरमशिवविभूतित्वमेव गणपतेरित्याहुः। उभयोरुपबृंहणभूतानि आगमपाञ्चरात्रादिव्यपराशरशैवमतवादिपुराणपाशुपतसंहितावचनानि परमशिवसंहारकयोर्लौकिकरूपत्वाच्चास्य किञ्चिन्निर्देशस्य च प्रतिपादकानि वचनानि च रत्नाकरे द्रष्टव्यानि।

गाणपतास्तु तुरीयः परमशिवः श्रीगणेश एव स एव वैष्णवैर्वासुदेवाभिधो महाविष्णुरित्युच्यते। न तु शिवत्वं विष्णुत्वं वा ऽस्ति येनैकः शिवो विष्णुर्वा मूर्तित्रयमध्यगो द्वितीयस्तद्व्यतिरिक्त इत्युपगम्येत। एवं च स एव साक्षात्परं ब्रह्म ब्रह्मादीनां तु तदंशत्वेन ब्रह्मत्वं व्यपदिश्यते विष्वक्सेनादीनामिव विष्णुत्वं तथा च श्रुतिः। नमस्ते गणपते त्वमेव प्रत्यक्षं ब्रह्मासीत्यादि। अत्र विशेष्यसंबद्धस्यान्ययोगव्यवच्छेदिनैवकारेण पार्थ एव धनुर्धर इत्यत्रैवकारेण पार्थादन्यत्र धनुर्धरत्वस्येव गणपतेरन्यत्र साक्षाद्ब्रह्मत्वस्य योगो व्यवच्छिद्यते। अतः श्रेयःकामैः सर्वैरपि स एवाराध्यः। तत्पूजां विना ऽन्यपूजाया वैयर्थ्यश्रवणेन फलजनकत्वायोगात्। अवश्यापेक्षितानपेक्षितयोरपेक्षितं त्वरणीयमिति न्यायेन कृताकृतप्रसङ्गी यो विधिः स नित्य इति न्यायेन च तदाराधनस्यावश्यकत्वात्। कृते च तस्मिन्विद्यार्थी लभते विद्यां धनार्थी लभते धनम्। पुत्रार्थी लभते पुत्रान्मोक्षार्थी परमं पदमित्यादिवचनेभ्यः सर्वपूजाप्रसक्तत्वेनावधीते महाभाष्ये व्यर्था स्यात्पदमञ्जरी। अधीतेऽपि महाभाष्ये व्यर्था सा पदमञ्जरीति न्यायेनान्याराधने प्रयोजनाभावात्। सूर्याद्याराधनफलारोग्यादिवाञ्छान्तकथनानन्तरं सर्वसिद्धिं गणाधिपादिति अत-

मुक्त्यनवकाशं तत्त्वादेव प्रमाणत्वमित्याख्यात एव तेषां युक्त्या-
दिसामर्थ्यबाधकं स्यात्तु ।

परमशिवविभूतिरूपस्यापि श्रीगणपतेस्तत्त्वेन सर्व-
जनसमुपास्यत्वार्थं वास्तवतद्भेदाभिप्रायं च । सर्वत्र तत्तज्ज-
नस्य तत्तत्कर्मोपासनाङ्गत्वात् । न चैतावता तेषामननुष्ठा-
नापत्तिः प्रजाजादिषु कुलेषु ज्योतिष्टोमादीनामप्यननुष्ठा-
नापत्तेः । इतरोपासनादिनिषेधकवाक्यानामप्रामाण्यापत्तेश्च ।
सर्वं शिवमयमित्यादि तु विनायकाराधनस्य परम्परया सर्वे-
श्वरपर्यवसायित्वपरं न स्वेतरनिषेधपरम् तद्विधिविरोधात् ।
किं च हेरम्बोपपादकवाक्येषु परमशिवनामानि रूपाणि च
न सन्ति अतो न स परमशिवः किं तु पंशुभिवस्करा-
दिनामा त्रिनेत्रोऽनुक्षेत्रादिविद्धो विशेषतोऽपि वास्तवः हरेऽपि
परमहस्तेन तुल्यः श्रीकालभैरव एव वेदान्तप्रतिपाद्यो मु-
मुक्षुभिराराध्यो नृसिंहरूपः परमशिव इति भैरवमुपा-
सीनाः ।

श्रीमहाशिवरात्रिकास्तु केचित् ब्रह्मविष्ण्वोः स्वस्वसर्वे-
श्वरत्वाभिमानेन विवादे प्रवृत्ते वेदैः प्रमाणेन च पृथक्पृथ-
ग्बोधितौ विधिनैवबुद्धोऽभ्रमतां तदा श्रीशैलोऽस्थितो रुद्रः प्रा-
दुर्बभूव । स च तद्वचनं श्रुत्वा भैरवं प्रेरयामास तेन
च तच्छिरसि छिन्ने सति सोमः परमशिवः प्रादुर्बभूव
स च ब्रह्मणा बहुधा स्तुतः स्वपादयोः पतितं तमुत्थाप्य
करांश्च कृत्वा गोमायोमध्ये स्थितं स्वं श्रीशैलोऽहितमीश्वरम् ।
एषा प्रजा ऽत्र जगत्स्वजनस्य प्रथमः स्तुतः । आत्मना रच-
यिष्यते पुरुषोत्तमः पिता तव । अयं च भगवान्यज्ञो ऽस्तग-
तो भवता ब्रह्म । सान्निध्यसक्तो विरिञ्चस्य धारयेयं
शिरस्त्वया । ब्रह्महत्याऽपनोदार्थं व्रतं लोके प्रदर्शय ।
कपालं भिक्षार्जितान्नं श्रीशैलोऽहितं ब्रह्मज्ञाय च स्थानं

स्वाभाविकं दिव्यं यदा तत् परमं पदम् । ततः स भगवा-
नीशः कपर्दी नीललोहितः । आह्वयामास वदनं ब्रह्मणः का-
लभैरवमित्युक्तम् । अत्र सदाशिवांशनीललोहितांशो भै-
रव इति भाति । काशीखण्डे ऽपि कोपोऽकरीत्येव प्राक्तनं
सर्वभूतान्यनुपपाद्य अथेश्वरः पद्मयोनेः श्रुत्वा गर्ववतीं
गिरम् । सकोपतः समुत्पाद्य पुरुषं भैरवाकृतिम् । प्राह
पङ्कजजन्मा ऽसौ शास्यस्ते कालभैरव । कालवद्राजसे सा-
क्षात्कालराजस्ततो भवान् । विश्वं भर्तुं समर्थो ऽसि भर-
णाद्भैरवः स्मृतः । त्वत्तो भेष्यति कालो ऽपि ततस्त्वं काल-
भैरवः । यतः पापानि भक्तानां भक्षयिष्यसि तत्क्षणात् ।
पापभक्षण इत्येव तव नाम भविष्यतीत्यादिना नीललो-
हितात्कालभैरवोद्भवस्य विविधवरलाभस्य चाभिधाना-
त्तस्य तदंशत्वमवगम्यते । महादेवांशसंभूतं भैरवं भैरवा-
कृतिमित्यपि तत्रैवोक्तम् । इह महादेवः परमशिवस्तदंशो
नीललोहितस्ततः संभूतस्य भैरवस्य परमशिवांशांशत्वं
स्पष्टं प्रतीयते । एवं पाद्मादिष्वपि द्रष्टव्यम् । तथा चांशां-
शिनोरभेदोपगमात्परमशिवांशनीललोहितांशत्वाद्भैरवस्य
सदाशिवाभेदाभावात्तथैव स्तुतिर्निरूप्यते । साक्षात्प-
रमशिवस्तु श्रीमच्छारिरेव सद्भिः सदा ध्येयः तदुक्तम् ।
ध्यायेन्नीहारिदेवं कनकगिरिनिभं ह्याक्षसाभूषिताङ्गं श्वे-
ताश्वं खड्गहस्तं विविधपशुगणैः सेव्यमानं कृतार्थैः । शुक्ला-
कल्पं देव्यनुभूषां रुचकविधसितं नैवपूर्णाभिरामं नित्यं
भक्तेषु तुष्टं भगणपरिवृतं नित्यमो ब्रह्मगम्यमिति । अत्रा-
न्त्येन नित्यपदेन प्रागभावाप्रतियोगित्वविशिष्टध्वंसाप्रति-
योगित्वार्थकेन तस्य न कदाचिदुत्पत्तिर्वा कुत्र विलय
इति प्रतिपादनात् सर्वकारणत्वं सूचितम् । पूर्वं तु ध्या-
ने दिग्यमेव योजनीयम् । तथा योऽकारणो ब्रह्मविष्णु-

शिवात्मकः स एव परमशिवो ऽन्यत्सर्वं परित्यज्य सदा ध्येयः शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्येति श्रुतेः । अयमेव हरिहरयोः स्वविभूतित्वेन प्रदानात्कैलास इत्युच्यते । कः शंकरश्च विष्णुश्च तावितार्थां यदा गतौ । तदा कैलाख्यं भातं तावारातीति विग्रहात् । कैलास इति प्रकारैरपि ध्येयविभूतिकेति निरुक्तेः एतदीयोर्ध्वत्वेनोच्चा- र्यमाणेऽप्राक इत्यपि व्यवह्रियते । हरिहरयोस्तद्विभूतित्वे न शिवः सुतरां तदधिष्ठः । विस्तृतं चैतन्माहात्म्यं स्कन्दा- दिपुराणेषु । तस्मादयमेव शिवांश इत्याहुः ।

श्रीस्वामिकार्त्तिकेयोपासकास्तु सर्वगतत्वोऽङ्कितानां सर्वांशानामप्यंशत्व स्कन्दपदाभिधेयः सर्वबुद्धिरूपा गुहा शिवस्तस्याधारत्वेनाश्रयेति गुहपदार्थं आवजन्मगुह- पदाभिधेयश्च सर्वान्तरात्मा सनत्कुमारादिनन्तकल्याणगुणो ब्रह्मादिविभूतिमान् तेषां कर्ता नेता च परमशिवः श्रीस्क- न्द एवेत्याहुः ।

एतेषु गाणपत्यादिमतेषु पुराणादिवचनानि तु लौ- किकन्यायरत्नाकरे दर्शितानि । एवं चैकस्यैव सदाशिवस्य लीलाविग्रहेष्वेकात्म्यस्थानन्तज्ञानानन्दघनस्वरूपेष्वव्यवधान- तया प्रतीयमानेषु तन्नायथा ऽन्यदेहवद्विभिन्नपरिच्छिन्नस- च्चिदृश्यादिना प्रतीयमानेषु कथं विभूत्यर्षोपकर्षकल्पका- नां शैवमन्यानां कोलाहलो दर्शितः ।

तादृशेष्वेव वैष्णवावतारेषु कथं विभूत्कर्षापकर्षक- ल्पकानां वैष्णवंमन्यानामपि कलहस्तथैव दृश्यते ।

के चित्तु नृसिंहतापनीयाद्यनुसारेण श्रीनृसिंह एव सृष्टिक्रमपरो वासुदेवाभिधो महाविष्णुः । अन्ये नृसिं- हपाक्तर्गतविष्णोरंशावतारा इति मन्यन्ते ।

अन्ये तु यथा विष्णुश्च कल्पभेदेष्वादिश्रीरामस्तुलिता-श्रित्य स एव तथाविधः अन्ये तदंशांशा इत्याहुः ।

श्रीकृष्णोपासकास्तु प्रकटैश्वर्यत्वात्तत्तावांशतुरेता-द्विशब्दाभिधेयत्वाच्चकादिमत्वादन्ये अंशकलाः पुंसः कृष्ण-स्तु भगवान्स्वयम् । अतः परतरं नान्यदिस्थादिवचनको-टिभ्यश्च कृष्ण एव तथा अन्येंऽशांशा इत्याहुः ।

एवं वासनादिष्वपि बोध्यम् । किं बहुना एकस्मि-न्नपि कृष्णे गोकुलस्थोऽन्यो द्वारकास्थोऽन्य इति भेदमा-रोप्य पूर्णः पूर्णोऽन्योंऽश इत्येके । हरिवंशे जरासन्धभया-द्विव पलायितः कृष्णः परशुरामेण संगतस्तेन मन्त्रं शुश्रु-वान् । स च तस्मै सर्वाङ्गुपदीयत्वोवाच तत्र ते कृष्ण संग्रामे तुष्यतः वैष्णवं वपुः । इत्यन्ति रिपवः सर्वे सुराश्च सुर-भावन । तां भजस्व गदां कृष्ण चक्रं च विविधस्थलमिति । अनेनेतः पूर्वं विष्णोरंश एवासीत् अनन्तरं स्वयमागत इति गम्यते । अयमर्थश्चास्य तत्रैव नन्दवाक्याने स्पष्टीकृतः तथा च पूर्णोंऽशोऽन्यः पूर्ण इत्यसंदिग्धमित्यन्ये ।

एवमेतादृशेष्वेव देवीविग्रहेष्वपि तत्तत्तात्पर्यवच-नान्याश्रित्य के चित्तारतम्यमीम्, अन्ये रमान्यतमां सर्वा-समामाहुः ।

के चित्तु मार्कण्डेयान्तर्गतसप्तशतिकाप्रतिपाद्या म-हालक्ष्मीः सर्वात्मना प्रत्यादद्यः भारत्यादयश्च सर्वे तद्वि-भूतयः । सैव सर्वादिहेतुर्बन्धमोक्षादिहेतुश्च । तया विसृ-ज्यते विश्वं जगदेतच्चराचरम् । सैषा प्रसन्ना वरदा नृणां भवति मुक्तये । संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी । सृष्टि-स्थितिविनाशानां शक्तिभूते सनातनि । विष्णुः शरीरग्र-हणमहमीशान एव च । कारितास्ते इत्यादिप्रवचनात् ।

तत्रैव हंसकुक्कुटन्यायस्यादिना ग्रन्थावसरे चैतन्य-
त्वेन सतामाधूयां तदभिभूतित्वं दर्शितम् । एतेषां ब्रह्मादीनां
सर्वेषां तदंशत्वात्तदभिन्नत्वे ऽन्योन्यमभ्यभेदः । तदभि-
न्नाभिन्नत्वं तदभिन्नत्वमिति न्यायादिति वदन्ति । प्रामा-
णिकत्वस्यादिवचनावलम्बनेनाप्यस्य प्रपञ्चो ऽपि रत्नाकरे
द्रष्टव्यः ।

एवमग्नीन्द्रादित्येश्वरवादा अपि तन्माहात्म्योपपा-
दकश्रुतीतिहासपुराणवचनान्याश्रित्य तत्रैव प्रपञ्चिता
ज्ञेयाः । नसहृत्ता अपि सर्गादिहेतुत्वरूपेश्वरलक्षणं श्रुत्या-
दिप्रमाणं च तत्तत्र दर्शयन्तो लक्षणप्रमाणाभ्यां वस्तुसि-
द्धिरिति न्यायेनेश्वरत्वं साधयन्ति । एवं हि वादिनो यक्षा-
नुरूपस्तद्बलिरिति न्यायानुसारापि स्वस्वेष्टदेवमाहा-
त्म्यपराण्येव पठन्तो ऽन्यानि तु पश्यन्तो ऽपि दुराग्रह-
विवशत्वादपश्यन्त इव तदेकवाक्यतादिकं चाजान-
न्तो ऽपरजन्यायेनान्योन्यं विवदन्ते बहुधैव च मतान्तरं
कूपमण्डूकन्यायाभिराकुर्वन्तो बुधैरुपहसनीयतां यान्ति ।
के चित्तु स्वस्वाभीष्टदेवतान्यपराण्यसमञ्जसप्रेतपिशाचादी-
सूपनापितपुत्रन्यायेनायमेव सर्वोत्कृष्टो ऽयमेव सर्वात्मा
इति मन्यन्ते तेऽप्यत्र स्वयं मतास्त्वाभिलषितार्थलुब्धान्-
तेभ्यो ऽपि स्वनिम्नमपि कुर्वन्नभिज्ञदर्शनान्मे इति
न्यायेन स्वाभिलषितार्थमाचक्षते ।

अन्ये यदाम्नात्ववैष्णवशाक्तशैवादीनि स्वस्वकुलदैव-
तानि मत्वा स्वाभ्यासादिमात्रया ऽतिदुःखितेभ्यो ऽपि
तेभ्यो नहि दीनत्वौन्नत्ये भविष्यति वदन्ति तु इति न्याये-
नेष्टं यावन्तो भस्मप्रक्षेपन्यायेनाकण्ठासक्तं चार्थं तत्त्वं
पश्यन्ते ।

अघटनघटनापटीयस्या माययोपहितं ज्ञानाद्यभिन्ननिमित्तोपादानं परब्रह्म परमेश्वरः तस्यैव ब्रह्मादीश्वरकोटिभिरीशादिभिर्जीवकोटिभिश्च सूत्रविराडन्नादिभिर्भोग्यजातमित्यौपनिषदाः ।

तथा च श्रुतिः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगदिति । एवं च जडानामप्यधिष्ठानानतिरेकात्तदीयत्ववादिभिरपि न विरोधः । सर्वे चैते सेविता ईश्वरत्वात्फलदा भवन्ति फलवैषम्यं तु पूज्यपूजादेः सात्त्विकादिभेदात् । मोक्षस्तु प्रत्यगभिन्नब्रह्मसाक्षात्कारादेव । तदुक्तं वृद्धैः ईशसूत्रविराड्वेधा विष्णुरुद्रेन्द्रवह्नयः । विघ्नभैरवमैरालमारिकायक्षराक्षसाः । विप्रक्षत्रियविट्शूद्रगवाश्वमृगपक्षिणः । अश्वत्थवटचूताद्या यवव्रीहितृणादयः । जलपाषाणमृत्काष्ठवास्यकुद्दालकादयः । ईश्वराः सर्व एवैते पूजिताः फलदायिनः । यथा यथोपासते तं फलमीयुस्तथा तथा । फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः । मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा । स्वप्रबोधं विना नैव स्वस्वप्नो हीयते यथा । अद्वितीयब्रह्मतत्त्वे स्वप्नोऽयमखिलं जगत् । ईशजीवादिरूपेण चेतनाचेतनात्मकमिति ।

ननु प्रत्यगभिन्नमेकमेवाद्वितीयं ब्रह्मेति भवतां सिद्धान्तः । ईश्वराः सर्व एवैत इत्युक्त्या तु पुनर्भिन्नतया नैवं भजन्त्या भक्तो ऽपि नष्ट इति न्यायेन जीवेशाभेदं साधयितुं प्रवृत्तैर्भवद्भिः सर्वेषामीशत्वेन ईशाभेदो ऽपि साधितः स्यात् । न चैषां विकल्पेनेशत्वसम्भवः वस्तुनि तदयोगात् । नापि समुच्चयेन परेशितृत्वापत्तेः । नापि कल्पभेदेन व्यवस्थया सर्वेषामप्यैश्वर्यस्य कालतः परिच्छिन्नतया न कस्यापि सर्वेश्वरत्वमिति दोषापातात् । तथा च वृद्धिमिच्छ-

तो भूतं विनष्टमिति न्यायपातः । अश्वत्थादीनां तु न त-
त्कथमपि सम्भवति । प्रत्यक्षादिविरोधात् । सर्वेषामीशा-
द्यङ्गीकारे ऽपि तस्य साक्षित्वेन घटादिवज्जडत्वापत्तिः ।
ब्रह्मादीशत्वबोधिकानामुत्कर्षापकर्षबोधिकानां च वाचां
व्यवस्थाभावादप्रामाण्यापत्तिः । तथा च जीवेशयोरिव-
व्यवस्था तत्प्रयुक्ता बन्धमोक्षादिव्यवस्था च तत्प्रयुक्तं
श्रुत्यादिप्रामाण्यं च । तथा च चर्वितौ महिषी हन्तीति
न्यायापातः । तस्मात्कथं ब्रह्मादेरीशकोटित्वम् । कथं च
तेषामन्योन्यभेदः । का च तदुत्कर्षापकर्षबोधकवचसां
व्यवस्था । कथं च तत्तन्माहात्म्यवचसामेकवाक्यता ।
ब्रह्मादेर्जीवकोटित्वे च का तदीशत्वबोधकवाचां गतिः ।
कथं च जीवेशाभेदः । कथं चान्योन्यजीवैक्यं कथं च ब्रह्म-
णो नाम्नां भेदाभावः । कथं च तेषामन्योन्यमपि भेदा-
भाव इति सर्वं सम्यगुपपादनीयम् येन स्वसिद्धान्तः
अकृतन्यायसङ्गतिरेव सिध्येत् । अन्यथा ईश्वराः सर्व एव
इति यथाश्रुतोपगमे अकृतन्यायसङ्गतिसिद्धावपि मण्डूक-
तोलनन्यायेन स्वसिद्धान्तमव्यवस्थादि वज्रलेपायते । अ-
स्थावयवभूतैरिति श्रुतेः सावयवत्वोपगमे चाश्वत्थादीनां
अनन्ताद्यादिमत्त्वेनोपचयापचयवत्त्वौ विकरोति हि परिषि-
मिति न्यायात्कुतः कूटस्थत्वहानिरिति चेदुच्यते । एक
एवाखिलीये नित्यशुद्धबुद्धमुक्तस्वभावः कूटस्थः परमात्मा
कार्यकारणप्रकृतित्रिगुणमायोपहितः सर्वनियन्तृत्वादन्त-
र्यामी कर्तुमकर्तुमन्यथा कर्तुं शक्तत्वादीश इत्युच्यते ।
यथा चैक एव कृषी क्षेत्रे बीजवापं कुर्वन्वापकः सस्योत्पन्नं
तमेव क्षेत्रं जलसेकादिना पालयन्पालकः अन्ते दात्रादि-
ना तदुपसंहरँल्लावक इत्युच्यते तथैव एवेशः स्वोपाधि-
मायागुणत्रयप्रयुक्तसर्गादिकर्मभेदेन ब्रह्मविष्णुरुद्रत्वैक-

च्यते । तत्र कारणीभूतरजोगुणप्रधानत्वेन सर्वप्रपञ्चस्य कर्ता त्वात् एव ब्रह्मेत्युच्यते । हिरण्यगर्भस्तु समष्ट्यपञ्चीकृत-कर्तृत्वाभावान्न ब्रह्मा । तथापि पञ्चीकृतभूतयौगिककर्तृ-त्वात् स विरिञ्चेत्युपचर्यते । स च जीव एव कल्पान्तरीय-स्वात्माभेदोपासनया तद्भावं प्राप्त इति प्रसिद्धमितिहा-सादिषु । अतस्तदीश्वरत्वबोधिका वाचस्तदन्तर्यामिपराः । एवं विराडिन्द्रसूर्यादीश्वरत्वबोधिका अपीति बोध्यम् । तदन्तर्यामिणश्च वस्तुतस्तदभेदे ऽपि भेदव्यपदेशाच्चान्य इत्यादिसूत्रेभ्यः य आदित्ये तिष्ठन्नादित्यादन्तरो यमा-दित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यम-यति । भीषा ऽस्माद्वातः पवते इत्यादिश्रुतिभ्यश्च व्याव-हारिकभेदो ऽपि स्वीक्रियते । कारणीभूतसत्त्वगुणद्वारा सर्वं चराचरं प्रपञ्चं पालयन्स विष्णुरित्युच्यते । तादृश-तमोगुणद्वारा चोपसंहरन्स एव रुद्र इति कथ्यते । एवं चैक-स्यैव वस्तुनः परब्रह्मपरमशिवसंज्ञाविष्णुवासुदेवादिशब्द-गोचरस्य चतुर्मुखचतुर्भुजपञ्चमुखरूपाः पुमाकाराः वाणी-रमोमारूपाः स्त्र्याकारा लीलाविग्रहाः । ननु चतुर्मुखाकारो विधेश्चतुर्भुजाकारो हरेः पञ्चमुखाकारो हरस्य वाण्याकारो विधे रमाकारो हरेरुमाकारो हरस्य विग्रह इति विविच्य वक्तव्यं गुणत्रयभेदेन तदवच्छिन्नानां भेदात्तथा च कथमे-कस्यैवेत्युक्तमिति चेन्मैवम् । चतुर्भुजशरीरिणः पालकत्वप्रयो-जकं विष्णुत्वमेवेति वक्तुमशक्यं दैत्यसंहारादिरूपस्य त-मोऽवच्छिन्नरुद्रकार्यत्वात् । एवं पञ्चमुखाकारावच्छिन्न-स्येश्वरस्य त्रिपुरादिदैत्यसंहर्तृत्वे ऽपि न केवलरुद्ररूपत्वनि-र्णयः संहारस्य देवादिपालनफलकत्वेन विष्णुकार्यत्वात् । शिव एको ध्येयः शिवंकरः प्रज्ञा च तस्मात्प्रसृता पुराणी-त्यादिश्रुत्या तु मोक्षपतिः श्रुतिः मोक्षयति भक्तानां वे-

स्यादिस्तुत्या च मुक्तिज्ञानादिरूपस्य सत्त्वाधिक्यकार्य-
स्युकार्यस्य प्रतीतेश्च । तमनूर्जितो रुद्रः सेवितः सात्त्वि-
कैर्जनैः । अत एव तत्त्वसंशुद्धः पूजयेत्सततो हरमिति कौर्मे
तु रुद्रे साक्षादेव सत्त्वयोगः प्रतिपादितः । एवं . तामसत्वेन
सृष्ट्यापकर्षकल्पत्वापे सूत्रोणां निरस्तः । विरजस्तं दुःख-
मयसंसारपरिवृत्तिविश्रान्तानां जीवानां कं चिरकालं विवे-
पवित्रसवसदासत्यानन्दानुभवेन विश्रान्तिं संपादयि-
तुकामस्य तस्य संहाराय तमोऽङ्गस्य बुद्धिरित्यवस-
पीडितानां अपं चिरकथिवेः श्रमापहरणन्यायेन निद्राभ-
ङ्गस्य विषजो स्वर्गहितो प्रयुक्तः । न किं चिदपि नैर्घृण्यं
मृदैवांश प्रयोजिकेति विष्णुपुराणे व्याख्यातेन विरतिसव-
रूपश्रान्तबुद्धिमन्त्रविज्ञात् । ब्रह्मकोटौ गुणपरत्वपत्यासत्त्वात्
निराकृत्यास्वेतमःकार्यस्य तमोगुणत्वेऽपि । तमोयोगमा-
त्रेण तत्पारवश्यस्य शङ्कितुमशक्यत्वात् । अन्यथाप्यति-
प्रसङ्गात् । उत्कर्षापकर्षभावे श्रुतिस्मृतिविनिर्णीतस्यस्य प्रति-
पादयितुमशक्यत्वाच्च । सत्त्वोद्रिक्तस्ततो ब्रह्मेति विष्णुपुरा-
णादौ ब्रह्मणोऽपि सत्त्वगुणयोगेन विष्णुत्वं प्रतीयते ।
भारते.चानिरुद्धानां प्रजानां विधेः कोपाग्निनोपसंहर्तृत्व-
कारणेन रुद्ररूपत्वं चावगम्यते । वासिष्ठे तु सत्त्वं देवा
इत्यादय इति सामान्येन सर्वेषां शुद्धसत्त्वप्रधानतायोपाधि-
त्वमुक्तम् । एवं ब्रह्मणो दैत्यादिसंहर्तृत्वेऽपि पालनक-
र्त्रविष्णुकार्यप्रतीतेः सूत्रं भवति सुरूपइति ब्रह्मकत्व-
रूपसत्त्वावच्छिन्नकार्यप्रतीतेः । तद्विपासुरवधे ऽर्जुनस्यो-
त्पादकस्य रूपरजोवच्छिन्नकार्यप्रतीतेश्च न केवलरजोरूपत्व-
निर्णयः । ननु मोक्षप्रदत्वादिकमिदं महासत्त्वा उच्यते ।
तत्र चान्येन सम्भिद्यपेति मार्कण्डेयपुराणादिविरहस्यभत-
तन्मात्राल्प्यलोचनेन युज्यते । यथा च कथनेन पार्वत्या

ण्यकल्पानुकल्पा विन्ध्याद्रिकल्पेऽप्यवतीति चेन्नत्वनेवं प्रतीयते अल्पश्रुतानां बहुश्रुतैस्तु अवतार एव सेति निर्णीयते । तथा हि मार्कण्डेये तस्या महिषशुम्भादिहन्तृत्वं नन्दपुत्रीत्वादिकं च श्रूयते तत्सर्वं हरिवंशे गौर्या उक्तम् । तत्र तावच्छुम्भवधप्रसङ्गे । एतस्यां सर्वला-ऽर्था शम्बरो ऽचिन्तयत्पुनः । अस्ति मे कालरूपाख्यो शु-ह्रं ष्ठेमभूषितः । पुरा यो मम पार्वत्या दत्तः परमतुष्टया । दंष्ट्राय शम्बरेणं त्वं शुक्लं हेमभूषितम् । सामान्तकरणं नाम सर्वासुरविनाशिनम् । अनेन दानवौ रौद्रौ बलिनौ कामरूपिणौ । शुम्भश्चैव निशुम्भश्च हतौ सहितौ यमेति पार्वत्या एव सैन्यशुम्भादिहन्तृत्वमुक्तम् । ततः शक्रो-पेन्द्रादेः शुक्रस्तूयमानं तदुपक्रान्त्यै गौर्युपासनं योगदिश-ताते सति । दैत्येन सर्वक्रियनाशे सति तद्रव्यानाद्युक्ता-कैरल्पानादीन् नानोत्पातान् दृष्ट्वा अयुतः संस्मृतिम्यां हरि स्तुत्वा भूमौ शिरसा प्रणम्य तुष्टाव । ओं नमः कात्यायन्यै गुह्यस्य जनन्यै नमः । नमस्त्रैलोक्यमातायै कात्यायन्यै नमो नमः । नमस्ते शुम्भहन्त्रीं निशुम्भमहिषादिदारिणीम् । विन्ध्य-वासिनीं दुर्गमिन्तां रणदुर्गां रणप्रियाम् । त्रिशूलिनीं नमस्या-मि महिषासुरघातिनीम् । सिंहवाहां नमस्यामीत्यादिना मधुकैटभवधेनोक्तं सर्वं शुम्भासुरविषयबध्यपादितम् । नन्दपुत्रितदेवता तु योगनिद्राख्या तामसी शक्तिः सा च कृष्णावतीर्णैवेति न विवादः । तथा च कथं दुर्गा नान्येति वाच्यम् । यद्यपि तत्र शुम्भनिशुम्भयोः मूलतन्त्राख्यां हन्तृत्वं तु शुक्रेणेति विरोधः । तथा ऽपि न कालभेदे-नेत्यत्स्तु नन्वयः । वैवस्वते ऽन्तरे शुम्भादिमधवकृते हरिवंशपञ्चाशिकविष्णुपुराणे श्रीमद्भागवते च पार्वतीपुत्रे च तथा पुराणान्तरगतोऽपि माहात्म्यवचनेभ्यो ऽयमर्थः स्पष्टः । अन्य-

विस्तरभयान्नेह वचनानि लिख्यन्ते । यानि तु मार्कण्डेये लक्ष्मीविष्णुनिन्दापराणि तानि शिवस्यादेर्नृसिंहादिविष्णुमूर्त्यपेक्षया वांशोपासनार्थं स्तुतिरूपाणि । वस्तुतस्तु गौरीत्वमेवेत्यादीनि साक्षादभेदपराण्येव । अन्यथा त्ववतारं अधीत्यादेरपि तादृशवाक्यार्थे पठितस्य तथात्वप्रसङ्गेनावतारस्य परब्रह्मणो ऽपि स्तुत्यश्रीरामादिविष्णुनिन्दाप्रसङ्गः । अवतारावतारिणोश्चात्यन्ताभेदमनुपदमेव वक्ष्य इत्युपरम्यते ।

न मे नारायणाद्भेदो विद्यते हि विचारतः । तन्मयोऽहं परं ब्रह्म स विष्णुः परमेश्वर इति कौर्मे शिवस्यैव विष्णुरूपत्वं स्वयोक्तं सदाशिवाङ्गनाल्पा अतिरिक्तान्या शिवा । महालक्ष्मीरिति ख्यातेति शैवे साक्षान्महालक्ष्मीरूपशिवाभाया उक्ता लक्ष्मीतन्त्रे लक्ष्म्याः कात्यादेः स्वावतारत्वोक्तिरपि द्वयोरभेदपरैव । हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनावित्यादिप्राधानिकरहस्ये रमाया रजोवच्छिन्नब्रह्मरूपत्वं प्रतीयते । अतो ऽस्या न केवलविष्णुरूपत्वनिश्चयः । न चैतावता केवलं विधिरूपत्वमस्तु कौर्मे इयं सा परमा शक्तिर्मन्मया ब्रह्मरूपिणीति विष्णुतया विष्णुपुराणादिवचनैश्चास्या विष्णुरूपत्वस्यापि प्रतीतेः । एवं मार्कण्डे शुक्लिमार्गे इत्यादौ सरस्वत्या गौरादिरूपस्वभावच्छिन्नकार्येषु प्रतीतेः सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधाविति प्राधानिकरहस्ये श्वेतरूपत्वात्सात्त्विकसंबंधेनोक्तेश्च न केवलब्रह्मरूपत्वनिर्णयः । एतच्च शिवे ऽपि तुल्यम् । तस्मात्सर्वे देवाः सर्वेषामिति सिद्धम् । तथा चैकरूपत्वमेव त्रयाणां पर्यवसन्नं तदुक्तं हरिवंशे । यो विष्णुः स तु वै रुद्रो यो रुद्रः स पितामहः । एकमूर्तिस्त्रयो देवा रुद्रविष्णुपितामहाः । वरदा लोककर्तारो लोकनाथाः

स्ते तु ब्रह्मं तीर्थं समाख्याता
त्यष्टादशैवैरयेकं सन्तं त्रिधा कृत-
मान्निन्य शिवविष्णू एवं तस्मा-
त्वाधिष्ठः स्रष्टा भवतीति
...षु हरादिषु क चित्सत्वाधिक्य
...र्भिकामिलोन तीक्ष्णया वा ऽविभाग
...त सा ऽपि विचार्यमाण एकमेव पर्यवस्यति ।
तथा हि क चिच्छिवेस्तयोराविर्भाव उच्यते यथा चतुर्भ्यो
विष्णुरित्यादिश्रुतिविष्णुर्लिङ्गादौ चान्यत्रापि च पुरा-
णादिषु क चित् क चिद्धरात् । तथा च श्रुतिः । अथ
हिरण्यगर्भं कस्य वीर्योत्पन्नं संजज्ञे तत ब्रह्मा विष्णुः
जीत इत्यादि । हरिवंशे च हरं प्रति हरिवचनम् । अहं
ब्रह्मा कपिलो ऽथाप्यनन्तः पुत्राः सर्वे ब्रह्मणश्चातितेजसः ।
त्वत्तः सर्वे देवदेव प्रसूता एवं सर्वेशः कारणात्मा त्वमी-
ड्य इति । क चिद्धरेः यथा नारायणाद्ब्रह्मा जायते नारा-
यणाद्रुद्रो जायते नारायणात् प्रादुर्भावादित्याद्यः सर्वा दे-
वता इत्यादिश्रुतौ यथा च स्कन्दसारे यतो ब्रह्मा अहं सुर-
पतिस्तथेति भारते । एवमन्यान्यपि शैववैष्णवादिपक्षेपू-
दाहृतानीदृशानि वचांसि असंख्यानि । एतानि कल्पभे-
देन व्यवस्थितानि । एतच्छ्रुतिविस्तरेण श्रीवसिष्ठो वासिष्ठे
श्रीरामं प्रति कथयामास । तत्रैवेदमाह वसिष्ठं प्रति । एवं
सर्गे हि कस्मिंश्चित् प्रथमो ऽथ सदाशिवः । कस्मिंश्चिद्विष्णु-
रित्युक्तो नाभ्युत्पन्नपितामहः । पितामहश्च कस्मिंश्चित्
कस्मिंश्चिदपि चेतरद्वति हरः पूर्णभैरवविनाशकादिः ।
तेषामपि तत्सन्माहात्म्यबोधकपुराणादिभागेषु ब्रह्मापूर-
वरेत्युक्तसिद्धेः । भगवान्व्यासुआह । ब्रह्मनारायणौ पूर्वं
रुद्रः कल्पान्तरे ऽसृजत् । कल्पान्तरे पुनर्ब्रह्मा रुद्रविष्णू

जगन्मयः । विष्णुश्च भगवांस्ता
स्वयं पुनर्जनानां प्रकाशं च पुनः ।
ब्रह्मविष्णुमहेश्वराः । परस्परमा
तत्तत्कल्पान्तसूत्रान्तानि
स्थले तेषां परस्परसमुद्भवादीनि ।
विष्णुश्च क चिद्रुद्धा उपवर्ण्यते । नानेन
तत्त्वं वा कथं च न । तत्तत्कल्पान्तसूत्रान्तभावकृत्
विधिः । तानि तानि प्रणीतानि विद्वांसस्त्र च श्रुतीषु
सन् । मार्कण्डेये ऽपि विष्णुः शरीरग्रहणमित्यादिना दुर्गा-
या विष्णुत्वेनाभ्युदयश्रुत्वा चतुर्दशेभ्यो ऽप्या आविर्भाव उक्तः
सो ऽपि कालभेदेन व्यवस्थितः । एवं गणेशपुराणादौ यो
विनायकादेर्ब्रह्माद्याविर्भावो ऽभिहितः सो ऽपि कदा
चित्महेश्वरस्य तदात्मनैवाविर्भावस्ततो ब्रह्माद्याविर्भाव,
इति समाधातुं शक्य इति न कुत्रापि विरोधः । ईदृशैरपि
वाक्यैः सर्वेषां सर्वदेवेषु तत्तद्भावगम्यते । न हि यत्र
नास्ति तत्तत्र ऽस्तीति विधानादेस्तैरेवोपपत्तेः । तस्मादेक-
मेवानिर्णीतं ब्रह्मादवनयवनापदीयस्या मायया ऽनेकमिव
सदेहमिव परस्परजन्माजन्यमिव च प्रतीयते इति सिद्धम् ।
एतेन कतिपयवाक्यान्याश्रित्य कस्य चित्कर्षस्यवर्णनं
निरस्तम् । यच्च पुरो हरिं प्रत्याह । अहं त्वं सर्वगो देव-
स्त्वमेवाहं जनार्दन । आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्त्र-
ये । नामानि तव गोविन्द यानि लोके महान्ति च । ता-
न्येव मम नामानि नात्र कार्या विचारणेति तथान्यत्र-
त्रापेक्ष एव तात्पर्यम् । अन्यथा त्वदुक्तरीत्या शुभकैः
शुल्कवस्त्रिपिभेदे विष्णुशिवादिपदानां भिन्नभिन्नवा-
नामव्यापकत्वेनानामत्वं स्यात् ।
ननु वैदिकानां । शुद्धसत्त्वप्रधानत्रिगुणमायोपहित-

एकैकगुणावच्छिन्नमूर्तिभ्यः परस्तु सर्वज्ञत्वादिसकलगुण-
संपन्नत्वाच्च शुद्धसत्त्वमूर्तिः परशिवः परमशिव एव मु-
मुक्षुपास्यः । तदुपासनेनैव ऽन्तरङ्गत्वात् । ध्यायीतेशान-
मित्यादिश्रुतेः । ब्रह्मादिसर्वविभूतिः । स ब्रह्मा स शिव
इत्यादिश्रुतेः । यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको
हरिः । संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने इत्यादि-
स्मृत्यादिभ्यश्चेत्यादि । अत्र वैष्णवा आहुः । नारायणो-
विष्णुर्लिङ्गपरो वासुदेवमहाविष्णवाख्यः परेशः ब्रह्मा-
दिस्तम्बविभूतिः । स ब्रह्मा स शिव इत्यादिश्रुतेः तद्भक्ति-
योगेनारूढसाधनं शिवादेरुपास्यत्वप्राधान्येन आरोग्यं भा-
स्करादिच्छेद्धनमिच्छेद्धुताशनात् । ज्ञानं महेश्वरादिच्छे-
न्मोक्षमिच्छेज्जनार्दनादिति पुराणात् । मां च यो ऽव्यभि-
चारेणेत्यादि । तदुपयोगेनापास्तम् । सर्वेषां
पुरुषाणां ज्ञानविशुद्धयोगाधित्वसाधनेनात्यन्तताभेद-
शासनात् । शैवैर्वैष्णवैश्च मायिकब्रह्म प्रस्तुत तत्र
श्रीरुद्रा अन्यास्तथा ब्रह्मा रुद्रो शिवश्चेति परस्परेषु
विपक्षभयस्यैवाभ्यर्थं श्रूयते । यदि तेषां अन्यान्या का
चित्परमूर्तिः स्यात्तदा कथं तेषामन्यत्वं स्यात् यत्रैकमा
मन्या उच्यन्ते । अतः सर्वं विशेषणं सावधारणमिति
न्यायाद्ब्रह्मादेर्नैवं कृतविशिष्याप्यपास्तम् । अनेन ब्रह्मणामपि
महाकल्पादौ स्थल एवाविर्भावः । परापरभावतुल्यस्वभा-
वस्येकल्पेषु कदा चिद्धीयेत् कश्चिन्निभाग्यवतीति ।
अनुमेयार्थश्रुतेरूपयति भाष्यते । तत्र सर्वेऽस्त्वश्रुत्यै प्र-
स्तुत्य परस्य तं प्रपद्ये ऽहं स एव जगदीश्वरः । प्रसादादेत-
स्यां महां भवत्यादिति चिन्तयतीति तस्य फलेच्छां योऽस्या-
ऽस्य विराड्रूपस्यापि ब्रह्मादिरूपाभिधाने सति स्तुतिमा-
त्राभिलक्षणं तात्पर्यमेवेदं यथा हि भगवान्विविदिषा-

मैथिलीकृतः प्रजल्पाय कथं नु यूयम् । अभ्यागतास्तानुत्सृज्य
मनसो ऽपि दूरा ध्रुव प्रसीदत महात्रिह विद्यया महति प्रभो ।
यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा । सत्यसंकल्पस्य ते
प्रजान्यदैश्वर्यं ध्यायसि तदयमिति तेनाप्युत्तरोपन्यासेन मूर्ति-
त्रयातिरेकेषु परस्य सर्वैश्वर्याभिव्यक्तिस्थानं तुर्यं मूर्त्यं-
तरं नास्तीति व्यक्तीकृतम् । तत्सत्त्वे तेनैवाधिभावापत्तेः ।
अन्यथा प्रभोः सत्यसंकल्पत्वविरोधात् । तस्मादेतदतिरि-
क्तचतुर्थोपगमो युक्तः । एतेषां सर्वेषां परत्वबोधकासंख्य
वचनविरोधाच्च शिवादेरेकैकस्यापि लीलाविग्रहा बहव इ
पुराणादिषु प्रसिद्धम् । न च तेषु यद्यप्युत्कर्षापकर्षवार्ता
ऽप्यस्ति एकस्यैव शुद्धसत्त्वमयत्वानभावोपहितस्य परस्य
तत्तदाकारैर्विवर्तमानत्वात् तथा ऽप्युपासक
क विविधप्रे तत्तेषामाधिक्यायोत्कर्षप्रकल्पनार्थं
रीयो ऽन्य एतद्विभूतय इति शास्त्रेणोच्यते तथा , पर-
शिवादिबोधकवाक्यविरोधः । सर्वोपा .त्र तात्पर्येणैव
ज्ञानद्वारा मोक्षसाधनत्वं न तु साक्षात् । तमेव विदित्वे-
त्यादिशास्त्रविरोधात् । एतेनान्तरङ्गत्वादिकल्पना ऽऽपा-
स्ता । सर्वोपास्यत्वाभेदसाधनादपि सा न युक्ता । यानि च
ध्यायन्मुक्तिमभ्येति मां च यो ऽव्यभिचारेणेत्यादीनि हरा-
द्युत्कर्षादिपरत्वा मुक्तिबोधकानि तान्यपि वाक्यान्तरवि-
रोधाद्वृद्धकुमारीवाक्यन्यायेन भक्तेः परम्परया मोक्षहेतु-
त्वपराणीति बोध्यम् । न च ज्ञानं महेश्वरादित्यस्यापि
फलभेदो ऽस्ति । विदित्वा ऽति मृत्युमेतीत्यादिश्रुतेः ज्ञानं
च ब्रह्मेत्यादिस्मृतेर्देहात्मज्ञानबाधकज्ञानं देहात्मज्ञाननाशकम् ।
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यत इति भगवत्पा-
दवचनाच्च सति ज्ञाने मोक्षे विलम्बाभावात् । श्रेयांसि
तत्र खलु रुद्रत्वतोऽरित्यपि न विरुद्धं. तथा सत्त्वतनोरि-

स्वरूपान्वयसम्भवात् सर्वेषां सम्यक्त्वानुपपत्तेश्च। तस्मात्
किमपि वाक्यं भेदपरं प्रयोजनाभावात् किन्तु किं चित्ता-
द्वाद्भेदबोधकं किं चित्परम्परया तत्र पर्यवसानम्। किं
च भेदस्य ज्ञाताविकत्वे तन्निन्दा न स्यात्। दृश्यते च सा
यथा नारदीये। हरिरूपी महादेवो लिङ्गरूपी जनार्दनः।
ईषदप्यन्तरं नास्ति भेदकृन्नरकं व्रजेदिति। कौर्मे च। ये
त्वन्यं विष्णुमव्ययं मां च देवं महेश्वरम्। एकीभावेन
पश्यन्ति न तेषां पुनरुद्भवः। ये ऽन्यथा संप्रपश्यन्ति मत्वे-
तान्तरम्। ते यान्ति नरकान्घोरान्नाहं तेषु व्यवस्थि-
तोऽस्मि इति। इदं विधिभेददर्शननिन्दायामभ्युपगन्तव्यम्।
भविष्योत्तरे। विष्णोरन्यं तु पश्यन्ति ये मां ब्रह्माण-
मर्कतनयो मूढाः पच्यन्ते नरकेष्वथ इत्यादि।
स्मृतौ च। यो ब्रह्मविष्णुरुद्राणां भेदमुत्तमभा-
... नरकान्नाविमुक्तो भवति मानव इति। वा-
युरप्याह। आ... र्वां नेति संरम्भाभिनिवेशिनः। यातु-
धाना भवन्त्येव ... न संशय इति।

ये तु वैष्णवंमन्याः शिवादिद्वेषं कुर्वन्ति ते न चेक्षु-
रसन्यायेन माया बहुरूपा। यथेक्षुरसो बहुरूपो ऽपि बहि-
र्मलिनो दृश्यते तथा माया ऽप्यन्तर्बहुरूपा ऽपि बहिस्त-
मोरूपा दृश्यते तस्याश्च मलिनतमं रूपं तदेव सत्त्वम्।
इक्षुरसस्येव सिता। यथा येक्षुमाधुर्यं सितायां कृत्स्न-
मभिव्यज्यते अन्यत्र मलसम्पर्कादल्पमल्पतरं च एवं
परैश्वर्यं सत्त्वे ऽतिशुद्धे सर्वमभिव्यज्यते अन्यत्र मलिनद-
र्पणन्यायेनाल्पमल्पतरं च। किञ्च व्रीहिबीजन्यायेनापि
रजस्तमसोः सारः सत्त्वं यथा व्रीहिबीजस्य स्थूलस्तुषः
स्थूलस्तत आन्तरः सूक्ष्मस्तुषः कणीकरणाभावे ततो ऽप्य-
ङ्कुरोत्पत्तिर्नान्तरत्वादेवं तमोरजसोर्मलत्वादेव सि-

यत्नापुत्पत्तिः तत्तत्पदनिष्ठत्वस्य निषेधेनैव जगद्धेतुत्वा-
धिपत्यमितरयोस्तदभावाज्जीवत्वम् । अतः श्रेयःकामैः
सत्त्वाधिष्ठितः परमेश्वरो हरिरेवाराध्यः । अन्यौ तु
राजसं तामसं चैव दूरतः परिवर्जयेदिति न्यायात्त्याज्या-
वित्यादि निन्दां कुर्वन्ति ये च शैवंमन्या विष्ण्वादिद्वेषं
कुर्वन्ति तेन च तमो वा इदमग्र आसीदिति श्रुतौ वैकारेण
प्रवर्ते गुणान्तराभावो दर्शितः । एवं च यथा व्रीहि
प्रथमं तुष एवाविर्भवति ततस्तद्गर्भे प्रकृत्यापूरेण
भवति तदपि पुनः प्रकृत्यापूरेण यवतां गतं तण्डुला
कारो भवति तस्मिंश्च सिद्धे तद्बीजं एवं तदङ्कुरोत्पादनं
भवति एवं निवेदं प्रथमं तम एवासीत्सर्वेश्वरेणाप
आत्मन्येकदेशे प्रव्याविलं वैचन्त्याप्यवृत्तिस्थत्वमा
रजःसंज्ञं भवति एवं रजो ऽपि प्रवृत्तिस्वा
प्रव्याविलं वैकल्यात्मकाशस्वभावत्वापन्न
एवं गुणत्रयात्मकत्वाविशेषेऽपि त्रिगुण रूपः तत्प्र-
त्याधिक्यात्तु त्रयः । तथापि तमउपाधिः शिव ईशः ।
रजउपाधिर्विधिः सत्त्वोपाधिर्विष्णुः तौ च कार्यगुणोपा-
धित्वात्कारणोपाधेः शिवस्याङ्गभूतौ जीवौ स्तः कार्योपा-
धिरयं जीवः कारणोपाधिरीश्वर इत्यादिश्रुतेः । तथा च
न हि भिक्षुक इत्यादिन्यायः तौ न श्रेयःकामोपासनार्हा-
विति त्वयोत्थापितो मोहिनीजन्यायेन भक्ष्यमाणोऽद्भुतगुण-
न्यायेन तवैव मूर्ध्नि पतित इत्यादिनिन्दां कुर्वन्ति तेषां
दुर्गतेर्नीहारस्य तु किं वक्तव्यम् । यथाऽऽह भगवान्युधिष्ठिरं
प्रति भविष्योत्तरे । मम भक्तः शिवद्वेषी मद्भक्तेषु च शिव-
प्रियः । तावुभौ नरकं यातो यावच्चन्द्रदिवाकराविति ।
भारते च शिवं प्रति । यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वा-
मनु स मामन्वित्यादि । कौर्मे पर्वण्यपि । ध्यानं येन-

त्यक्तं ज्ञानयज्ञादिको विधिः । तेषां विनश्यति क्षिप्रं ये द्विषन्ति पिनाकिनम् । यो मां समभ्यर्चयेन्नित्यमेकान्तं भावमाश्रितः । विनिन्दन्देवमीशानं स याति नरकं ध्रुवम् । तस्माद्धि परिहर्तव्या निन्दा पशुपतेर्द्विजाः । कर्मणा मनसा वाचा तद्भक्तेष्वपि यत्नतः । ये तु दक्षाध्वरे शप्ता दधीचेन महर्षयः । भविष्यन्ति कलौ भक्तैः परिहार्याः प्रयत्नतः । द्विषन्तो देवमीशानं युष्माकं वंशजाः । शप्ताश्च गौतमेनोर्व्यां न सम्भाष्या द्विजोत्तमैः । तत्रैव स्थलान्तरे । परात्परतरं यान्ति नारायणपरा जनाः । न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरमिति । इत्याह हरिं प्रति कैलासयात्रायाम् । यश्च त्वां वेत्ति गोविन्द स मां वेत्ति न संशय इत्यादि । कोऽपि नमिष्यति मूर्खं वा पण्डितं वा ऽपि ब्राह्मणं वा महाशयम् । सेवयापि श्वपाकं वा न नारायणनिन्दकमिति । यतो ऽतिदुर्लभमनिच्छाप्यर्थनीयस्वगणभावं यत्नेनापि दक्षाकर्षेण हरिर्बहुधा मोक्षायाराधितो ऽपि न ददौ तं हरौ । यथा ऽऽह स हरिं प्रति । अहं पिशाचवेषेण संस्थितः पापकर्मकृत् । सततं तृष्णयाविष्टं धनस्थानाय कर्णयोः । मम न प्रविशेन्नाम विष्णोरिति चिन्तितम् । अहं कैलासनिलयमासाद्य वृषभध्वजम् । आराध्य तं महादेवस्तुवं सततं शिवम् । ततः प्रसन्नो भगवान् वृणीष्वेति वरं हरः । ततो मुक्तिर्मया तत्र प्रार्थिता देवसन्निधौ । मुक्तिं प्रार्थयमानं मां पुनराह त्रिलोचनः । मुक्तिप्रदाता सर्वेषां विष्णुरेव न संशयः । तस्माद्गत्वा च बदरीं तमाराध्य जनार्दनम् । मुक्तिं प्राप्नुहि गोविन्दान्नरनारायणाश्रम इति । अत्र प्रसङ्ग इत्यनन्तरनिवेशव्याघातार्थेयम् । ततः महाभारतानुशासनपर्वणेन केवलं तं कथितमात्र तु प्रसङ्गः ।

यश्च त्वां वेत्तीत्यादिस्तुतिविरोधेन हरिशैवयोः प्रसादा-
योगात् । कथमन्यथा त्वं न मोचयेत् । न तत्तल्लोकेषु स्थिते-
सुखं तयोः च मोचकत्वं नास्त्येवेति वाच्यम् । यत एनं अथा-
चारिण ऊचुः किञ्जप्येनामृतत्वं ब्रूहीति स होवाच या-
ज्ञवल्क्यः शतरुद्रियेणेति एतानि ह वा अमृतस्य नाम-
धानि एतैर्ह वा अमृतो भवति सर्वदा सकृज्जा जपेदनेन
ज्ञानमाप्नोति संसारार्णवनाशनम् । शिव एको ध्येयः
शिवङ्करः । ब्रह्मा च तस्मात्प्रसूता पुराणी । ध्यात्वा
शङ्करं भूतयोनिं ये भक्त्या परं देवं शिवं स्तुव-
न्ति । इह लोके सुखं प्राप्य ते यान्ति परमां गतिम् ।
सर्वैश्वर्येशितारं वै सर्वपापप्रणाशनम् । स मोचयति
सुप्रीतः शरण्यः शरणागतानित्याद्यसंख्यश्रुतिस्मृतिवचना-
प्रामाण्यापत्तेः । शम्भुशङ्करादिशब्दानां शिवादिवदर्थ-
कल्पनया संस्काराणां नित्यत्वात् प्रत्येकेऽपि शमनित्यादि-
निरुक्तिस्मृत्यप्रामाण्यापत्तेश्च । तथा स्वभक्तिजन्योत्कृष्ट-
सुकृतज्ञानप्रतिबन्धकहरिद्वेषस्य शिवानुयायिष्वनुपपत्त्यो-
भिन्नविप्रधनापहारकस्य रावणस्य च निवर्तनायेत्यपी-
सेवितः । द्वेषे ऽगते च तस्य रावणस्यापवर्गज्ञानतायाः
तयोर्मेलनौ । तेन न तत्कृतोत्कृष्टभक्तिवैयर्थ्यम् । कथमन्यथा
प्रह्लादादिनिरतस्य हरौ इव भक्तिज्ञानलाभप्रतीतिश्च
स्यात् । जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः । नरा-
णां क्षीणपापानां कृष्णे भक्तिः प्रजायते । अथवाचापि
वस्तुस्थितौ न लभ्यः । मनुष्याणां सहस्रेषु बहूनां जन्मना-
मन्ते इत्यादिना तयोरतिदुर्लभतोक्तेः । तथाऽस्मिन्नध्या-
पाये शिवाराधनादेवाच्युतभक्तिप्रधानान्तरव्यापारकालस्य
प्रभासदेहविदेहमुक्तिफलं ज्ञानं जातम् । तदन्यत्वे सति
तज्जन्यजनकव्यापारत्वात् भक्तिहरिभक्तेश्च तत्त्वात् ।

यत्स्वयं स्वर्गवासस्त इत्यादिना कृष्णाज्ञया स्वर्गगमनं तस्य तथोक्तं तदपि ये स्वर्गमेव परं मन्यन्ते तदर्थं चाति-प्रयासं कुर्वन्ति तैरप्यल्पायासा हरिभक्तिरेव कार्येति ज्ञापनार्थम् । न तु वस्तुत इन्द्रादीरप्यर्थनीयेयसामीप्या-भ्यर्थाय ततो ऽतितुच्छे कारागारसदृशे स्वर्गे गमनस्य पालनं युक्तम् न हि हरिभक्तियोगलये । महेशसामीप्यं त्वपारपुण्यपुञ्जप्रसादितत्वप्रसादलभ्यम् । यथा ऽऽहेशः स्वसामीप्यस्यातिदुर्लभतां ध्रुवनन्दनाय भारते । परि-तुष्टो ऽस्मि ते वत्स सेवनेनैव शुभ । यदुना ऽत्र विष्णु-केन मत्समीपे भविष्यसीति । ननु शताश्वमेधकर्तुः शक्र-स्यापि क्षणमपि दुर्लभं ते सामीप्यमेकस्यापि क्रतोरसमा-पयितुर्मे कथं भवितेति शङ्कमानं प्रत्याह । अश्वमेधश-तस्य वाजपेयशतस्य च । प्रजापते मत्प्रसादात्फलभागी भविष्यसीति । ननु यः कुरुते स भुङ्क्त इति न्यायेन कर्तु-रेव फलं भवति अन्यथा ऽतिप्रसङ्गात्तथा चाश्वमेधाद्य-कर्तुर्मे कथं तत्फलभाक्त्वमित्याशङ्क्याह मत्प्रसादादिति । पुनरावृत्तिफलकैस्तैरपुनरावृत्तिरूपं ते सामीप्यं कथं स्या-दिति तच्चिन्ताभावमाह । भूयश्च ते वरं दद्मीत्यादिना त्यज्यतां मानसो ज्वर इत्यन्तेन । न चैते वराः स्वसा-मीप्यादन्य एवैतेन दत्ता इति भ्रमितव्यम् । यदुना ऽत्र विष्णुकेनेति प्रागेव वरपर्यवसानोक्तेः । एकयज्ञनापि शिव-सामीप्याश्वमेधशतवाजपेयशतलाभे च सति मानसज्व-रासम्भवादन्यवरदानेन दत्तानामुक्तानुपपत्तेश्च महुपका-कारेण लभ्यं युज्यते । शिवधर्मोत्तरे च । ये संप्राप्ताः परं स्थानं ध्यानयोगरता नराः । न तेषां पुनरावृत्तिर्घोरसंसा-रसागरे । सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णा महेश्वराः । शिव-तुल्यबलोपेताः परं शिवपुरं गताः । इतीशसामीप्यमहिमा

जयेते । नन्विदं माहात्म्यं विष्णुं गतानां तत्सामीप्यला-
भरूपलक्षणां मुक्तिं प्राप्तानामयं तु तदनुचरो न तु तत्पुरवा-
सीति चेन्नूनं तर्हि नीतज्ञो यदि नीतिमेत्यादिवाक्यस्या-
नुकारीयेदं विष्णुप्रसादहेतुत्वानमिथ्या वाच्यानेनैषामनुचरत्वं
प्राप्तानामपि माहात्म्यम् । येषां पदं हिरण्यगर्भादिपदेभ्यो
ऽपि श्रेष्ठं स्मरन्ति पौराणिकाः । भिन्दन्ति दैत्यान्दुर्धर्षानपि-
घ्नन्ति व्यत्यासयन्ति क्षितिमन्तरिक्षम् । सुखीकृतजगत्पुरं-
दराणां किं दुष्करं शंकरकिङ्कराणामिति । ते हि साक्षाद्वि-
ष्णवो ह्यन्तरिक्षसदस्तथा । पृथिवीषद इत्येते विज्ञेया वि-
ष्णवः यथा इत्यादिपुराणोपबृंहिता वेदमन्त्रोपनिष-
द्वाक्यैरपरिमितं महिमानं ख्यापयन्ति । द्वितीयं यथा
शावपत्यमथाओतीत्यथर्वशिरस्य महाफलगाथपाठे शिवा-
नुचरत्वं कीर्तयद्देवान्तरेभ्यो ऽत्यातीवोत्कर्षं स्फुटयति ।
यत्र गर्भोत्सर्गं यतैः भक्तैः भवदृष्टिकं प्रकृतिभेदस्य पैशा-
चिकीं किंभित्यवरसम्पदः प्रजन्नाय नाथाजहे । अथक्रूप-
नदेवकीचिकट्टकदवबाहलिस्फुटदन्तकुटकोटिभिर्वधवद्वा-
दिभिर्भूषित इति । अङ्गुणसहायस्य चास्य यथा विपत्स्वन-
वस्थाने स्वागतो ऽहं महारौरवात्कैलासादिति तदुक्तया
कैलासवासित्वं च तथा च कथं तस्य स्वर्गगमनं हरिकृपा-
लभ्यं स्यात् । ईदृशस्य हरिवेषे प्रवृत्तिस्तु जयविजययोः
सनकादिशापसने प्रवृत्तिरिव ब्रह्मशैविणां दुर्नीतिसूचनाय
हरीच्छयैव । शैवापसदाभावत्वे विष्णुशैविणां शैवनीति-
कल्पनेन दुर्नीतिसूचनाय हरेच्छयैवेति बोध्यम् । तस्मात्तु-
च्छाभिप्रायैषा ऽत्र स्वर्गगमनोक्तिः स विवक्षितेष एवा-
गत इति तु तत्त्वम् । यतः कृष्णाय वरं दातुमागतेनैतेना-
गतानां नवाङ्कुराणां वर्षाणमस्तु ऽत्यादरेण वर्णनम् ।
तत्रार्थे तत्रपदस्य भूतसंघाः सहकृताः । घण्टाकर्णौ विष्व-

नह-
पुत्रं पितं
...श्यन्तीति ॥ एवं
... ...ध्यन्तो हरमेव क्षिप्यन्तीति गर्थं ते वेधा
इति ध्येयम् । अथ प्रकृतमनुसरामः । वाल्मीकीयरामा-
यणे वने रामगमनं मे ऽनुमतं नासीति कौसल्यावाक्यात-
नार्थं भरतो बहून् शपथान्कृत्वा अतिघोरमेतं शपथं शपथा-
न्ते चकार । यकस्या विपन्नगात्रेषु मार्गमाश्रित्य पश्यतः ।
तस्य पापेन लिप्येत यस्यार्यो ऽनुमते गत इति । अत्रादौ
हरिहरादेरिति शेषः । मार्गं तत्तन्मार्गत्वमेव वक्तं वाक्यम् ।
मार्गमित्युक्त्या तु शास्त्रीयं, तत्तदुपासनार्थं तत्तदुपदे-
वर्णनरूपमार्गमेवाश्रित्य न तु सर्वार्थं ज्ञात्वेति ध्वन्यते ।
विपन्नगात्रेषु हरादेरूपोपकर्षोक्त्या कष्टं कुर्वंस्तु यत्पा-
पम् तच्च च पश्यतः श्रुण्वतो यत्पापं तस्य पापस्य सम-
न्विता तत्तुल्येनेति यावत् । स्वकृतस्य पापेनान्यस्य
लेपसम्भवः । तेनेति पाठस्तु सुगमः । अत्रापि पश्यत इत्यु-
क्तौ विचार्य श्रुत्वा ऽप्यनुसृत्य ऽन्यो ऽपकृष्ट इति वा निषि-
द्धेति तस्य यत्पापं तत्स्यादिति भावः । यच्चान्यत्तन्महित्व-
हानिर्विदितं श्रुण्वतः इदानीमप्यपि पापं भवत्येव
कर्तौ पिपासं निरियात्कृत्य ईशे ...

ना.
नैष्ठुरिक-
न्तरं न॰ र ... ा न विद्यते
कष्णां येषां तादृशाः सन्तः पापयोनयः ...
जन्मानः सुर्भवन्ति तर्हि निन्दकास्तादृशा भवन्तीति
किमु वक्तव्यम् । यथा ऽऽहोपमन्युर्हरिं प्रति । यश्चाच्यु-
तपसे देवं कारणात्मानमीश्वरम् । स कृष्ण नरकं याति
सह पूर्वैः सहात्मजैरिति । एवं हि दुर्गतिर्निन्दया ग्रावाणो ऽप्यनु-
सानामपि दुर्गमानां निन्द्याद्विवेकभक्त्या ऽन्यनिन्दकानां
निर्विवादत्वाद्न्यायेन पुनर्दुर्गतौ प्रवेश इति कोटिशो वा-
क्यानि बोधयन्ति विस्तरभयादिदं न ममेवेह दर्शितम् ।
एवमेकपक्षपातेनान्यनिन्दकानामप्यस्ति तात्कालिकः
कश्चिद्धर्मविशेषस्तेषां नास्तिकसुहृदां तथा ऽपि कोऽयमप-
लब्धयान्मिथ्यावादिनां तेषां परिपाके ऽतिदुःसहं दुःख-
मित्याशिकैस्त्याज्यो ऽयं दुराग्रहः । तेषां च सङ्गो ऽप्य-
यत्नेन त्याज्या दुस्तरेति न्यायाग्र्याऽज्यः । अन्यथा
वैराग्यान्मानाशक्त्यनिग्रह इतिन्यायात्सत्सङ्गिनामपि दु-
र्गमेवर्ज्यत्वात् । तस्माद्विशदवश्चिन्तयेषां तेदृशीनां त्वन्य-
मतपिशाचश्चिद्वेषापासकानां विष्णुजनानां नितरां निर्-
लम्बानानां तत्सर्वोदासरत्नसाक्षात्कारेण मोक्षः ।

सकामानामर्चिरादिमार्गेण सत्यलोकं गतानां हिरण्य-गर्भेण सह मोक्षः । मदुक्तमीश्वरगीतायाम् । ये त्विमं विष्णुमव्यक्तं मां च देवं महेश्वरम् । एकीभावेन पश्यन्ति न तेषां पुनरुद्भव इति । अत्र हरिहरयोर्ग्रहणं काकदधि-घातकन्यायेन विधेरप्युपलक्षणं यथा ऽऽह हरिर्दक्षं प्रति भागवते । अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् । आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषण इत्यादिना त्रयाणा-मेकभावानां यो न पश्यति वै भिदाम् । सर्वभूतात्मनां ब्रह्मन्स शान्तिमधिगच्छतीत्यन्तेन । एवं हरिहरद्वेषनि-न्दानिन्दकं वचो ऽप्युपलक्षणं बोध्यम् । किं बहुना सर्व-देवानन्यत्वस्य सर्वेषु साधितत्वादेकनिन्दायाः सर्व-निन्दात्वादेकनिन्दकः सर्वनिन्दक एकद्वेष्टा सर्वद्वेष्टा चेति बोध्यम् । ननु ब्रह्मादीनां सर्वेषां किं नाम सर्वेषु चतु-र्मुखादिदेहेषु वृत्तित्वम् । न तावद्गृहपतिन्यायेन भिन्न-भिन्नावयवावच्छेदेनैकैकदेहे भिन्नभिन्नदेशवृत्तित्वं तत् परिच्छिन्नत्वसावयवत्वादिप्रसङ्गेनानित्यत्वापातात् । च एव न तिलतण्डुलन्यायेन सर्वदेहेष्वेषां संश्लिष्टनीर-क्षीरन्यायेन सङ्करो वा ऽपि युज्यते । अतो ऽनुपपन्नो ऽयं पक्ष इति चेन्न वेण्याकाशन्यायेनात्यन्ताभेदस्यैव स्वी-कारात् । न हि प्रयागे ऽन्योन्यसंसर्गैकप्रवाहीभूते श्वेत-श्यामरक्तवर्णे गङ्गायमुनासरस्वतीनीरे प्रतिबिम्बितस्य सूर्य-बिम्बस्य वा ऽऽकाशस्य वा भेदलेशो ऽप्यस्ति । किञ्च यतो वा इमानि भूतानि जायन्ते सदेव सोम्येदमग्र आसीदे-कमेवाद्वितीयं सो ऽकामयत बहु स्यां प्रजायेयेत्यादिना ऽऽत्मैवाद्वितीयं ब्रह्म सृष्टेः प्रागासीत्तस्मादेव मायोपहि-तादभिन्ननिमित्तोपादानात्सर्वं जगदुत्पन्नं तेनैव च सर्व-स्थितिमत् तत्रैव चान्ते लीयते इति बोध्यते । ऐतदात्म्य-

मिदं सर्वमित्यादिना च सर्वात्मत्वं तस्योच्यते । तं त्वौ-
पनिषदं पुरुषं पृच्छामि सर्वे वेदा यत्पदमामनन्तीत्यादि-
श्रुतिभिरुपक्रमादिभिर्लिङ्गैश्च तस्यैव सर्ववेदतात्पर्यमिति ज्ञा-
यते । अत एव तदुपबृंहणभूतपुराणादेरपि तस्यैव पर्यवसा-
नम् । अस्य महतो भूतस्य निश्वसितमेतदृग्वेदो यजुर्वेदः
सामवेद इत्यागमेन तस्यैवाखिलागमाविर्भावहेतुतोच्यते
अपवर्गो जन्माद्यस्य यतः शास्त्रयोनित्वात्तत्तु समन्व-
यादित्यादिसूत्रभाष्यादिषु प्रपञ्चितः । पुरुषान्न परं किं-
चित्सा काष्ठा सा परा गतिरित्यादिश्रुत्या च तस्यैव सर्वो-
त्कृष्टत्वं मुक्तप्राप्यत्वरूपपरमगतित्वं बोध्यम् । अथ पुरुषो
ह वै नारायणोऽकामयत प्रजाः सृजेयेत्यादिश्रुतौ तु
जगद्धेतुत्वं हरेरुच्यते । अथ नित्यो देव एको नारायणो
ब्रह्मा च नारायण इत्यादिना च सर्वात्मत्वं तस्यैवाम्ना-
यते । स्वतोऽसङ्गोदासीनस्य कारणत्वासम्भवान्मायिन-
त्वमाश्रयम् । तच्च मायित्वं दैवी ह्येषा गुणमयी मम माये-
ति हरिवाक्याद्धरेरेव ज्ञायते । तद्विष्णोः परमं पदमिति
श्रुत्या यद्गत्वा न निवर्तन्ते तद्धाम परमं ममेति स्मृत्या
च मुक्तप्राप्यता ऽपि तस्यैव प्रतीयते । अत्र सर्वत्र षष्ठी
राहोः शिर इतिवदभेदे बोध्या । एकत्वमक्षयं परमं पदं
यदित्यादौ सामानाधिकरण्यदर्शनात् । एतेन तद्विष्णो-
रिति भेदे षष्ठी पञ्चमी च बहुलो ऽपास्ताः । ततः पर-
तरं नान्यत् न त्वत्समो ऽस्तीत्यादिना सर्वोत्तमता ऽपि
तस्योच्यते । तथा नारायणपरा वेदा नारायणपरा मखाः ।
वेदे रामायणे चैव पुराणे भारते तथा । आदावन्ते तथा
मध्ये हरिः सर्वत्र गीयते । वेदैश्च सर्वैरहमेव वेद्यो वेदान्त-
कृदित्यादिना श्रुत्यादितात्पर्यभूमित्वं तत्कारणत्वं च
हरेरुच्यते । ये देवा हवी स्वर्गलोकमायन् ते देवा अ-

श्रुष० । ९...

...सूक्तिव्याजेन तस्य स-
प्रभुत्वत्वं च विशेष्यसम्बन्धि-
...नैकाराभ्यामन्यपद्धतिकर्तृत्वयोः
मायया देव मूढया तव मोहितः
अपि ब्रह्मा त्वं न विजानाति इति तत्रैव हेत्व-
न्तेन मूढे तत्रिकानमपि पूर्णाभावकारणत्वोपपादन-
त्वमपि तस्यैवोवाच । एवं यो मां वेत्ति स वेदान्तार-
साङ्गानिरथर्वशीर्षे शम्भुज्ञानस्य साङ्गवेदज्ञानव्याप्यत्वे-
के...अन्यत्वोपलम्भात्तद्विषयीभूतमहेशस्य तत्प्रतिपाद्यत्वं
...श्रीयते । वेदाः साङ्गोपनिषदः पुराणाध्यात्मनिश्चयः ।
यदत्र परमं गुह्यं स वै देवो महेश्वर इति शान्तिपर्वान्तर्गत-
...। कथ्यते सर्वसिद्धान्तैर्वेदान्तैर्या मुनीश्वरैरिति पौष्क-
र स्पष्टं साङ्गवेदपुराणादितात्पर्यभूमित्वं शम्भोः कथ्यते ।
तस्मात् परतरं नान्यत् किंचिदस्ति महेश्वरादिति । तस्मा-
न्नान्यः परो देवस्त्रिषु लोकेषु विद्यत इति च कस्येव तयो-
रेवास्य सर्वेष्वमतोऽन्यते हरिवंशे च हरिवाक्यं । नान्य-
स्त्वत्तः परमो देवदेव जगत्पतिः सुरवीरारिहन्तरा । नान्य-

...कृतम् । मन्त्रकृत्
...रम् । आदित्यमथ वै विष्णु
...त्यादि । किंचैकादशस्थानी ...
...न्या हतांस्त्वं जहीत्यनेन हरिणा हता
...था ऽर्जुनेन हता इति ज्ञायते । सत्यहरिश्चे
...पन्यासवाक्यार्थं इति व्याख्यानेन हता एव
...वाः पार्थेन हता इति निश्चीयते । किंच एष एव साधु
कर्म कारयति अक्षादो मधुदानः फलभृत् उपपत्तेरित्या-
दिश्रुतिसूत्रैः परात्मनः शुभाशुभकर्मफलदातृतोच्यते ।
अजन्मासमन्तात्प्रदातीत्यन्तादः । ततो ह्यस्य बन्धविमोक्ष-
याविरित्यादिना च बन्धकत्वं मोचकत्वं चेशस्योच्यते । अभूते
च ततः कामान्, क्षिपाम्यजस्रमशुभान्, तेषामहं समुद्धर्ते-
त्यादिना तत्सर्वं हरेरुच्यते । स योजयति सुप्रीतः शर-
ण्यः शरणागतान् । आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्क-
लान् । स ददाति मनुष्येभ्यः स देवान्विप्रान् पुनः । सेन्द्रा-
दिषु च देवेषु तस्य चैश्वर्यमुच्यते । स कामानां प्रभुर्देवो
ये दिव्या ये च मानुषाः । समेनयति यमितं सर्वाणि

सर्वकर्तृ । त्रिषष्टिकल्पजुष्याणां तस्मादेव शिवः स्मृ-
तः । सर्वथा यः पशून्पाति तैश्च यद्रमते पुनः । तेषामधि-
पतिर्यच्च तस्मात्पशुपतिः स्मृत इत्यादि भारते । ब्रह्मादि-
स्तम्बपर्यन्तान्स्थानुक्षेपादिपुराणेषु च तत्सर्वं द्रष्टव्य-
म् । देव्यथर्वशिरसि तु मन्त्रैः अग्निप्रभाक्षितीप-
रूपत्वादिकं प्राक्प्रदर्शिताथर्वशीर्षे शिवस्योक्तं तत्सर्वं शि-
वाया दर्शितम् । हरिवंशे च हरिप्रोक्तोमास्तवे । आद्या
सा सर्वभूतानां निष्ठा च परमा गतिरिति तस्याः सर्वा-
धिष्ठातृत्वं मुक्तिप्रदत्वं चोक्तम् । तत्रैव । सर्वोत्स्येव
दानवानां यथाय चेत्यादिना त्वया व्याप्तमिदं सर्वं जग-
त्स्थावरजङ्गममित्यनेन तस्याः सर्वात्मता चोक्ता । तथा
भविष्योत्तरे उमोक्तिः यो मां पश्यति सर्वत्र सर्वं च
मयि पश्यति । तस्याहं नित्यदेहस्था स च नित्यं मयि
स्थितः । न पश्येत्सर्वभूतेषु न च सर्वं मयि स्थितम् । स
तु पर्वतदुर्गेषु मार्गमाणो विनश्यतीति । मात्स्ये च सर्वगा
सर्वभूतेषु द्रष्टव्या परमेश्वरी । सर्वलोकेषु यत्किंचिद्विहितं
न तया विनेति । मार्कण्डेये तु तया विसृज्यते विश्वं जग-
देतच्चराचरम् । सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ।
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरीत्यादिना प्रागुक्तं सर्व-
मेषा दर्शितम् । सनत्कुमारसंहितायाम् । विश्वे वेदान्त-
गीते श्रुतिपरिपठिते मोचके मुक्तिमार्गे वर्णातीतस्वरूपे
इत्यादिना वेदान्तोपपादकत्वमोचकत्वादिकं सरस्वत्या उ-
क्तम् । सरस्वतीं नमस्यामि चेतनां हृदि संस्थिताम् । भ-
क्तिदां वरदां चैव सर्वकामफलप्रदाम् । कुलकोशप्रदामि-
त्यादिना बृहस्पतिश्च तत्सर्वं तस्या दर्शितवान् । तस्याः
सञ्जहा प्राणं चरन्ति तेन जीवन्ति प्रविश्यान्तकः । ध्यात्वा-
चरं तद्विश्वमुपजीवतीत्यादिश्रुत्या ऽप्यस्या जगदुत्पाद-

ष्टृत्वपालकत्वादिकमुक्तम् । अयमर्थः । तस्या आपः स-
काशात्समुद्रा मेघा यथा समुद्भवन्ति जलमत्यादिति
श्रुत्यर्थः । अपि अधिकं प्रभूतमुदकं पिबन्ति वायुवेगबला-
त्पेवान्तर्यामिणा प्रेरिता मेघादयो जलवर्षणादिकं कुर्व-
न्ति । अक्षरं प्रधानं तदधिष्ठितं सत्क्षरति ईश्वरादिमहदा-
द्यनन्तकार्याकारेण परिणमते । अत्र तस्या इति तेनेति च
स्त्रीपुंलिङ्गनिर्देशेनास्या मायामहेशोभयरूपत्वं ध्वनितम् ।
तच्च मायोपहितब्रह्मरूपत्वे पर्यवस्यति । ईश्वरीं सर्वभू-
तानां ताविहोपलक्षये स्थितमिति तच्छ्रुत्याः सर्वेश्वरत्वं श्रू-
यते । कार्येते च जगत्कारणत्वसर्वान्तरत्वमोचकत्वादिकं
दृश्यते । नमस्ते सर्वभूतानां जननीमब्जसम्भवाम् । त्वं
सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनीत्यादिना
शरीरारोग्यैश्वर्यपरिपन्थिपक्षयः सुखम् । देवि त्वदृष्टिदृष्टानां
पुरुषाणां न दुर्लभमित्यन्तेन तथैव । तन्निबोध यथा सर्गं
भगवान्संप्रवर्तते । नारायणाख्यो भगवान्ब्रह्मा लोकपि-
तामहः । उत्पन्नः प्रोच्यते विद्वन्नित्य एवोपचारतः । एकार्णवे
तु त्रैलोक्ये ब्रह्मा नारायणात्मकः । भोगिशय्यागतः शेते
त्रैलोक्यग्रासबृंहितः । जनस्थैर्योगिभिर्देवश्चिन्त्यमानो
ऽब्जसम्भवः । प्रजाः ससर्ज भगवान्ब्रह्मा नारायणात्मकः
इत्यादिना विधेर्जगदुत्पत्तिप्रलयहेतुत्वयोगिचिन्त्यत्वादि-
कमुक्तम् । एवं शैववैष्णवादिमतेषु दर्शितान्यप्रदर्शितानि
चापीदृशानि सर्वाण्येव कर्तव्यानि । एतानि च यदि सं-
भवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत इति न्यायात्समु-
दायतात्पर्यान्यथानुपपत्त्यैकवाक्यतां नीत्वैतत्प्रतिपादकानां
हरिहरादीनामेकवाक्यतापन्नानां संभूयैकार्थप्रतिपादकत्व-
मिति न्यायेनैवाहितान्तःकरणैरपेक्ष्यते तदा प्रमाणानि भ-
वन्ति । अन्यथा त्वन्योन्यं विरोधं प्राप्य विनिगमना-

विरोधेन सर्वाण्यपि सुन्दोपसुन्दन्यायाक्रान्तानि स्युः । न हि सर्वेषामन्योन्यभिन्नानां तत्तत्कर्तृत्वं सर्वेश्वरत्वाद्यत्वादिकं संभवति विकल्पसमुच्चयादीनां प्रागेव निरस्तत्वात् । तस्माच्छ्रुतिस्मृतिप्रामाण्यमिच्छद्भिस्तदेव एवोपेयः । यस्तु तं लङ्घ्य पुराणमात्रतर्कैस्तन्त्रैर्वा साधयति स न शैवो न वा वैष्णवः किं तु नास्तिक एवेति मन्तव्यम् । यथा ऽऽह हरिः । श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्तते । आज्ञाच्छेदी मम द्वेषी मद्भक्तो ऽपि न वैष्णवः इति । मनुश्च श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः । ते मूले यो ऽवमन्येत हेतुशास्त्राश्रयो द्विजः । स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दक इति । ईदृशश्च बन्धुभिरपि त्याज्यः । अपथ्यानं तु गच्छन्तं सोदरो ऽपि विमुञ्चतीति न्यायात् । किंच पुराणादौ वैष्णवो वा शैवो वा प्रष्टव्यो बुधैः । किं विष्णोर्भिन्नः शिवः शिवाद्भिन्नो वा विष्णुः । नाद्यः । घटाद्भिन्नस्य पटादेर्घटत्ववद्विष्णुभिन्नस्याविष्णुत्वापत्त्या ऽऽनन्दात्मकशिवरूपत्वमपि न स्यात् । यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतेः । पुरुषोत्तमाद्भिन्नस्यापुरुषोत्तमत्वं मुकुन्दभिन्नस्यामुकुन्दत्वं च ध्रुवम् । तथा चास्य तदुपासनया मुमुक्षूणाम् । न द्वितीयः । शिवशङ्करमहेश्वरभिन्नस्याशिवाशङ्करामहेश्वरत्वापत्त्या ऽनुपास्यत्वप्रसङ्गात् । शिव एको ध्येयः शिवंकरः अन्यत्सर्वं परित्यज्येति श्रुतेः । अत एवोक्तं हरिवंशे न विना शङ्करं विष्णुर्न विना केशवं शिव इत्यादि । शिवस्य विष्णोर्भिन्नत्वे ऽपि न विष्णोः शिवाद्भिन्नत्वमिति तु न वैष्णवेन वक्तुं शक्यम् एवमन्यथादर्शनात् । न विना केशवं शिव इत्युक्तिविरोधाच्च स्वपक्षहानेश्च । तथा च वक्ष्यतां वक्ष्यतां वाक्यो भावेनार्थो ऽस्ति जीवता । स्वपक्षहानिकर्तृ-

न्यायः कुब्जाम्रारन्तो गत इति न्यायविषयता नातिवर्तते । एवं वैष्णवमते ऽपि बोध्यम् । तस्मात्सत्त्वगुणविग्रहावच्छिन्ने परे ब्रह्मणि औपाधिको ऽपि भेदः कल्प्यः । तथा च श्यामसु- न्दरम् न श्यामतो ऽपि परस्याभयचिह्नं सर्वत्र होति । अपि चैकमेके इति च । ध्यानत उपासितो ऽपि परस्येश्वरस्याभयचि- ह्नमनेकरूपत्वं नास्ति सर्वत्र ब्रह्मपरेषु वेदान्तेषु तदेकत्वस्य श्रवणादित्याकूतार्थः । एके शालिनो मृत्योः स मृत्यु- माप्नोतीत्यादिभेदनिन्दापूर्वकाभेदबोधेन परमात्मनः समा- मनन्तीति द्वितीयार्थः । तर्हि तत्तत्पुराणेष्वितरासाधार- णत्वेन तत्तत्प्रतिपादनमप्रमाणं स्यात् । वैष्णवं शैवमित्यादि- पुराणसंज्ञाभेदाश्चानर्थकाः स्युः । चतुर्भिर्भगवान्विष्णुर्द्वाभ्यां ब्रह्मा तथा रविः । अष्टादशपुराणेषु शिवैस्तु भगवाञ्छिव इत्यादिप्रभासखण्डादिगतं विभागवचनं चाप्रमाणं स्यात् । तथा चावेद्वचःप्रामाण्यसाधने प्रवृत्तानां भवतामेकं सं- विद्धतो ऽपरं प्रच्यवतीति न्यायविषयत्वं दुर्वारम् । तथा चौपाधिको भेदो ऽप्यप्रयोजक इति चेन्न । तत्तद्गुणकार्यसर्गादि- प्राधान्यविवक्षया रजआद्यवच्छिन्न इव तत्तल्लीलाविग्र- हावच्छिन्ने ऽपीशे तत्तच्छब्दप्रवृत्तिसम्भवात् । एतद्विव- क्षया ऽपि च संज्ञाभेदश्रवणं यथा कुशीलवस्येव पु- रोप्तसंज्ञाभेदः । तदुक्तं वैष्णवे । सृष्टिस्थित्यन्तकरणाद् ब्रह्मविष्णुशिवात्मिकाम् । स संज्ञां याति भगवानेक एव जनार्दन इति । मार्कण्डेये ऽपि कुशीलवदृष्टान्तपूर्वक- मेवमेवोक्तम् । के चित्तु सत्त्वादिगुणावच्छिन्नेष्वपि चतुर्भुजा- दिदेहव्यक्तिजातिविशेषनिविष्टव्यापीशित्रुर्विष्ण्वादिशब्द- वाच्यत्वम् । तथा च श्रुत्यादौ तत्तच्छब्देन तत्तद्वाच्य- व्यवहारोपपत्तिरित्याहुः । एवं च रुद्रप्रतिष्ठितस्य तमोऽवच्छिन्न- चैतन्यस्य चतुर्भुजदेहाभिमानित्वात् तदभिमानविषयस्य

च त्रिनेत्रदेहस्य विष्णुशब्दितस्य सत्त्वावच्छिन्नचिदभिमानविषयत्वात् चतुर्भुजदेहस्यापि तयोरभिमानगोचरत्वात् रजोऽवच्छिन्नस्योभयाभिमानित्वाच्च यो विष्णुः स तु वै ब्रह्मा यो ब्रह्मा स पितामह इत्यादेरानुगुण्यम्। चतुर्भुजदेहस्यैव तदभिमानिनोर्हरिहरयोरपि हरिनारायणशालिशब्दाभिधेयत्वसामान्ये तत्र गोविन्देत्यादेरानुगुण्यम्। उक्तविवक्षया संज्ञाभेदादसाधारण्यव्यवहारादेरानुगुण्यं चेति सर्वं चतुरस्रम्। कारणीभूततमःप्रभृत्यवच्छिन्नचैतन्यस्य ब्रह्मादिसंज्ञा मैत्रायणीयश्रुतौ श्रूयन्ते। अथ यो ह खलु वावाऽस्य तामसोंऽशोऽसौ स ब्रह्मचारिणो योऽयं रुद्रः अथ यो ह खलु वावाऽस्य राजसोंऽशोऽसौ स ब्रह्मचारिणो योऽयं ब्रह्मा अथ यो ह खलु वावाऽस्य सात्त्विकोंऽशोऽसौ स ब्रह्मचारिणो योऽयं विष्णुः स वा एकस्त्रिधाभूत इत्यादि। अयमर्थः तामसः तमःप्रधानत्वेन तत्कार्यसंहारक्रियाप्रधानत्वेन वा विवक्षितोंऽश इत्यंशो हे ब्रह्मचारिणः। एवमग्रेऽपि। न च तामसत्वादिपदेन केवलतमआद्यवच्छिन्नो विवक्षितः तमआदेरन्योन्यसहचरस्वभावत्वात्। यथाऽऽहुः सांख्याः। अन्योन्यमिथुनवृत्तय इति। आगमश्चात्र भवति। अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः। रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः। तमसश्चापि मिथुने ते सत्त्वरजसी उभे। उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते। नैषामादिः संप्रयोगो वियोगो वोपलभ्यत इति। मिथुनपदेन सर्वथाविनाभाववर्तित्वरूपं सहचरणशीलत्वं विवक्षितम्। तथा च यथोक्तव्याख्यानमेव तामसादिपदेषूचितम्। एतेन प्रकृते तत्र दृष्टावधिध्यत इत्यादिकल्पना ऽप्यपास्तेत्यलमतिप्रसङ्गेन। तथा चैतेन सूचितमेतदत्रपृष्टोऽस्मीदं स्वधा। विष्णोरशांशवंश-

तेऽवरितं जगतो हितमित्यादिवैष्णवादौ कृष्णादावंशांश- त्वव्यवहार औपचारिकः । न तु तत्पाषाणांशो ऽयं कश्चिदिति वस्तुतस्तथात्वं निष्कलत्वश्रुतिविरोधात् । अत एवेन्दोरंशो गुरुरितिवदपि न । तस्यैव भिन्नत्वापत्तेश्च । नापि चित्क- णोतिवत्स्वरूपेण सः अवताराणां जीवत्वापत्तेः । नन्वैश्व- र्येबहुलत्वाविद्यावत्त्वकर्मकर्तृत्वादिरूपजीवलिङ्गसत्त्वा- त् जगत्कर्तृत्वाद्यकर्तृत्वादीश्वरलिङ्गासत्त्वाच्चैवमेव तेषां तदिति चेदूनं दुर्मतिरसि यतः अजो ऽपि सन्नव्ययात्मेत्याद्यसंख्य- वाक्यानि पश्यन्नपि न पश्यसीव । कर्मकर्तृत्वं तु लोका- नुग्रहार्थमेवास्य । यदि ह्यहं न वर्तेयमित्यादिभगवदुक्तेः । एव रागादिष्वपि बोध्यम् । तदुद्दिश्य सूक्तं भागवते श्रीम- द्भिर्नां गतिरियं प्रथमं अकारेत्यादि । शिवावतारस्य शैव- स्य ब्रह्महत्याव्रताचरणं लोकसंग्रहार्थमिति काशीखण्डादौ स्फुटम् । महादेवांशसंभूतमित्यादिना ऽशांशत्वोक्तिरप्यु- क्तरीत्यौपचारिक्येव । एवं श्रीगणेशस्य ब्रह्मवैवर्ते विष्णवं- शत्वोक्तिः अन्यत्र च शिवांशत्वोक्तिः क्वचित् ब्रह्मांश- त्वोक्तिर्वा सा ऽपीदृशी । सूर्ये च त्रिविधब्रह्मांशत्वोक्तिः क्व- चिच्छिवांशत्वोक्तिश्चैवमेव । सद्भिस्तु स्वांशाच्छिव एव न तदंशत्वकथापीति प्रसिद्धं ब्रह्माण्डपुराणे । कथं तर्हि राम- कृष्णादेः गर्भवासादिपुरःसरं जन्म क्रमेण च बाल्याव- स्थाः सूते सूर्यादिकं भार्यावधं विलापादिरिति चेति चेत् शृणु । यतो दृश्यत एवेन्द्रजालवत्तु वस्तुतो ऽस्ति सच्चिदानन्दघनत्वाज्ज्ञानादेः । तदुक्तं ब्रह्माण्डपुराणे । श्रीपंचतत्त्वात्मका देहो नास्य विजायते । किं तु नित्यो- द्भवैनन्यं सुखं नित्यां स्वकां तनुम् । प्रकाशयति सैवेयं ज- निर्विज्ञेया न चापरा । तथा ऽप्यसुरमोहार्थं परेषां च क्वचित्क- चित् । दुःखाज्ञानाद्यभावोऽस्य दर्शयत्युत्सवस्तथा । क्व अभा-

क चाज्ञानं स्वसजातिन्यत्वज्ञवे । लोकाभावाय तेषां शर्येत्तानजो हरिः । कृष्णो ह्यव्यक्तदेहो ऽपि व्यक्तदेहवत् । लोकानां दर्शयामास स्वरूपवदाकृतिमिति । श्रीहरिरित्युपलक्षणम् । मत्स्यकूर्मादौ पूर्णोऽवतारो ऽप्येवेव । तथा च रामावतारे लोकज्ञापनाफलं रावणवधेश्रुतिप्रतिबन्धेन दुःखभावो वस्तुसिद्धिश्च । मनुष्यातिरिक्तेन मरणाभावस्य तेन वृतत्वात् । कृष्णावतारे देहत्यागज्ञापनस्य मर्त्यानां वैराग्यं फलम् । अस्तु वैष्णवे । एवं संस्तूयमानस्तु भगवान्परमेश्वरः । उज्जहारात्मनः केशौ सितकृष्णौ महामुने । उवाच च सुरानेतौ मत्केशौ वसुधातले । अवतीर्य भुवो भारक्लेशहानिं करिष्यत इत्युक्तम् । तस्यायं भावः सुराः समस्ताः सुरनाथ कार्यमेभिर्मया यच्च तदीश सर्वम् । आज्ञापयाज्ञां परिपालयन्तः सदैव तिष्ठाम सदा ऽस्तदोषा इति सुरैरुक्तो भगवान्यत्न दुष्करं चेत्कुर्यामभिः साहाय्यं कार्यं स्यान्न त्वेवमस्ति भूभारनिवारणादौ कर्मान्तरापेक्षया महत्यपि कार्ये मत्केशयोरपि शक्तत्वादिति । न तु केशमात्रावतार इति भ्रमितव्यम् । ततः श्वेतकेशात्से दैत्या चारणीतले । प्रत्यावन्ति न संदेहो मद्रूपाक्षसिञ्चूर्णिताः । कृष्णाग्न्यानवतुपरस्थाभीत्यादिषु तत्रैव स्वावतारस्योक्तिविरोधात् । कृष्णस्तु भगवान्स्वयमित्यादिपुराणान्तरविरोधाच्च । अवतारमेदस्यार्थवादितत्वात्सत्यभामादेः केश ईर्ष्यया रामस्य श्वेतरूपतार्थं तदेव श्वेतो ऽभूदिति गम्यते । एतेनैतत्तुल्यं भारतवाक्यजातमपि व्याख्यातम् । तस्माद् ब्राह्मादौ मत्स्यादौ चांशस्योक्तिरौपचारिकीति सिद्धम् । तदांशत्वं ब्रह्मादिष्वाविष्कृतोत्कर्षादिहेतुशक्तिमयालोत्पन्नत्यादौ कैकहेतुशक्तित्वमेव न तु स्वांशिरसेजाविभज्ञानन्तशक्तिमयी ख्यापेक्षया न्यूनत्वे ऽस्य-

शक्तित्वेनानीश्वरत्वापत्त्या तद्वदनन्तशक्तित्वबोधकानन्-
न्यायात्मवाक्यापत्तेः । तस्मात्त्रिगुणमायोपहित एव ई-
श्वरो ऽपि संपूर्णो स्वयं वेत्तुमशक्यमिति न्याय-
सदुपयोगितदंशमादाय तत्तद्ब्रह्मावच्छेदेनोत्पत्त्य-
कैकं कर्म कुर्वन्ब्रह्मादिसंज्ञाभाग्भवेदेन व्यपदिश्यत
इत्यलम् । एवं मत्स्यादिष्ववतारेष्वपेक्षया ऽऽविष्कृता-
शक्तित्वमेवांशत्वव्यवहारहेतुः । अल्पशक्त्याविष्करण
स्याधिकाया अनुपयोगात् न त्वभावात् । यथा हि कश्चि-
त्सर्वशास्त्रज्ञो बहून्देशान्विचरन्यत्र यच्छिष्योपयोगं पश्यति
तत्र तावदेव प्रकटयंस्तद्व्यवहारभाग्भवति यत्र तु सर्वोपयो-
गस्तत्र सर्वं प्रकटयति तत्र सर्वज्ञो ऽभिधीयते तथा प्रकृते ऽपि ।
एवं चान्ये ऽंशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति भा-
गवतं सङ्गच्छते । कृष्णावतारे विश्वरूपदर्शनाद्यनेकशक्त्या-
विष्करणात् । अन्यत्र तथा ऽभावात् । वस्तुतस्तु सर्वेषाम-
प्यारोपितसर्वशक्तित्वाद्यनन्तकल्याणगुणाश्रितीयत्वमस्त्ये-
कत्वेन । सर्वत्र योगलक्षणौपचारिकांशत्वमपि । ये
त्वाहुः पूर्णावतारे भगवतो विग्रहान्तरं नोपलभ्यते स
पूर्णः । यत्रोपलभ्यते सों ऽश इति तेषामीशस्वरूपं किमभि-
मतमिति तु त एव प्रष्टव्याः । किं चैषां स्वस्वकार्येषु प्रवृत्ति चि-
ह्नेन रजोगुणावच्छिन्नब्रह्मरूपत्वं दैत्याद्युपसंहारलिङ्गेन रुद्रत्वं
सत्त्व पालने पर्यवसितत्वेन विष्णुत्वं च ज्ञेयम् । एतेन शुद्ध-
सत्त्वयोर्हरिहरावतारत्वयोरुक्तवाक्यस्य रामस्य क्वचि-
च्छिवावतारत्वोक्तेः कृष्णस्य क्वचिच्छिवावतारत्वोक्तेः क-
चिल्लाल्यवतारत्वोक्तेश्च विरोधो ऽपास्तः । सर्वेषां सर्वा-
वतारत्वोपपत्तेन प्रत्युत तेषां वाक्यानामनुकूलत्वात् ।
मत्स्यादेर्विष्णुत्वं प्रसिद्धं शिवत्वं तु वैष्णवे ऽभिहितम् ।
सत्योऽग्नितस्तदा ब्रह्म ह्यूर्ध्वं लोकमवेक्षत । तोयान्तः स

मह्यां ज्ञात्वा जगत्येकार्णवे प्रभुः । अनुमानात्तदुद्धारं कर्तु-
कामः प्रजापतिः । अकरोत्स्व तनुमन्यां कल्पादिषु यथा
पुरा । मत्स्यकूर्मादिकां तद्वद्वाराहं च पुरा स्थित इत्यादि ।
शिवसहस्रनामादिषु सर्वावतारनामोपलम्भात्तेषां तत्त्व-
निश्चयः । प्रवृत्त्युपसंहारयोरपि पालने पर्यवसानेनास्य
प्राधान्याद्विष्ण्ववतारत्वव्यवहारप्राचुर्यम् । यत्तु भागवते
विराजं प्रस्तुत्योक्तम् । एतन्नानावताराणां निधानं बीज-
मव्ययमिति तदपि तादर्थ्यात्ताच्छब्द्यमिति न्यायात्तत्र-
त्यविराडुपपादकत्वेनजातस्य तस्यान्तर्यामिपरत्वादुपप-
न्नम् । एते च लीलाविग्रहा अनन्ताः । नन्वीशस्य ब्रह्मा-
दिसंज्ञा अपि रामादिसंज्ञावल्लीलाविग्रहनामकृता एव
किं न स्युरिति चेन्न । चतुर्मुखादिविग्रहाणां प्रतिमहाकल्प-
भेदेनानन्त्याद्ब्रह्मादेरप्यानन्त्यापत्तेः । एतेनैक एवेश्वरस्त-
द्विग्रहावच्छिन्नो विष्णुशिवादिव्यपदेशभागिति तार्किक-
मतं निरस्तम् । एकैकस्यापि विग्रहस्य तुल्यकारणेन प्रतिकल्पं
तद्भेदेन च तेषामपि मत्स्यादिवदानन्त्यापातात् । न चेष्टा-
पत्तिः एको विष्णुरेको रुद्र इत्यादि श्रुतिविरोधात् ।
तस्मात्सत्त्वाद्यवच्छेदकृत एव विष्ण्वादिसंज्ञाभेदः । स
च तत्तद्गुणकार्यगतक्रियाप्राधान्यविवक्षया तत्तद्विग्रहा-
वच्छिन्नेऽपीशे प्रवर्तत इत्येव साधु । यत्तु के चिन्मन्यन्ते
विग्रहयोगश्रुत्यादेरुपासनापरत्वादारोपितविग्रहेणाप्यु-
पासनासिद्धेर्नेश्वरस्योक्तविग्रहसिद्धिरिति । तन्न उपासना-
परेभ्योऽप्यविरोधे देवताधिकरणन्यायात्प्रतीयमानार्थ-
सिद्धेरनिवार्यत्वात् । न चापाणिपाद इति श्रुतिविरोधो
ऽस्तीति वाच्यम् । निर्गुणश्रुतिविरोधात्सत्यकामादिगुणा-
नामप्यनभ्युपगमापत्तेः । इष्टापत्तिरिति वदतां तु सत्यका-
मादिगुणोपदेशे तद्गुण ईश्वरः प्रसिध्यतीति व्याहतिरात्रि-

ऽत्रभाष्यविरोधः । मायिका श्रुता वास्तवं निर्गुणत्वं च विघ्नन्तीति न्यायस्त्विहापि समः । यत्तु रूपोपन्यासाच्चेति सूत्रे विग्रहोपन्यासपरत्वेन तन्मध्याख्यानानन्तरं ब्रह्मणो विग्रहाभावासद्भावयोर्नवक्लृप्तं मन्यमानानामन्यथा व्याख्यानमुपन्यस्तं भाष्यकारैस्तन्मुण्डकश्रुतौ निर्विशेषब्रह्मपरोपक्रमविरोधान्न विग्रहोपन्यासः संगच्छत इत्यभिप्रायेण । उक्तञ्च तैरेवान्यत्र विग्रहसद्भावः स्यात्परोक्षस्यापीश्वरस्य मायामयं रूपं साधकानुग्रहार्थमिति । सूत्रकारेण च भोगमात्रसाम्यलिङ्गाच्चेत्यहंग्रहोपासकानां ब्रह्मणश्च भोगसाम्यं वदता स्पष्टीकृतम् । शरीरसापेक्षे वैषयिकानन्दे भोगसाम्यसिद्धेः । न च सार्वज्ञ्यादिवदज्ञानाध्यारोपिता एव देहा इति शक्यं वक्तुम् छान्दोग्ये समानप्रकरणे श्रुतोपसंहारन्यायेनोपास्यब्रह्मण उदाहृतमायर्यादिसिद्धत्वकारेण एष आत्मा ऽपहतपाप्मेत्यादिना देहित्वसाध्यात्मकत्वानां जरादीनां निषेधदर्शनात् । अन्यथा ऽप्राप्तनिषेधापत्तेः । न च देहवज्जरत्वादयो ऽपि ध्यानपरिकल्पिताः तथैवापि निरस्ताः सन्तापिता इत्यादिना तेषामनारोपितत्वावधारितविशेषगुणत्वस्फुटीकरणात् । नन्वजरत्वादि न देहत्वेनोपास्यम् एव आत्मेत्यादिना ऽनपगुणत्वोक्तेः । तद्गुणैः सत्यकामादिभिः सह पाठाच्च । यथापि श्रूयते यच्च तत्साङ्गवचमत इतिन्यायेनात्मगुणत्वसिद्धेः । तत्र तत्प्रसक्त्यभावे ऽपि स्वतः सिद्धस्य तदुपास्यतया निर्गुणप्रकरणस्थाजरत्वादिवर्णितं निर्दिश्यत इति चेन्न । सर्ववेदान्तप्रत्ययन्यायेन तत्र विशिष्टस्यैव ब्रह्मण उपास्यत्वे सिद्धे कौषितक्यात् कोऽदितो दृश्यमानोपबृंहणानुरोधाच्चाजरत्वादेर्विग्रहगुणत्वसिद्धेः । स्वकीयकल्पितैश्वैश्वर्यस्थापनादुपबृंहणानुरोधाच्चावस्थापनं न्यायः विरो-

स्वल्पश्रुताद्वेदो मामयं प्रतरिष्यति । इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत् । वेदार्थो यः स्वयं ज्ञातस्तत्राज्ञानं भवेदपि । ऋषिभिर्निश्चिते तस्मिन्का शङ्का स्यान्महात्मनामिति श्रुतेः । तथा च तस्योपरि शिवं ध्यायेत्साम्बं सर्वमनोहरम् । सर्वलक्षणसंपन्नं गाढवीक्षणरोचनमित्याद्युपबृंहणानुरोधाद्विग्रहगुणत्वेनैवान्वयो युक्तः । तथात्वेऽपि तद्द्वारा आत्मगुणत्वसम्बन्धेन तत्प्रतिपादकस्य तद्गुणैः सह पाठस्य च त्रिलोचनं नीलकण्ठमित्यादावविरोधापत्तेः । पुराणेऽर्थे संशयाभावाच्च । न च तेषामप्यर्थवादत्वं कल्प्यं पुराणेष्वर्थवादत्वं ये वदन्ति नराधमाः । तैरर्जितानि पुण्यानि तद्वदेव भवन्ति हीत्यादिभिर्निन्दास्मरणात् । तस्माद्विग्रहगुणस्याजरत्वादेः स्वरूपतो भिद्यमानत्वेन निर्दिश्योपास्यतया विधानेनारोपितत्वाद्यवसायाद्भिन्नो विग्रहस्याप्यनारोपितत्वं निश्चीयते । अतोऽङ्गीकार्या एव भाविनो महेशस्य पूर्वोक्ताः शास्त्रसिद्धाः स्त्रीपुंसाकारा विग्रहास्त्याज्या वचनानुपायिना ।

एते च विग्रहा मायामात्रस्वरूपाः मायाशरीरं ब्रह्मेति श्रुतेः । एषा माया मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसीति स्मृतेश्चेति केचित् ।

अन्ये तु तर्कादिषु स्वयं भ्रान्ति प्रमाणा ये स्वतन्त्रकः । निर्गुणस्याप्रदेहास्ते सर्वात्मानः सदा शिवा इत्यादिवाक्यादिभ्योऽस्या भिन्नं चिन्मात्रस्वरूपा एव ते माया तु दृश्यैतन्नस्य विग्रहाकारेण भाने निमित्तमित्याहुः ।

अवतारा अपीदृशा बोध्याः । ननु सत्यस्त्रस्य ईशः किमिति नरतिर्यगादिभावेन पुरुषेषु ह्रियन्तीति चेत् भ-

क्ताभिध्यानाय मनोहराणि चरितानि तत्तद्रूपैर्विधत्ते ।
तद्रूपधारणमपीशस्य सात्मेव न त्वस्मदादिवदवतारदेहेष्वपि
रपि विशेषः क्लेशहेतुरस्ति । तदुक्तं शिवरहस्ये । जगत्त्रयार्थे
त्वं नटसि ननु यामेव विभुतेति । नटसि नटवदाचरसि
भैरवाद्यैर्मत्स्याद्यैश्चावतारैर्विहरसीत्यर्थः । स्कन्दश्च कृष्णं
प्रस्तुत्याह स्कान्दे । कैवल्यं यत्परं ब्रह्म निराकारम-
गोचरम् । तच्च मूर्त्यां परिणतं भक्तानां भक्तिहेतुत
इति । अभियुक्तैश्चोक्तम् । परमिममुपदेशमाद्रियध्वं नि-
गमवनेषु नितान्तखेदखिन्नाः । विचिनुत भवनेषु व-
लानामुपनिषदर्थमुलूखले निबद्धमिति । कुब्जमपीममातुरो-
द्धारार्थमेव तदुक्तम् । मार्कण्डेये । इत्थैव किं न भवती
प्रकरोति भक्त सर्वासुरानरिषु यत्नहितोपि शक्तम् ।
लोकान्नयान्तु रिपवोपि हि शस्त्रपूता इत्थं मतिर्भवति ते-
ष्वहितेषु साध्वीति । न च युद्धं तस्य क्लेशावहं किंतु क्री-
डैव लोहदेहस्तु वाज्रत्वं प्राङ्निवेदितं हरिवंशे च निकुम्भ-
परिघप्रहारान्मूर्छित इव कृष्णे ऽभिहितं नूनमात्मेच्छया
कृष्णस्तथा चक्रे कुरोत्तमः । को हि शक्तो महात्मानं युद्धे
मोहयितुं हरिमिति । न चात्र त्वन्मुखाभेच्छया नूनं पद्यै-
र्वैरायते सखीत्वनेव मूर्छितमित्युत्प्रेक्षायामिति भणितव्यम् ।
नैतु भक्त्या कृता नूनं तपोवृद्धिः प्रजायतइत्यत्रैव
निश्चयार्थत्वात् । किं येगमायाया अचिन्त्यत्वेनातर्क्यत्वा-
त्तस्याभि चरितान्यप्यतर्क्याणि । नैषा तर्केण मतिराप-
नेयेति श्रुतेः । अचिन्त्याः खलु ये भावा न तांस्तर्केण योज-
येदिति वृद्धोक्तेश्च । तस्मादतर्क्ये ऽर्थे शास्त्रेणैव निर्णयः
शास्त्राच्चैकमेवाद्वितीयं ब्रह्म स्वमायया हरिहराकारै रामा-
द्याकारैर्मत्स्यभैरवाद्याकारैश्च प्रतीयत इति निश्चीयते ।
अतो ऽयमेवार्थः ग्राह्य आस्तिकैः ।

ननु हरिहरयोरैकात्म्यपरत्वं चेत्तर्हि तत्तन्माहात्म्यपरपुराणादिष्वितरनिन्दा न स्यात् दृश्यते च सा तथा च तदन्यथानुपपत्त्या साम्यमपि दुर्लभम् ऐक्यस्य तु का कथा ततश्च पतन्तमनुधावतो गदो ऽपि गत इति न्यायापात इति चेदत्र के चिदाहुः । स्थालीपुलाकन्यायाद्वैष्णवद्विनः कोपोत्पादाय तदिष्टदेवस्यान्यपरपुराणेष्वपकर्षवर्णनमिति ।

परे तु प्रागुक्तपर्यायत्वमाश्रित्य कल्पभेदेन स्वेच्छया वाक्याज्जनानिर्मितत्वं क चित्तूत्कर्षापकर्षवर्णनमित्याहुः ।

न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते अपि तु विधेयं स्तोतुमिति न्यायाद्विधेयं हि स्तूयते वक्ष्यतीति न्यायमालम्ब्य तानिग्रहापच्छिद्रोक्षण्यादिस्तुत्यै तदन्यनिग्रहापच्छिद्रापकर्षवर्णनम् । तत्र यस्मात् शब्द इति न्यायात्स्तुतिपरत्वेन न स्वान्यनिन्दापरत्वमपि फलाभावात् उभयपरत्वे वाक्यभेदापत्तेश्च । अन्यत्रापि ह्येवं दृश्यते तद्यथा सर्वशाखाप्रत्ययमेकं कर्मेति न्यायान्नानाशाखाविहितमप्यग्निहोत्रं न भिद्यते इति स्थिते के चिदुदिते जुहोतीति श्रुतिमाश्रित्योदिते ऽग्निहोत्रं कुर्वन्ति के चिदनुदिते जुहोतीति श्रुतिमवलम्ब्यानुदिते जुहोति तत्र ये प्रातरुदिते जुहोति ते यथातु खलु वा आदित्य आहवनीयेन रश्मीन्संदधातीत्युपक्रम्य प्रातःप्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति ये ऽग्निहोत्रम् । दिवाकीर्त्यमदिवाकीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषामित्यनुदितहोमं निन्दन्ति । ये त्वनुदये जुहति ते आदित्यो वा अस्तं यन्नग्निमनु प्रविशतीति श्रुतिमुपजीव्य यदुदिते सूर्ये प्रातर्जुहुयाद्यथा ऽतिथये प्रद्रुताय शून्यायावसथायाहार्यं हरन्ति तादृगेव तदित्युदित-

होमं निन्दन्ति । अनयोः स्वार्थतात्पर्यकल्पने रागप्राप्तसुरा-
पानादिवत्कालद्वयेऽपि स्यात्तस्य वैधिको होमस्यैव बाधः
स्यात्तथा च यावज्जीवमग्निहोत्रं जुहुयादित्यादयश्चोदना
उपरुध्येरन् । एवं च कालभेदेनाग्निहोत्रमिव गुणभेदेन
विग्रहभेदेन वा भेदो भिद्यते । ततश्च च एकस्मिन्नपि गुणा-
दिभेदेन भेदं प्रकल्प्यैकविग्रहावच्छिन्नमुपासीनो ऽन्यं
निन्दति स ईशविष्णुः स्वाभिन्नापकारकमेतीति ध्येयम् ।
तस्मादेतावता सर्वविग्रहावच्छिन्नैकत्वविचारः शास्त्र
इत्यन्ये ।

स्कन्दादेर्बहुषु पुराणादिषु शंकरस्योत्कर्षः कथमीशत्व-
मिति चेत्तर्हि तेषां चैतन्यदीप्ता ब्रह्मविष्णुशिवरूपिणीत्या-
दिश्रुतौ शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवादिका इत्या-
दिपुराणे च ब्रह्मादीनामपि शक्तित्वोक्तेरीशत्वं न स्यात् ।
तेषामीशत्वबोधकवाक्यानामवास्तवत्वमिति चेत्तदत्रापि तुल्यमिति
न चर्वं चर्वुंयोग्याः । यश्चोभयोः समो दोषः परिहारो ऽपि
वा समः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारण इति न्या-
यात् । तथा च चित्प्राधान्यविवक्षायामीशत्वस्य उपा-
धिप्राधान्यविवक्षायां शक्तित्वस्य उपाधेर्भिन्नत्वेनात्य-
न्तोपेक्षायां शुद्धचिन्मात्रस्य च व्यपदेशः सर्वत्र समः ।
तस्मान्न मनागपि भेदलेशावकाशः । येषां तु धीमान्द्यात्कूपे
पयः कूपकांक्षो ऽप्यभेदे न बुद्धिमारोहति तैस्तूपवासाद्वरं
भिक्षेतिन्यायेन भेदबुद्ध्या ऽपि स्वप्रेमास्पदविग्रहावच्छि-
न्नेशाराधनं कार्यं तत्प्रसादान्मोक्षोदये शाखिसखो भेदप्र-
क्षालनन्यायेन त्याज्या भेदधीः । भेदधिया तस्यापि किं
चित्पापं स्यादविद्याश्रयत्वादिति चेत्तर्हि तदपि कूपखा-
नकन्यायेनेशभक्तिजसुकृतैर्नाश्यते ।

भेददर्शिनिन्दा ये दुराग्रहेण तां न त्यजन्ति
ऽपास्तभेदधियो ऽपि यथान्तरीयप्रायश्चित्ता-
नादावेव प्रवर्त्तन्ते ते तु न निन्द्या अनेकमू-
लपापकर्तुमशक्यत्वात् कालभेदेनानुष्ठाने चि-
रो । अन्यत्र प्रवृत्तस्य जन्मान्तरीयध्यानावि-
ष्टिप्रयत्नस्य निश्चगामित्वादन्यायेनान्यत्र गमने
ऽस्व । यथा ऽऽह श्रीहरिः पूर्वाभ्यासेन तेनैव ह्रियते
ह्य ऽपि सः इति । न चैवं भेदबुद्ध्यनुवृत्तिरपि स्यात्
अनन्तरायासादिनत्वाद्दैवेशिकपूर्वकाभेदधिया तन्नि-
वृत्तेः । प्रत्यगभिन्नकृष्णो सत्यां तु तते पश्चादपि
न्यायेनैतद्रूपस्याप्यपवर्गाविरोधः । एकाभिप्रायविषयत्वनि-
यमे ऽपि प्रायश्चित्तादेव वाक्शुद्धिं तु पञ्चाशप्रभृतिविधि-
सामर्थ्यात्सर्वविषयं कार्यम् । यस्त्वनेकजन्मार्जितपापपुञ्ज-
जन्यदुराग्रहादेकभक्तिच्छलेनान्यं निन्दति प्रसंगतोऽन्य-
भागो ऽपि चतुर्मार्गेणाभेदं नेच्छति आक्षिपति च मन्त्रान् स
वादेषु यत्नस्तादृशो वक्तिरिति न्यायात्सम्प्रतिपादितेऽत्म-
दीपकदर्पविपरीतात्मवैपर्यपपादनेन विजित्य पश्चात्प्र-
गीकारीत्या ऽऽत्यन्ताभेदोपपादनेन बोधनीयः । एवं हि
स मारणाय ग्रहीतो ऽङ्गच्छेदं स्वीकरोतीति न्यायेनाभेदं
स्वीकरिष्यति । स्वयं तु शिष्टैर्हरिहरादिभेदधीः सर्व-
सेव व्यपायी इत्येतत्त्याज्या ये तु दुराग्रहात्तां न त्यजन्ति
ते नास्तिका एवेति दिक् ॥

श्रुतिस्मृतिपुराणादिसिद्धाभेदापलापिनः ।
ये ते वेदास्तिकास्तर्हि नास्तिका वद कीदृशाः ॥

आनन्दाद्भुतसागरे सुमनसां ध्यानादिकल्पोद्भवः
भेदाख्यो हि हिमांशुराविरभवत्तुष्यौ वररिजवन्न ।

स्पर्शैरिन्द्रियैस्तत्संबन्धात्तान्तत्व
न्यन्ये तेन सुखाम्बुधिर्विजयते संभाव्य स्

एकमेवाद्वितीयं, नेह नाना ऽस्ति कि ह्येव एतस्मिन्नुदरमन्तरं कुरुते ऽथ तस्य भयं भ त्यादौ भयं भवति, मृत्योः स मृत्युमाप्नोति य पश्यतीत्यादिश्रुतयस्तु जीवेश्वरयोर्जीवानां च परस्प- रमात्मनोरनात्मनां चान्योन्यभेदमपि वास्तवं न स नानेवेतीवशब्देन यो व्यावहारिकमपि नानात्वं पश्य- सो ऽप्यनर्थादनर्थान्तरमेति चेत्तर्हि वास्तवं तं पश्यन् कथेति सूचितम् । तस्मात्तुच्छमेव प्रपञ्चम् । तुच्छत्वबोध- श्चैताभिः श्रुतिभिरेव भवति तदुक्तं तुच्छा ऽनिर्वचनीया च वास्तवी चेत्यसौ त्रिधा । ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैरिति । परं तु वास्तवनानात्वभ्रम- निरासाय सोपानारोहणन्यायस्तुच्छत्वबोधोदयाय च तदनिर्वचनीयत्वबोधकत्वमपि अभ्युपेयाः । न हि श्रुत्या ऽपि सकृदेव तुच्छत्वं बोधयितुं शक्यं जातो ऽपि वा बोधो न स्थिरीभवति अन्यथा मननविध्यानर्थक्यापत्तेः ।

नन्वेकमेवाद्वितीयमिति कथमद्वैतं बोधयति यदि ह्येकमेव तदद्वितीयं यदद्वितीयं तदेकमेव वा बोध्येताऽ- यथा ऽप्रमाणमिदं वाक्यं स्यात् यदि यदद्वैतं तदद्विती- यमिति कल्पने तु मातापि वन्ध्येतिवत् केवलं वक्तुरज्ञा- पादकमिदं वाक्यं स्यात् । उच्यते कार्यस्य हि नैतस्य कार- णसत्तैव सत्ता । कारणं चास्य ब्रह्मैव तदेवेति पूर्ववाक्येन तथा ऽवधारणात् । वाक्यशेषेण च कारणस्य ब्रह्मणः सजा- तीयादिभेदनिरासेनाखण्डैकरसत्वं बोध्यते । नन्वेकाद्विती प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायेन प्रतिबध

मायावादैर्न साधयितुं मानमिति भेदवादिनो हि
दमपि न घटन्ते ऽन्यस्य का कथा । तद्भेदे ऽपि
ति येनाहमीश्वर इति प्रत्यक्षमित्यपि । नचेदं
अबाधात् अहमीश्वर इति प्रत्ययानुपलब्धेः माना-
नुपजीवकत्वेन बाधकत्वायोगादिति चेन्न । न ह्यात्म-
भेदप्रत्यक्षं सम्भवति हेत्वभावात् न हि बहिरिन्द्रियं
हेतुः रूपादिरहितेश्वरभेदे ऽसमर्थत्वात्तस्य तद्ग्रहणे ऽस्व-
र्थत्वात् । नापि मनः । तस्य प्रमाणसहकारित्वेनालो-
कादिवदप्रमाणत्वात् । न च परात्मभेदविते क्षणिककार्यजनके
ऽपि मनसि मानमप्यस्ति सर्वेन्द्रियेषु तत्तद्विषयसंपर्केषु
युगपदनेकबोधोदयस्य केषु चिन्नैवाविच्छिन्नानुभूयमानतया
तदनुत्पत्तिलक्षणलिङ्गस्यासिद्धेः । शतपत्रपत्रशतभेदन्यायेन
क्रमे सत्यप्यतिसूक्ष्मकालभेदस्य दुरवगाहतया तत्र यौग-
पद्यप्रत्ययो भ्रम इति चेन्न बाधाभावात् । किञ्च प्रत्यक्षेणो-
पलब्धुं योग्यस्य प्रतियोगिनो ऽनुपलम्भो योग्यानुपल-
म्भः सो ऽभावरूपभेदग्राहकेन्द्रियस्य सहकारी वाच्यः ।
स च मनसेशभेदग्रहे न संभवति तत्प्रतियोगिन ईशस्य
प्रत्यक्षायोग्यत्वात् । न च योग्यत्वमनुपलब्धेरेव विशेषणं
तथानुपलब्धेस्तु ग्राह्याभावप्रतियोगितद्व्याप्येतरसकला-
नुपलम्भककालिकत्वमेवेति वाच्यम् । प्रतियोगिप्रत्यक्ष-
जनकस्य तदनुपलम्भकपदाभिधेयस्यासमस्तस्याभावग्र-
हणहेतुत्वापत्त्या रूढदोषानिस्तारेण घट्टकुटीप्रभातन्याया-
पत्तेः । ननु यत्र यत्सत्त्वमनुपलम्भाविरोधि तत्र तदभावः
प्रत्यक्षः तत्र स्तम्भे पिशाचाभेदसत्त्वे स्तम्भाभेदवत्तस्या-
प्युपलम्भापत्त्या ऽनुपलम्भविरोधित्वात्तदभावरूपः पि-
शाचभेदः स्तम्भः पिशाचो न भवतीति यथा स्तम्भे प्रत्यक्ष-
स्तथा जीवे ब्रह्माभेदसत्त्वे जीवाभेदवदनुपलम्भायोगात्तस्य

तदभावरूपो भ्रमभेदः प्रत्यक्ष इति चेत् । साक्षाद्वि-
रोधित्वं हि प्रतियोगिन एव अन्यस्य तु तद्-
व्याप्तिः । तथा च प्रतियोगिसत्त्वस्यानुपलम्भे
तत्प्रतियोग्युपलम्भस्याप्यभावेनैवेति वक्तव्यम् ।
न च प्रतियोगिसत्त्वस्याभावस्यैवोपलम्भाच्च
तस्यानुपलम्भविरोधित्वायोगात् यत्र यत्सत्त्वमित्य-
वहिता ऽभावाधिकरण एव प्रतियोगिसत्त्वं तदुपलम्भ-
प्रसक्त्याः । तत्र भावाद्यभीलसत्त्व इति सर्वात्मना कल्प्य-
करणमिति न्यायाशयः । यन्मनसा न मनुत इत्यादि-
निषिद्धं चात्मनो मनोविषयत्वम् । औपनिषदत्वविशे-
षणेनापि आत्मनो मनोगम्यत्वं निषिध्यते सर्वं विशेषणं
सावधारणमिति न्यायात् । यद्यपि यतो वाचो निवर्त-
न्त इत्यादिश्रुतेर्न शब्दगम्यं ब्रह्म तथा ऽप्यौपनिषदत्वश्रुते-
र्वेदान्तप्रमाणकं तदिति निश्चीयते प्रमाणकृत्यं च तदज्ञ-
ाननिवृत्तिरेव ज्ञानविषयतार्थावभासिः स्वप्रकाशत्वात् ।
अखण्डार्थश्च जीवेशाभेदविषयकतत्त्वमस्यादिवाक्यजबो-
धेन । तत्र हि तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते तच्च
प्रकारान्तरेणासम्भवात् लक्षणया प्रत्यगभिन्ने वाक्यपर्यव-
सानं गमयति । तथा हि न तावन्नैल्यदैर्घ्याभिधेयतिवदुभ-
योरेकार्थाभिधानेन सामानाधिकरण्यं भिन्नार्थवाचकत्वा-
त् । नाप्यजहत्स्वार्थयोर्विशेषणविशेष्यभावेन नीलमुत्प-
लमितिवदुच्यते विरुद्धार्थयोस्तदयोगात् । न वा जहत्स्वा-
र्थत्वेन संबन्धे लक्षणया कुक्षिमिनुमा गङ्गेतिवदनुपपत्तिः ।
एकार्थत्वस्य विवक्षितत्वात् । अतो जहदजहल्लक्षणया
विरुद्धांशत्यागेनाखण्डचिदंशोपादानेन चैतन्य पर्यवसा-
नम् । लक्षणा च न पदमात्रवृत्तिः किं तु वाक्यवृत्तिरपि
यथा गम्भीरायां नद्यां घोष इत्यत्र पदद्वयस्य तीरे लक्षणा

ेन गङ्गाप्यते तत्संबन्धो लक्षणा शक्तिज्ञापकश्च ैस्तथा वाक्यार्थो ऽपीति न का चिदनुपपत्तिः । ऽयपेक्षितमाहात्म्यप्रत्यायकतया ऽर्थवादपदानां तया विधिवाक्यैकवाक्यता भवतीत्येवमाद ं पदैकवाक्यता । यत्र तु प्रत्येकं भिन्नभिन्नसं ादकयोर्वाक्ययोराकाङ्क्षावशेन महावाक्यार्थबोध न मणिप्रदृश्वरथन्यायेनान्योन्याकाङ्क्षिताङ्गाङ्गिभा वबोधकतया वाक्यैकवाक्यता यथा दर्शपूर्णमासाभ्यामि ः समिधो यजतीत्यादेश्च । तदुक्तं भट्टपादैः । स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया । वाक्यानामेकवाक्यत्वं पुनः संहत्य जायतइति । प्रकृतमनुसरामः ।

तस्माद्वाक्ये ऽपि लक्षणासंभवादद्वैतवादिनां लक्षणया निर्विशेषब्रह्मप्रतिपादकत्वान्न श्रुतिविरोधः । यत्त्वत्र न लक्षणादिकं सम्भवति शब्दवृत्तिसिद्धान्तस्य । भास्करीय इत्यनुभवस्य विधावृत्तिरूपो भ्रम एव सविशेषयो हि वर्त्तमानौ विधिनिषेधौ सति विशेष्यबाधे विशेषणमुपसंक्रामत इति न्यायेनोपाधिभेदविषयो बोध्यः विशेष्यांशे च श्रौतो बाध उक्त एव । न चानुभवेन श्रुतेर्बाधः शक्यः श्रुतेर्निरवकाशत्वात् निरवकाशस्य च सावकाशनिरवकाशयोर्निरवकाशो बलीयानिति न्यायाद्बाधकत्वोपपत्तेः । ननु जीवेशयोः क्व विच्छेदः क्व भिन्नाभेदो निर्दिश्यते । यथा घु घटभेद एवं गृह्येत तदा भेदनिर्देशो निरालम्बनः स्यात् न चैतद्युक्तम् । तस्मादहिकुण्डलन्यायेन जीवेशभेदश्रुतौ भवोत्तात्त्विकत्वमुपेत्यैव ऽभावोभेदे यद्वैकस्याहेरहित्वेनाभेदस्तस्यैव कुण्डलावस्थस्य भंगुरत्वागमस्या ऽभेदश्च तात्त्विकः । एवं ब्रह्मणो ऽपि चैतन्यरूपेणाभेदः जीवत्वेश्वरत्वरूपेण भेदश्च तात्त्विक इति । यद्वा जीवचैतन्यमीशचैतन्यं च वस्तु

ते भिन्नमेवास्तु अभेदनिर्देशस्तु प्रकाशाश्रयन्याये न्यक्षुण्णत्वसाजात्येन प्रयुज्यः । यथा रवेस्तदाग्नि द्रव्यस्य च सत्यपि भेदे तेजस्त्वरूपसाजात्येन इति चेत्। तात्त्विकभेदावलम्बिनोः पक्षयोः श्रुत बलत्वात् । भेदश्रुतिस्त्वतात्त्विकभेदेनाप्युपपद्यते । एते भेदे प्रमाणत्वं निरस्तम् । अत एवार्थापत्तिरपि सा नम् । तात्त्विकभेदादृते ऽनुपपन्नार्थाभावात् विरुद्ध कान्तस्यैकतोऽस्तु भेदसिद्धेः प्रागसिद्धिरेव । ननु श्रुतित्व-साम्ये ऽद्वैतश्रुतेरेव कुतः प्राबल्यमिति चेत्तात्पर्यवत्त्व-त्वादेव हि । तदपि कुत इति चेदुपक्रमोपसंहारावभ्यासो ऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये इत्यभियुक्तप्रसिद्धतात्पर्यलिङ्गैरिति गृहाण । तत्र सदेवेत्यु-पक्रम्यैतदात्म्यमिदं सर्वमित्युपसंहरति इत्युपक्रमोपसंहा-रैकरूप्यं तात्पर्यलिङ्गम् । तथा तत्त्वमसीति नवकृत्वो ऽभ्यासः । रूपादिहीनाद्वितीयब्रह्मणः परिनिष्ठितरूपत्वे ऽपि मानान्तरायोग्यत्वादपूर्वत्वमुक्तम् । अत्र याव किल सन्तोऽयं न निभालयत्विति संपाते स्थितं मत्यज्ञा न जानातीत्यर्थः तस्य तावदेव चिरमित्यादि ब्रह्मभावफल-मुक्तम् । अनेन जीवेनात्मनेत्याद्यद्वितीयब्रह्मार्थो ऽर्थ-वादः । मृदादिदृष्टान्तैः प्रकृत्यतिरेकेण विकारो नास्ती-त्युपपत्तिरुक्ता एवं षड्विधानि तात्पर्यलिङ्गानि व्यस्तानि समस्तानि च प्रतिवेदान्तं दृश्यन्ते ॥

ननु द्वा सुपर्णेत्यादि भेदे ऽप्यस्ति मानम् उपक्रमा-दयो ऽपि तत्र सन्तीति कथमभेद एव तात्पर्यम् । तथा हि । द्वा सुपर्णेत्युपक्रमः परमं साम्यमुपैतीत्युपसंहारः तयोरन्यः अनश्नन्नन्यः अन्यमीशमित्यभ्यासः ईश्वरस्यापूर्व-त्वात्सर्वेशो ऽप्यपूर्वः पुण्यपापे विधूयेति फलम् अस्य

सन्निधानमित्यर्थवादः । अनन्यसिद्ध्युपपत्तिः । अत्र द्वित्वं साम्यं च भेदव्याप्यम् अभ्यासे तु कर्मभेद एव भेद इति । उच्यते कश्चित्तु भगवो विज्ञात इति परमोपक्रमे ऽभेदस्यैव प्रक्रान्तत्वादाद्यस्योपक्रमः । नापि द्वित्वं भेदव्याप्यं राम-णावित्यादौ तथा ऽनुपगमात् । परममिति विशेषणा-दुपसंहारे ऽपि न भेदपरः अभ्यासस्तत्त्वमसीत्यभेदपरः । ईशो ऽपि सामान्यतो ऽनुमितो भेदप्रतियोगीति नापूर्वो ऽस्य भेदः । फलार्थवादौ त्वस्माकमपि न प्रतिकूलाविति भेदे तात्पर्यलिङ्गाभावाच्च भेदे वेदतात्पर्यम् । अस्ति चाभेदे तत्सत्त्वात् । तथा चोपपन्नमभेदश्रुतेः प्राबल्यम् । पूर्वकाण्डस्यापि परम्परया ब्रह्मपरत्वं स्वर्गादिफलश्रवणं तदध्ययनत्वादिप्रदर्शनं च गुडजिह्विकान्यायेनाज्ञबोधार्थं यत्कृतकं तदनित्यमितिन्यायेनानित्ये तत्र श्रुतितात्पर्या-योगादित्यलं विस्तरैः ।

जीवानामन्योन्यतात्त्विकभेदं एकैकेनाभेदासम्भ-वादेवासम्भेदः । सुखदुःखादिव्यवस्था तु कल्पितभेदे-नाप्युपपद्यते । प्रत्युत बिम्बैकात्म्यवादेव तदनुपपत्तिः । एतच्चोष्ट्रलगुडन्याये स्पष्टीभविष्यतीत्युपरम्यते । अनात्म-तामपि चिदात्मनि रज्जौ सर्पादिवत्कल्पितत्वेन न ततो भिन्नत्वं संभवति । तन्त्रेणापि नाद्वैतसिद्धिः । अन्योन्या-नात्मभेदस्य न हि दृष्टे ऽनुपपन्नं नामेति न्यायेन जागरूक-त्वात् तथा च भाविते ऽपि लशुने न शान्तो व्याधिरिति न्यायापात इति चेन्न दृष्टत्वस्यासिद्धेः । इत्थमेव सर्व-भिन्नो घट इति चेन्न न हि घटे सर्वभेदप्रत्यक्षं संभवति भेद-ग्रहे प्रतियोगिग्रहस्य हेतुत्वात् सर्वस्य चासर्वज्ञेन ज्ञातुम-शक्यत्वात् । ततश्च सर्वभिन्नो घट इति प्रत्यक्षं भ्रमः अनुमानादेस्तु पूर्वोक्तैव गतिरित्येकस्यैव ब्रह्मणो स्थूल-

दैन्यायेनाज्ञातस्य कण्ठाकारेण भावाभावैकतुल्यनिर्मान-न्तरविरुद्धा ज्ञानस्य च निर्विशेषत्वेन आत्मत्व कण्ठोपम-यत्वमवयवमपि सिद्धमिति संक्षेपः।

एवं हि सर्वदोषसमाधानात्सापसिद्धान्तो न च प्रकृतन्यायोदाहरणासंगतिः ये ऽपीश्वरे केवलनिमित्तका-रणत्ववादिनो न तैरपि विरोधः। उभयविधकारणत्व-वति केवलनिमित्तस्यस्यापि सत्त्वात्। न च केवलनिमि-त्तत्वं नामोपादानस्याभावसमानाधिकरणनिमित्तत्वं तच्च त्वदभिमतईश्वरे नास्ति तथा च विरोध इति वाच्यम्। ब्रह्मणु-पादानत्वस्य कल्पितत्वाङ्गीकारेण वास्तवतदभावस्यापि सत्त्वात् तस्यास्तत्त्वं निरवद्यम्। इति कूपकल्पन-न्यायः ८। ४५।

अथान्याः प्रासङ्गिकास्तत्सङ्गताश्च लिख्यन्ते। क्रिया हि विकल्प्यते न वस्त्विति न्या० ५। ४६।

यः कारयति स करोत्येवेति न्या०। राजादिर्हि भृत्यैर्युद्धादिकं कारयन्स्वयमपि करोतीति प्रसिद्धम्। ४७।

ज्ञानादेर्निष्कर्षोत्कर्षौ ऽप्यङ्गीकार्यौ बाधकाभावा-दिति न्या०। यथा ज्ञानापकर्षावसानभूमित्वं स्थावराणां तथा तदुत्कर्षावसानभूमित्वमीश्वरस्येत्यङ्गीकार्यं तत्रोत्कृ-ष्टत्वं ज्ञानस्य सर्वविषयत्वमेवेति भावः ३। ४८।

काकतालीयन्या०। अत्र, काकतालशब्दौ समास-विषये काकतालसमवेतक्रियावर्त्तिनौ। तेन काकागमन-मिव तालपतनमिव काकतालमिति समासात्तद्धिता-दिति ज्ञापकादिवार्थे समासः। इवार्थे समासाभावे तद्धि-तस्यादित्यनेनेवार्थविषयसमासानुवादस्याद्युपपत्तेरर्था-ज्ज्ञापकत्वम्। तत्र काकागमनमुपमेयं विधेः क्व निदर्शनं

तालपतनं तु तत्रैव दैवेच्छयाभवत्। तेन च काकतालसमु-
पेतक्रियापदयोः काकतालपदयोरिवार्थे समासेन विधेर्दै-
वैश्च समागमः काकतालसमागमसदृश इति फलति।
काकागमनतालपतनयोरुपमानत्वे तदुपमेययोर्विचित्रगमन-
दुर्वचस्थानयोः पृथगुपमा तत्त्वेनान्वयायोगात् काकतालस-
मागम एवोपमानम्। एवं च काकतालसमागमसदृशं
काकतालमिव काकतालीयमिति द्वितीयमिवार्थे समा-
साच्च छ इति सूत्रेण इवे प्रतिकृतौ विध्यधिकारस्थेन
छप्रत्ययः। तत्र प्रकृतिविकृत्योः समागमानन्तरं जाते घाति-
प्रतिघातादिभावः काकतालफलयोरिव कृमिमृगभावसदृश
इत्यर्थः। न च सकृदुच्चरिताभ्यां काकतालपदाभ्यां कथमु-
पमाद्वयावबोध इति वाच्यम्। अनुभवानुसारेणावृत्त्यनेन
व्युत्पत्तिवैचित्र्यस्य स्फुटप्रतिपत्तेरिति।

अजाकृपाणीयन्यायोऽप्येवम्। अत्रापि ह्यजाकृपाण-
पदाभ्यां तदागमनपतने तदर्थे एवमन्यदपि सर्वं तुल्य-
मेव। एतावांस्तु विशेषः। यत्रासौ ऽविकिंशुकारे ऽभि-
मुखार्थे यानतरति अकस्मान्महाफलस्याधो पतने काकस्य
भोगलाभवदिहरसि पतने मरणस्यापि सम्भवात् अर्थं
स्वकस्याल्पेतव्याविशुद्धयासौ प्रवर्त्तत इति। ५। ५०।

न हि भिक्षुको भिक्षुकमिति न्यायः स्पष्टः। ६। ५१।

योजनप्राप्त्यायां कावेर्यां मज्जनन्याय०।

कावेर्योरभ्यायां नद्यां योजनैव योजनचलनेन प्राप्त्या-
यां मज्जनस्य दैवस्येव प्रभवनं यथा न युज्यते तथा प्रकृते-
ऽपीत्यर्थः। केचित् महो वाङ्गुरुरुज्ज्वलत्वदयोरचिन्त-
कलशां नदीं मज्जनं मज्जनं तथथा योजनप्राप्त्यायां
तथ्याभ्युक्तं तथेत्यन्ये। ७। ५२।

अपवादापेक्षितानपेक्षितयोरिति न्या० । ८ । ५३ ।

कृताकृतप्रसङ्गी यो विधिः स नित्य इति न्या० । यथा रन्धयतीत्यत्र रधिजभोरचीति नुम्विधिरत उपधाया इति वृद्धौ कृतायामकृतायां च प्रसक्तिरथो नित्यत्वेन बलीयस्त्वात्प्रवृत्तिर्विधेयोपधकत्वात् नत्वेधाराधनविधिरन्या- राधनविधेर्बाधक इति नागेशपदानामभिमानः । ९ । ५४ ।

अनधीते महाभाष्ये इति न्या० । १० । ५५ ।

एकफलाकाङ्क्षया तदाराधनजन्यदपि फलं प्रयच्छतीति विवक्षायां तु फलवत्सहकारन्यायः यथा सहकारः आम्रभेदो रसालो ऽसौ सहकारो ऽतिसौरभ्यमुकुलविधानादतिसौरभ आम्रवृक्षो ऽतिमधुरपक्वफलनमितशाखः स्वमुपसन्नाय छायार्थिने जनाय फलं परिमलं चाप्रार्थितमपि ददाति तथा प्रकृते ऽपीत्यर्थः । ११ । ५६ ।

तदसिद्धाभिमतस्य तदभिमतत्वमिति न्या० । १२ । ५७ ।

लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्या० । १३ । ५८ ।

केवलज्ञानेनार्थसिद्धिविवक्षायां ज्ञानाधीना मेयसिद्धिरिति न्यायः प्रवर्तते । १४ । ५९ ।

यष्टिवाहस्तमङ्गीतगालमिति न्या० के चित्तु प्रागुदाहृतं घरघट्टीन्यायमेतदर्थकत्वेन व्याचक्षते । १५ । ६० ।

अन्धगजन्या० अन्धैर्निर्धारितो गजो ऽन्धगजस्तद्न्याय इति मध्यमपदलोपिगर्भः षष्ठीतत्पुरुषः । यथा हि लोके श्रूयते जन्मान्धा बहवः कं चिद्वनस्थं कुशलकुञ्जरकारं गजं दर्शयेति । स च गजशालायां नीत्वा तं तं गजावयवं तेन तेन ग्राहयित्वा बोधयामास गज इति । ते च तं तत्तदवयवमेव गजत्वेन निश्चित्य स्वस्थानमागताः परस्परं कलहं चक्रुः । शूर्पसदृशो गज इति कर्णस्पर्शी । अन्या-

सर्पसदृश इति शुण्डाग्राही । स्तम्भतुल्य इति जङ्घाग्र-हीता । पुच्छग्राहकस्तु स्थूलरज्जुसमो गज इत्युवाचेति । तथा यथाऽऽत्मप्रायानभिज्ञा वादिनो ऽपि स्वस्वेष्टदेवता-माहात्म्यबोधकानि वाक्यानि पश्यन्त इतराणि तु पश्यन्तो ऽप्यपश्यन्त इव सर्वमाहात्म्यबोधकवाक्यानैकवाक्यतां चा-जानन्तो ऽन्योन्यं विवदन्त इत्यर्थः । एवमेव स्थूलारुन्धती-न्याये प्रदर्शितान्याकया आम्नायानाश्रित्य तत्तात्पर्यानभिज्ञा-आर्चीकादयो माध्यमिकान्तास्स्वंपदार्थेविषये विवदन्त इति बोध्यम् । १३ । ६१ ।

कूपमण्डूकन्या० । समुद्रमण्डूकः कथं चित्सरित्स-मीपस्थकूपे प्रविष्टस्तं दृष्ट्वा कूपमण्डूकवर्यो ऽयं चरो ऽय-मिति ज्ञात्वा पप्रच्छ कुत आगतो भवानिति । समु-द्रादिति वचनं श्रुत्वा कियान्स इति पृष्टवान् महानिति तेन प्रत्युक्तः । स्वजङ्घां प्रसार्य किमेतावानित्युवाच । न हि महत्तमः स इति प्रतिवचनमाकर्ण्य द्वितीयजङ्घां प्रसार्य तर्ह्येतावान्भविष्यतीत्युवाच पुनरपि तेन निराकृ-तस्तृतीयां तुरीयां जङ्घां प्रसार्योत्प्लुत्य च क्रमेण प्रादेश-वितस्तिहस्तपरिमितं देशं किमेतावानिति पृच्छंस्तेन निर-स्तस्तर्हि कूपसदृशो भविष्यतीत्युवाच । कूपो ऽपि भ्रा-तर्नास्ति तत्तुल्यो ऽन्यः स हि सरितां पतिरनवगाहगा-म्भीर्यो ऽपारपारावारो ऽतीव महत्तम इति तेन प्रत्युक्त-स्तर्हि नास्त्येव स यः कूपादपि महान् त्वं तु मिथ्यैव प्रल-पसीति तं निराचक्रे । स च स्वमनसि तं धिक्कृतवानिति गाथा लोके गीयते तथा च यथा ऽसौ निधिमज्ञात्वा निराकुर्व-न्कूपमण्डूक उपहास्यतां प्राप्तस्तथा ऽन्यमतानभिज्ञस्स्वकू-पक्षपर उपहासास्पदीभवतीति न्यायसङ्गतिः । १७ । ६२ ।

०मत्तविद्याभिमानी मूढो न सहते वाञ्छमपि

लभते उपहसनीयश्च भवतीति विवक्षायां चतुर्वेदविप्रन्यायो ऽवतरति । यथा गोहिरण्यादिरूपं बहुधनं चतुर्वेदविदे देयमस्तीति कस्य चिद्दातुर्वचनं श्रुत्वा मूर्खः कश्चिद्ब्राह्मण्याह इत्यहं जाने मह्यमिदं देयमिति वदन् तद्वदेव उपहास्यतां च प्राप्तस्तथा यः सच्चिदानन्दरूपं प्रत्यगभिन्नं ब्रह्मेत्यादिशब्दाभिज्ञस्तदर्थानभिज्ञो वा तत्त्ववित्त्वाभिमानेन तद्वृत्तिमिच्छति न स तामेति उपहसनीयश्च भवतीति ज्ञेयम् । १८ । ६२ ।

नृपनापितपुत्रन्याय० । इत्थं हि लौकिकी गाथा कस्य चिन्नृपस्य भृत्यो नापितः कश्चित्प्रातः सर्वं पुरमन्विष्यानीय एको बालो मे दर्शनाय त्वयाऽऽनेय इति नृपेणाज्ञप्तः प्रातरुत्थाय निखिलपुरमन्विष्य दृष्ट्वा ऽपि च तत्र तत्रातिरूपान्बालान्स्वपुत्रतुल्यानमत्वा तमेव राजवेश्मनि नीत्वा राज्ञे निवेदयामास स्वामिन्नानीतो ऽयं रूपवान्मे बाल इति । राजा च तत्पुत्रमत्यन्तकाष्ठाङ्गाराभं काणं खल्वाटं कुब्जं ह्रस्वबाहुजङ्घं स्थूललम्बोदरं दृष्ट्वोपहासमयं खलः कुतश्चानायीति मत्वा कुकोप उवाच च अरे जाल्म किमिदमिति । नापितश्च कुपितं नृपं ज्ञात्वा कृताञ्जलिर्भूत्वोवाच राजेन्द्रमौले तव चरणावुपासे नायमुपहासः किंतु मे मनसीत्थमेव निश्चयो नासीदिह त्रिलोक्यां तव पुत्रात्सु का कथेति । राजा च सत्यमाहायमेव रागग्रहगृहीतचित्तदृशेति मत्वा कोपं तत्याजेति । तथा च यथा ऽतिकुरूपे ऽपि पुत्रे रागातिशयवशान्नापितस्य सर्वोत्तमत्वधीस्तथा मन्दधियां केषां चिज्जन्मान्तरीयसंस्कारप्रयुक्तरागातिशयवशात्कस्मिंश्चिदतिक्षुद्रे ऽपि देवे सर्वोत्तमत्वधीः । परित्यज्य च हरिहरादींस्तदुपासने प्रवृत्तिरिति न्यायसङ्गतिः । १९ । ६४ ।

स्वविषयमपि कुण्ठमस्त्रमिति न्या० । २० । ६५ ।

मरीचीमिमवोन्मुच्य इति न्या० । २१ । ६६ ।

अन्धचटकन्या० । यथा ऽकस्मादन्धस्य हस्ते पतितश्चटको ऽन्धेन धृत इति लोके प्रसिद्धिस्तथा दैवादप्यभीष्टं स्वेष्टदैवत्येनाभिमतमंशांशांदिवत्तं सन्धन्तहत्यर्थः । २२ । ६७ ।

घुणाक्षरन्यायो ऽपीदृशः घुणेन भक्षिते काष्ठादावककारादिसदृशचिह्नेषु सत्सु घुणेनाक्षराणि निर्मितानीत्यबुधैः कल्प्यन्ते यथा तथा प्रकृते ऽपि २३ । ६८ ।

कुमारिकया देवं भजन्त्या भर्ता ऽपि नष्ट इति न्या० । २४ । ६९ ।

वृद्धिमिच्छतो मूलं विनष्टमिति न्या० । २५ । ७० ।

चर्वन्तौ भक्षितौ हन्तीति न्या० । खलतीह तितिणी तितिणं च फलं तथा च चर्वन्तौ चर्वन्तीत्यर्थः स्फुटमन्यत् । २६ । ७१ ।

मण्डूकोत्प्लुतन्या० । केषु चिन्मण्डूकेष्वभीष्टमानप्रयार्थं तुलायामारोपितेष्वन्ये उत्प्लुत्य गच्छन्तीति नाभीष्टसिद्धिस्तथा प्रकृते ऽपि २७ । ७२ ।

अच्छिद्रघटाम्बुन्यायः २८ । ७३ ।

एकासिद्धिं परिहरतो द्वितीया ऽऽपद्यत इति न्यायो ऽपि येह प्रवर्त्तते । इयं बौद्धधिक्कारे उदयनाचार्योक्तिः । यथाङ्कुरादिकार्यं सकर्तृकं कार्यत्वादित्यत्र शरीरीति विशेषणेन स्वरूपासिद्धिं परिहरतो बौद्धस्य व्याप्यत्वासिद्धिरापद्यते तथा प्रकृते ऽपि २९ । ७४ ।

उपधानपधानधर्मौ विकरोति हि धर्मिणमिति न्या० । यथा द्रव्यस्य रूपरसादिरूपधर्मस्य परावृत्तौ च रूपरसाद-

न्तरोत्पत्तौ च तदङ्कुरादेर्भिन्नो विकृतिर्दृश्यते तथा प्रकृते ऽपि स्यादित्यर्थः ।१०।७५।

अर्धं शिरश्छिन्नो राजग्रहणन्या० स्वस्थाने स्पष्टो ऽयम् ।११।७६।

सर्वं विशेषणं सावधारणमिति न्या० शङ्खः श्वेत इत्यत्र श्वेत एवेत्यर्थः एवमन्यत्र प्रकृते ऽपि च ॥१२।७७।

सर्वं वाक्यं सावधारणमिति न्यायो ऽपि ह्यनेनोदाह्रियते । तत्रावधारणार्थक एवकारस्त्रिविधः क्रियान्वितो विशेषणान्वितो विशेष्यान्वितश्च । तत्र पूर्वस्यात्यन्तायोगव्यवच्छेदो ऽर्थः यथा नीलं पद्मं भवत्येव । द्वितीयस्यायोगव्यवच्छेदः स बोध्यः । तृतीयस्यान्ययोगव्यवच्छेदः यथा पार्थ एव धनुर्धर इत्यादौ एवमन्यत्रापि बोध्यम् ।१३।७८।

वृद्धकुमारीवाक्यन्या० । अयं महाभाष्ये व्याख्यातः । तद्यथा वृद्धकुमारीं इन्द्रेणोक्ता वरं वृणीष्वेति सा च वरमवृणीत पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीरन्निति । न च तावदस्याः पतिर्भवति कुतः पुत्राः कुतो गावः कुतो धान्यम् । तत्रानया एकेन वाक्येन पतिः पुत्रा गावो धान्यमिति सर्वं संगृहीतं भवतीति तथा तत्तदुपासनया मोक्षो भवतीत्यादिवाक्यैरपि यदन्तरेण तदसिद्धिस्तत्संगृहीतं भवति, एवं काशीमरणान्मुक्तिरिति श्रुतिवाक्यं तदुपबृंहणप्रवृत्तानि पुराणादिवाक्यानि च यानि काशीमरणान्मोक्षं बोधयन्ति तेषां यथाश्रुतार्थोपगमे तमेव विदित्वा ऽति मृत्युमेति नान्यः पन्था विद्यते ऽयनायेत्यादिश्रुतिविरोधः स्यात्तद्वारणाय तत्त्वज्ञानद्वारैव मोक्ष इत्यङ्गीक्रियते । तत्र ज्ञानं ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । आदर्शे निर्मल-

मायाभासत्वकृतः कुलेन शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वाऽऽत्मन्येवात्मानं पश्येत्, आत्मा वा अरे द्रष्टव्यः श्रोतव्यः, नावेदविन्मनुते तं बृहन्तम्, आचार्यवान् पुरुषो वेद, प्रोक्तो ऽन्येनैव सुज्ञाना प्रेष्ठेत्यादिना-क्रमाभावस्यानेकजन्मार्जितपुण्यपुञ्जक्षपितपापस्य साधनचतुष्टयसंपन्नस्य गुर्वन्तिके वेदान्तश्रवणादिना एव ज्ञानस्य । ततश्च काशीमरणान्मोक्षबोधकवाक्यजातेन यदुत्तरेण मोक्षसिद्धिस्तत्सर्वमनेन न्यायेन संगृहीतं भवति । न केवलमर्थमत्र कल्प्यं किंतु मानसिद्धम् । तत्र तावत्पापनिवृत्तौ काशीप्रवेशदर्शनस्पर्शनैः तत्रस्थगङ्गादिस्नानदेवदर्शनादिना च तन्निवृत्तिबोधकानि वचनानि प्रमाणम् । अथ काशीदर्शनमाहात्म्यं काशीखण्डे ऽभिहितम् । येऽदृष्ट्वा पुनः काशीं ते पुरुषाः पापसम्भवाः । दृष्ट्वा येस्ते ऽपि च ततः श्रेष्ठास्त्रैलोक्यभाजनम् । मात्स्ये च अज्ञानाज्ज्ञानतो वा ऽपि यत्संधानमतीतकम् । सर्वं तस्य च तत्पापं क्षेत्रं दृष्ट्वा विनश्यति । पाद्मे । अस्याः संदर्शनं व्यास सर्वपातकनाशनम् । अस्यां निवासो निर्वाणं साधयत्यञ्जसा कुले । ब्रह्मवैवर्ते । पश्य तात परमर्षितां पुरीं योगिभिः सुकृतिभिर्मुनीश्वरैः । यां निरीक्ष्य पुरुषः पुरा कृतैः पातकैः शतमितैर्विमुच्यते । पञ्चमहापातकैरित्यर्थः । तथा मर्त्यैः कृतानि पापानि पूर्वजन्मार्जितान्यपि । काशीदर्शनादेव नाशमेष्यन्ति नान्यथा अत्र मर्त्यैः कृतानीति निर्देशात्पूर्ववाक्यान्यप्येतद्विषयपदुपसंह्रियन्ते बहुर्भावकरणवाक्यानामेकविषयत्वेन । अन्यथा पञ्चक्रोशयात्राविधानं व्यर्थं स्यात् तथा पूर्वजन्मसहस्रादिसंचितं पापराशिमतुलं विनाशयेत् । काशिकास्वरूपप्रकाशिका दर्शनश्रवणकीर्तनादिभिः । एवमन्येष्वपि पुराणादिषु द्रष्टव्यम् । अथ काशीप्रवेशमहिमा ब्रह्म-

वैचर्सं । महापातकयुक्तो ऽपि श्रद्धया रहितो ऽपि वा । काशीप्रवेशादन्तः सम्यक् स्थित्वा सुखी भवेत् । यत्तु कश्चिदाह । काशीप्रवेशात्पापं न नश्यति किं तु बहिरेव तिष्ठति एतदेवानघत्वं नाम अत एव लिङ्गपुराणे वाराणस्यां तु यः कश्चित्प्रविष्टो ब्रह्मघातकः । तिष्ठते बाह्यतः पापं निर्गते पुनरित्युक्तम् । एवमन्यान्यपि पुराणवाक्यानि बोध्यानीति तन्न चोद्यक्षमम् । कर्तृरूपस्य तस्यान्तःकरणधर्मत्वेन बहिर्निरालम्बावस्थानायोगात् । अथ तार्किकमतमाश्रित्यादृष्टस्यात्मधर्मत्वमुपेत्य पापं प्राक् देहावच्छिन्ने स्थितमिदानीं तु विभुत्वादात्मनो बहिरवच्छिन्ने तस्मिंस्तिष्ठति न तु काश्यवच्छिन्नइति मन्यसे न तदपि चारु । तस्य देशावच्छेदेन वृत्त्यभावात् । अन्यथा ऽऽत्मगुणस्याऽऽत्मावयवानं विना ऽन्यत्र गमनासम्भवेनात्र नरदेहावच्छिन्ने जातस्यादृष्टस्य स्वर्गादौ देवादिदेहे भोगानुत्पादकत्वप्रसङ्गात् । किं च यदि प्रागेव बहिरवच्छिन्ने जातं पापं न काश्यवच्छिन्ने तर्हि काशीप्रवेशेन किमधिकं कृतम् । अतः स्वार्थासम्भवाद्बहिः पापस्थितिबोधकानि वाक्यानि बहिर्न गन्तव्यं किं त्वत्रैव सदा स्थेयमित्येवंपराणि निर्गते धावते पुनरिति तु न हि निन्दा निन्दितुं प्रवर्तते इति न्यायेन बहिर्न पापादिति स्तुत्यर्थमाह । किंच बहूनि वाक्यानि पापनाशमेवोपपादयन्ति तत्र तावच्छैवे । अत्र प्रविष्टमात्रस्य जन्तोः पापं पुरा ऽर्जितम् । विनाशमायाति परं पुण्यराशिश्च वर्द्धते । शैवे च जन्मान्तरसहस्रेषु यत्पापं पूर्वसंचितम् । अविमुक्तं प्रविष्टस्य तत्सर्वं व्रजति क्षयम् । एवमन्यान्यपि बोध्यानि । अत्र काशीदर्शनादिभिः पापसामान्यध्वंसश्रवणे ऽप्यारब्धातिरिक्तस्यैव पापस्य ध्वंसो द्रष्टव्यः । तत्त्वज्ञानेनापि तद्ध्वंसानभ्युपगमात् । इदं त्वत्र

विचारणीयं किं काशीप्रवेशादिना अतीताशेषजन्मजं पापं क्षीयते तज्जन्मजमेव वेति ।

अत्र के चित् । अतीताशेषजन्मजपापक्षयोपगमे लिङ्गं दशाश्वमेधीशं दृष्ट्वा दशहरातिथौ । दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशय इत्यादीनि वचनानि निर्विषयाणि स्युः प्रवेशादेव सर्वपापनाशात् । अतः प्रवेशादेतज्जन्मजमेव पापं क्षीयते तत्तल्लिङ्गादिदर्शनादिना तु प्राग्जन्मीयपापक्षय इति मन्यन्ते ।

एवं तु जन्मान्तरसहस्रेष्वित्यादिप्रागुदाहृतैः प्रवेशादिना अनेकजन्मजपापक्षयबोधकवचोभिर्विरोधापत्तेस्तत्तल्लिङ्गदर्शनादिना पापादिध्वंसादिनाः पापवासना अनेकजन्मीयाः क्षीयन्ते प्रवेशात्त्वशेषपापनाश एव न च वासना अपि नश्यन्ति काशीप्रविष्टानां मनुष्यनाशापत्तेरित्यन्ये । तेषामयमाशयः । पापस्य द्वे शक्ती । एष एवासाधु कर्म कारयति तं यमेभ्यो ऽधो निनीषत इति श्रुतिसिद्धनरकजनकतावच्छेदिका प्रथमा पापः पापेन कर्मणेति श्रुतिसिद्धपापप्रवर्तकतावच्छेदिका द्वितीया । तत्र सर्वेषां पापानां प्रथमा शक्तिः प्रवेशादिना नाश्यते । द्वितीया तु वासनाख्या तत्तल्लिङ्गदर्शनादिना तत्तन्माहात्म्योक्तप्रकारेणैव नाश्यत इति ।

इतरे तु एवं सति पापादिध्वंसेषु शक्तिलक्षणापत्तिः तत्कस्य पापस्यानाशित्वापत्तिश्च दोषः । वासनानाशे च पुनः काशीस्थानां पापे प्रवृत्त्यनुपपत्तिः न च ततः प्राचीनजन्मानुवृत्तवासनया तदुपपत्तिः । कृत्तिवासविश्वेशादिदर्शनेनाशेषदुरितध्वंसोक्तेः । तद्वचनस्याखिलवासनानाशपरत्वे पापे प्रवृत्त्यनुपपत्तेर्दुष्परिहरत्वात् । अतः प्रवे-

यावत्तिलमेव पापं नश्यति काशीस्थलतत्तीर्थस्नानादिना एकद्व्यादिजन्मजपापक्षयोक्तिस्तु ये ऽन्यत्र कृताः पुरुषातिशयेन काश्यां जातास्तद्विषयेति न का चिदनुपपत्तिः । न च तेषामपि लिङ्गदेहस्य संस्कारविशिष्टत्वात्सर्वं पापं नष्टमेवेति वाच्यम् । पाङ्क्तिपैङ्गाधिकरणन्यायात् । यतो विधिनिषेधेषु मनुष्याणामेवाधिक्रिया अतः पशुनिषादाद्या यज्ञानर्हा ऽधरा मता इति पश्चाच्च मनुष्याधिकारित्वाभावाच्च लिङ्गदेहे पापनाशायोगात् । या तु पिशाचमोचनाख्याने पिशाचस्यापि तत्स्नानात्पैशाच्यनाशोक्तिः सा निषादस्थपतीष्टिवदावश्यकं पापनिकमिति न्यायात्स्नानविषयैव । न च लिङ्गस्य काशीमध्ये स्वल्पपापनाशे यतो ऽस्ति तस्मात्काश्युत्पत्तिविषयापि तल्लिङ्गदर्शनादिनैकद्व्यादिजन्मपापक्षयबोधकानि वचांसीत्याहुः ।

अपरे तु काशीगमनगङ्गादर्शनतत्तीर्थस्नानतल्लिङ्गदर्शनादीनां निखिलकाम्यानां फलवैलक्षण्ये इतरेतरानर्थक्यापातात् प्रत्येकं सर्वपापनाशकत्वाभावे च स्वतो वैलक्षण्याभावे कायिकवाचिकमानसबुद्धिपूर्वाबुद्धिपूर्वसकृदावृत्तात्यन्ताभ्यस्तमहापातकोपपातकादिप्रतियोगिकृतवैलक्षण्यासंभवात् पापे च सर्वत्वस्यावान्तरवैजात्याव्यवच्छेदेनैव संकुचद्वृत्त्या सर्वेभ्यो ज्योतिष्टोमः सर्वेभ्यो दर्शपूर्णमासौ सर्वेभ्यश्चातुर्मास्यानीतिवत्संभवात् गमनादेः प्रत्येकमशेषपापक्षये ऽपि न का चिदनुपपत्तिः । तथा च प्रवेशाद्यज्जातीयाशेषपापं नष्टं तद्भिन्नजातीयमेकद्व्यादिजन्मोत्थं तत्तीर्थस्नानादिना नश्यतीति वदन्ति ।

काशीप्रवेशेन कायिकादिभेदभिन्नानामनारब्धानां सवासनानां सर्वेषां पापानां निवृत्तिरेव भवति । न चैवं काशीस्थानां पापे प्रवृत्तिर्न स्यात् । प्रारब्धेनैव दुःखोत्प-

त्तिबल्पापप्रसूतेरपि संभवात् । तत्तत्तीर्थस्नानादिनैकद्व्या-
दिजन्मीयपापनाशबोधकं तु वाक्यं यावता पुण्येन नक्ष्यति तावत्पुण्योदयपरम् । यद्वा यथा काश्यां कृतमल्पमपि पुण्यं बहु भवति तथा पापमपीति स्पष्टं पुराणादौ । तथा च काश्यां कृतं यावत्पापमेकद्व्यादिजन्मीयसमं भवति तत्तीर्थस्नानादिना तावन्नश्यतीत्यर्थकं तद्वाक्यम् । कर-वगमनसेतुविश्वेशकृत्तिवासेशदर्शनादिना सर्वपापनाशबोधकवाक्यानामप्येषैव गतिः । यत्तु तत्र ब्रह्मेश्वरं दृष्ट्वा ब्रह्मलोके महीयत इति ब्रह्मलोकादिफलं यच्च क्व चिन्मुक्त्यादिफलं तदपि यात्रां कृत्वा देशान्तरमृतविषयम् ।

ननु काशीप्रवेशात्प्रवेशावधिकाशेषपापक्षये कृतकाशीयात्रस्याकृतकाशवासस्य बहिर्निर्गमनानन्तरमेव मरणे ऽप्यपवर्गोपपत्तिः केवलपुण्येन स्वर्गस्यासंभवात् । न च पुण्यान्तं यावत्स्वर्गभोगानन्तरं मुक्तिरेव तस्येति युक्तम् । श्रवणादिजन्यज्ञानाभावे तद्योगादिति चेन्न । तस्यापि मार्गस्थजन्तुमरणादिजन्याज्ञातपापोपपत्तेः । व्याघ्रादिनिहतत्वे दुर्मृत्युजपापसंभवात् दुर्वारारब्धकर्मणा ऽन्ते दुर्मतिसंभवेनान्ते या मतिः सा गतिरिति न्यायेनापि स्वर्गजन्मसंभवात् । अन्यथाभावे ऽप्यविमुक्तमेव निषेवेताविमुक्तं न विमुञ्चेदित्यविमुक्ते प्रविश्य तत्र मरणान्तवासविधिवत्त्यागनिषेधात् तिलमप्युक्तपापस्याक्षयफलत्वाच्च । परं तु तस्योदयः देहद्वयेनैव भवतीत्यन्यदेतत् । अतः काशीप्रवेशात्पूर्वपापक्षये ऽपि न का चिदनुपपत्तिरिति तु नवीनमताः ।

अत्र परीक्षकैर्विचार्य युक्तः पक्षो ग्राह्यः । आरब्धानां च भोगेन नाशे शुद्धचित्तो जीवो वैराग्यमुमुक्षादि-

साधनसंपत्तिं लभते स्वयं च जन्तुः स परमकृपया ब्रह्मात्मैक्यबोधसाधनं तारकमुपदिशतीति न श्रवणस्यापि ज्ञानं प्रति व्यभिचारः । तथा च जाबालोपनिषद्याम्नायते अविमुक्तं वै देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवतीत्यादि । स्मर्यते च पुराणेषु तत्र तावत्कौर्मे । यत्र साक्षान्महादेवो देहान्ते स्वयमीश्वरः । व्याचष्टे तारकं ब्रह्म तत्रैवमविमुक्तकम् । काशीखण्डे च । ब्रह्मज्ञानेन मुच्यन्ते नान्यथा जन्तवः क्वचित् । ब्रह्मज्ञानं तदेवाहं काशीसंस्थितिभागिनाम् । दिशामि तारकं प्रान्ते मुच्यन्ते ते तु तत्क्षणात् । पाद्मे ऽपि निर्वाणपदमेवैतच्चदपिधामि नित्यशः । म्रियमाणस्य जन्तोश्च वाक्यं कर्णे समुच्चरन् । विना वाक्योपदेशेन ब्रह्मात्मैक्यं न भासते । ब्रह्मात्मैकत्वविज्ञानादृते मुक्तिर्न जायते । एवमन्यत्रापि । तारकं किमिति चेत्प्रणव इत्यवेहि । तदुक्तं काशीखण्डे । न वर्ण्यते कैः किल काशिकेयं जन्तोः स्थितस्यात्र यतो ऽन्तकाले । यदेशितैः प्राक्तनपुण्यभारैरोंकारमोंकारधनीन्दुमौलिः अन्यत्रापि प्रणवं तारकं ब्रूते काश्यां देवो महेश्वरः ।

ननु प्रणवेन कथं ब्रह्मात्मैक्यबोधः । शृणु अकारोकारमकारवाच्यान्विश्ववैश्वानरतैजससूत्रात्मप्राज्ञेश्वरान् ज्ञात्वा प्रथमं विश्वं वैश्वानरत्वेनाहमेव वैश्वानरो ऽस्मीति विभाव्य ततस्तैजसं सूत्रात्मत्वेनाहमेव सूत्रात्मा ऽस्मीति विभाव्य पश्चात्प्राज्ञमीश्वरत्वेनाहमेवेश्वरो ऽस्मीति विभाव्यानन्तरं समष्टिव्यष्टिस्थूलसूक्ष्मकारणोपाधिकमोंकारवाच्यं परं ब्रह्माहमस्मीति सर्वात्मत्वेन विभाव्य पश्चान्मनस्येकाग्रतामापन्ने स्थूलसूक्ष्मादि सर्वं जगल्लोपमापाद्याहम-

न्यायेनैतत्क्रमेण निर्विशेषे ब्रह्मणि चित्तस्यैकाग्र्येण मनसा स्वस्य ब्रह्मत्वं साक्षात्करोतीति ।

यथा तथो ऽहं सो ऽसौ योऽसौ सो ऽहमित्यत्र सच्छब्देन परमात्मोच्यते । अहंशब्देन प्रत्यगात्मा ऽवगम्यते । ततश्च समानाधिकरणयोः सो ऽहमित्यनयोः परमात्मा ऽहमित्यर्थस्तथा प्रणवस्यापि । सो ऽहमित्यस्यैव प्रणवत्वेन निपातनात् । तथा हि । सो ऽहमित्यस्य पृषोदरादित्वेन निपातनात्सकारहकारलोपे कृते परिशिष्टयोरोऽमित्यनयोरेङः पदान्तादतीति पूर्वरूपैकादेशात्मकं संधिं कृत्वोच्चारणे ओमिति शब्दो निष्पन्नः तदुक्तम् । सकारं च हकारं च लोपयित्वा प्रयोजयेत् । संधिं च पूर्वरूपाख्यं ततो ऽसौ प्रणवो भवेदिति । एवं चोमित्यस्य परमात्मा ऽहमित्यर्थ इति सिद्धम् ।

अत्र कश्चिदाह । काश्यादिकं चाभेदेन चतुर्विधे क्षेत्रे मणिकर्ण्यां जाह्नव्यसौदके भूमौ विश्वेशाभिमुख्येन कालतो मृतस्य द्विजमात्रस्य भैरवयातनादिजनकपापहीनस्य विश्वेशभक्तस्य काशीमरणान्मुक्तिर्भवति न वेति संशयरहितस्य सद्यः परब्रह्मसायुज्यं भवति द्विजेतरस्यापापस्य नरमात्रस्य द्विजस्यापि कस्य चित्पापत्वे ऽपि विश्वेशभक्तस्य तत्कृतत्वे ऽल्पपापत्वे ऽप्युक्तप्रकारात्प्रकारान्तरेण मृतस्य चतुर्विधे क्षेत्रे यत्र क्वापि मरणे क्षेत्रावान्तरभेदतारतम्येन जीवनतारतम्येन मरणस्य बुद्धिपूर्वकत्वाबुद्धिपूर्वकत्वप्रयुक्ततारतम्येन कर्मादितारतम्येन च सालोक्यादिप्रसिद्धारा कैवल्यं भवति । पापिनस्तु नरमात्रस्य चतुर्विधे क्ष क्षेत्रे यत्र क्वापि येन केनापि प्रकारेण मृतस्य भैरवयातनानुभवानन्तरं मोक्षः । तत्र हि जन्तोः प्रायेणाल्प-

माणेष्विति जन्तुमात्रस्य श्रवणात्कथं त्रैवर्णिकत्वेन सायुज्यमिति चेन्न रुद्रस्तारकं ब्रह्म व्याचष्ट इत्यनेनैकवाक्यतया प्रणवाख्यतारकव्याख्याने योग्यत्रैवर्णिकमात्रपरत्वाज्जन्तुपदस्य । अथोत्क्रान्त्यनन्तरं देहाभिमानाभावाज्जन्तुमात्रस्य श्रवणाधिकार उपपद्यत इति चेन्न उत्क्रममाणेष्विति वर्तमानप्रत्ययदर्शनेनोत्क्रमदशायामेवोपदेशस्वीकारात् । उत्क्रमणानन्तरं देहस्योपदेशायोगाच्च । कर्णेमूलगतो हर इत्यादिवचनविरोधाच्च विदेहस्य कर्णाभावात् । एवं पुराणगतजन्तुशब्दस्यापि त्रैवर्णिकमात्रपरत्वेव । तथा स्कान्दपाद्मवचनस्तु जन्तुर्जीवकमध्यगः अविमुक्तेऽन्तकालस्य कर्णमूलगतो हर इति वचनात् । कुरूणां मणिकर्णेश्वरोदकनिवासिन इत्युक्तेश्चाक्रन्दने मणिकर्ण्यां विश्वेश्वाविमुक्तस्य । काशेनोपरतो यातीत्युक्तेः आत्मत्यागो न कर्तव्यो महाश्रेयोऽभिवृद्धये । अथात्मत्यजनोपायं मनसापि न चिन्तयेदिति वचनाच्च कालात्तु मरणात् । अविमुक्तादित्यादिस्मृतिसमाकूती भूतानां त्रैवर्णिकानामपायस्यात् द्विजत्वाच्च तदैव तारकोपदेशयोग्यानां मङ्कतः कृतनिश्चय इत्युक्तेर्विश्वेशभक्तानां काशीमरणं मोक्षदं न वेति संदेहशून्यानां च विश्वगुरुश्रीविश्वेश्वरोपदिष्टतारकोदितब्रह्मबोधात्तत्सायुज्यं भवतीति सिद्धम् ।

ननु ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये वर्णसंस्थिताः । स्त्रियो म्लेच्छाश्च ये चान्ये संकीर्णा वर्णजातयः । कीटाः पिपीलिकाश्चैव ये चान्ये पक्षिणस्तथा । कालेन निधनं प्राप्ता अविमुक्ते वरानने । चन्द्रार्धमौलिनस्त्र्यक्षा महावृषभवाहनाः । शिवे मम पुरे देवि जायन्ते तत्र मानवाः मानवा इति ब्राह्मणश्रमणन्यायेन ये भक्ता वर्णं मेवाविमुक्तं परं पदम् । ते विशन्ति महादेवमाज्याहुति-

रिचानलम् । आकामो वा सकामो वा तिर्यग्योनिगतो ऽपि वा । अविमुक्ते त्यजन्प्राणान्मम लोके महीयते । एतस्याश्चैव यतयस्त्रिंशतीर्थोपासकाः । एकदण्डास्त्रिदण्डाश्च हंसमलधराश्च ये । कर्मभेदेन तेषां तु सर्वेषामाश्रितो महत् । विभजामि परं स्थानं यच्छम्भोःपदं शुभमित्यादिनागपुराणवचनैः काश्यां मृतानां शैवाधान्तरभेदतारतम्यात्सारूप्यादिसंभवे ऽपि विदेहकैवल्यं कथं स्यादिति चेदुच्यते । तदुपर्यपि हि बादरायणः संभवादिति व्याससूत्राद्देवानामपि ब्रह्मविद्याधिकारे सिद्धे ते विशन्ति महादेवमित्यादिवचनशतेभ्यः शिवलोकं गतानां महेशात्तत्त्वावबोधलाभे कैवल्यं भवतीति ।

अन्यस्त्वाह यद्यपि पुराणेषु सारूप्याद्यविशेषेण मोक्षो मरणफलतया ऽवगम्यते तथा ऽप्यधिकारितारतम्येन निष्पापानामेवापीतकर्मणां मरणादेव मुक्तिः । ततो निकृष्टानामग्निप्रवेशादिकृतां शम्भुसामीप्यम् । न चात्र निकृष्टत्वेऽक्षया मरणात्कथमीशसामीप्यम् । अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः । प्रविशन्ति मुखं ते मे निःसंदिग्धं वरानने । कुर्वन्त्यनशनं ये तु मद्भक्ताः कृतनिश्चयाः । न तेषां पुनरावृत्तिः कल्पकोटिशतैरपीत्यादिकाशीखण्डादिवचनैरग्निप्रवेशप्रायोपवेशनयोरभ्यनुज्ञानेन निषेधस्येतरत्र संकोचात् । तिर्यक्प्रभृतीनामत्यन्तं पापीयसां च सारूप्यम् । ततो ऽप्यधमानां सालोक्यमिति । किं च चतुर्विधे क्षेत्रे यथा यथा लोलपीठाद्विप्रकर्षस्तथा मरणफलापकर्ष इत्यप्याह । तदपरे न क्षमन्ते । तमेव विदित्वेत्यादिश्रुतिविरोधान्मरणान्मोक्षायोगात् । ननु मरणादेव मोक्षोपकथानापुराणवचनमेवेति श्रुतिरन्यत्र सावकाशेति चेन्नैवम् । पुराणेन वेदसंकोचायोगात् । काशीमरणस्य

जाबालोपनिषदा तारकोपदेशद्वारा ज्ञानजनकत्वेनोक्तत्वा-
च्चेति । अस्मात् काशीमरणस्य चित्तशुद्ध्युपयोगः । वारा-
णसीस्थतीर्थानामवगाहनतः परात् । अन्तःकरणसंशुद्धि-
माप्नुयाज्जितेन्द्रिय इत्यादिवाक्यैस्तस्याः पूर्वमेव सिद्ध-
त्वात् । किं तु बोधद्वारा मुक्तावेव । यो ऽपि प्रथमः पक्षः ।
सूक्ष्मैर्मशकयूकेस्तरोद्भवनिवासिन इत्यादिपूर्वोक्तवि-
शेषणवन्तस्त्रैवर्णिकास्तेषां साक्षात्तैलयजन्यस्य मुक्तताको-
क्त्याद्विदारेति । सो ऽप्ययुक्तः । जन्त्वादिसाधारणपदश्र-
वणात् । तथा हि अत्र हि जन्तोः प्राणेषूत्क्रममाणेष्वित्या-
दिश्रुतौ कीटाः पतङ्गा मशकाश्च वृक्षा जले स्थले वा विच-
रन्ति मर्त्याः । मण्डूकमत्स्याः कृमयो ऽपि काश्यां त्यक्त्वा
शरीरं शिवमाप्नुवन्ति अविमुक्तरुद्रलक्षा मुच्यन्ते ज्ञानिनो
नराः । अज्ञानिनो ऽपि मुच्यन्ते सेवे ऽस्मिंस्ते त्यक्तकल्मषाः ।
सर्वान् जन्तून्बोधयेदन्तकाले विश्वेशो ऽत्र श्रोत्रमन्त्रोपदे-
शात् । आब्रह्मस्तम्बपर्यन्तं यत्किंचिज्जन्तुसंज्ञितम् । चतुर्षु
भूतग्रामेषु काश्यां तन्मुक्तिमाप्स्यतीत्यादि काशीखण्डे ।
एवमन्येष्वपि श्रुतिस्मृतिपुराणादिषु जीवसामान्यपरज-
न्त्वादिपदश्रवणेन कृमिपर्यन्तानां साक्षाद्ग्रहणेन च जन्तु-
पदस्य त्रैवर्णिकमात्रपरत्वकल्पनस्यानुचितत्वात् । प्रणव-
श्रवणे द्विजात्यतिरिक्तस्य कथमधिकार इति चेत्स्वयमस्मा-
दाद्युपदिष्टप्रणवश्रवणे तादृतरस्यानधिकारः । अपारजन्मा-
र्जितपुण्यपुञ्जप्रसादितपरमेश्वरोपदिष्टप्रणवश्रवणे तु काशी-
माहात्म्यसामर्थ्यपरमेश्वरसाक्षात्काराभ्यां स्वस्तावककल्प-
पक्ष प्राणिमात्रस्याधिकारः । अत एव ब्रह्मवैवर्ते तीर्था-
न्तरात्काश्या विशेष उक्तः । जितेन्द्रियाः पापविवर्जिताश्च
शान्ता महान्तो मधुसूदनाश्रयाः । अन्येषु तीर्थेषु हि मुक्ति-
भाजो भवन्ति काश्यामपि को विशेष इति ब्रह्मप्रश्ने

गुरुणोत्तारितम् विशेषं शृणु वक्ष्यामि कारणाः कथयतो मम । कृतानि साधनान्यत्र स्वल्पान्यपि महान्ति । भवन्ति काशीमाहात्म्यात्सिद्धान्येव न संशयः । अन्यत्र साधुसुकृतैः कृतैर्मुच्येत वा न वा । अत्र साधनवैकल्ये काशी पूर्णं प्रकल्पयेत् । तथा कलिकालस्त्वयं तीक्ष्णः क नयः क परात्मदृक् । काश्येव शरणं तेषां शुद्धिदा भविता ध्रुवम् । कलौ विनष्टबलधैर्यवीर्या गच्छन्तु काशीं परमार्थराशिम् । तथा ये वा द्विजाद्याः श्वपचाश्च निन्द्या ये चक्रवर्तिष्वपि धर्मरूपाः । ये वा दरिद्राः परिपार्श्विभाजः समानरूपां गतिमाप्नुवन्ति । काशीखण्डे च संसारभयभीता ये ये बद्धाः कर्मबन्धनैः । येषां क्वापि गतिर्नास्ति तेषां वाराणसी गतिः । श्रुतिस्मृतिविहीना ये शौचाचारविवर्जिताः । येषामित्यादि पूर्ववत् तथा सौभाग्यभाग्यभूर्या वै विख्याता मणिकर्णिका । ददाति तस्यां सर्वस्वमजायान्त्यजाय चेति । अत एव पात्रे ऽधिकारसंपादनमुक्तम् । पुमांसं जीवकलुषं शंकरस्तारकं वदः । आचण्डाल विविक्तसंपाद्याभिकृतिं पराभिनि । एवं चाधिकारसंपादनं नीचेष्वनधिकारिष्वेव । जातिकर्मस्वाधुतनानां स्वत एवाधिकारत्वेन संपादनानर्थक्यात् फलतश्चैवोक्तम् । गणयति न कथं विघ्नंकरः काशिकायां किमुत तत्र कुम्भको ब्राह्मणः पुल्कसो वा । उपदिशति सदा ऽन्ते वाक्यमेकात्मनिष्ठं द्विजकुलनिरपेक्षो ब्राह्म तत्राधिकारमिति । यत्तु भूमौ मृतानामेवं मुक्तिरिति । तदपि न । भूमौ जले ऽन्तरिक्षे वा यत्र क्वापि मृतो द्विजः ब्रह्मैकत्वमाप्नोति काशीशक्तिसमाहितः । सूच्यग्रमात्रमपि नास्ति ममास्पदे ऽखिन्नानं सुरेश्वरि मृतस्य न यत्र मुक्तिः भूमौ जले मध्यतो वा ऽन्तरिक्षे सर्वाभिरप्युपाधिभिर्विहितस्य जन्तोरित्यादिव-

वनात् । अनेन दुर्वृत्तजदोषो ऽप्यत्र नास्तीत्युक्तम् । न
चात्र कालकृतो ऽपि विशेषो ऽस्ति । उत्तरं दक्षिणं वा ऽपि
अयनं न विचारयेत् । सर्वो ऽप्यस्य शुभः कालो ह्यवि-
मुक्ते म्रियेत चेत् इति काशीखण्डात् । तस्मात्सर्वस्यापि
काश्यां यत्र क्वापि कथं चिन्मृतस्य मोक्ष इति सिद्धम् ।
कं विद्धि शिवयिवेत्युपदिशाम्यहमिति शिरावृत्तः शिव-
श्चन्द्रतारकतयोक्तः रामतापनीये । मुमूर्षोर्दक्षिणे कर्णे
यस्य कस्यापि वा स्वयम् । उपदेक्ष्यसि मन्मन्त्रं स मुक्तो
भविता शिवेति । काश्यां तु श्रीरामरामेति एतत्तारकमुच्यते
इति श्रीचन्द्रपूर्वकशिरावृत्तो रामचन्द्रतारकतयोक्तः ।
अनेन पञ्चाक्षरमन्त्रोपलक्षणाच्छ्रीशब्दप्रयोगस्य अवश्यंति-
शयार्थत्वान्न रामतापनीययोर्भिन्नार्थत्वम् । तथा च प्रण-
वाधिकारिणां सर्वेषां प्रणवोपदेश एव तदनधिकारिषु
शैवानां शिवमन्त्रोपदेशः । वैष्णवानां तु राममन्त्रोपदेशः
शिवमद्वैतं चतुर्थं मन्यन्त इति श्रुतेः शिवेतिशब्दस्य रमन्ते
योगिनो ऽस्मिन्निति निर्वचनेन रामशब्दस्यापि चाद्विती-
यब्रह्माभिन्नब्रह्मबोधकत्वाच्च काश्यां मोक्षफलकत्वाद्दोषा-
नुपपत्तिस्तच्चापीत्यपि के चित् । अस्मिन्मते ऽपि शूद्र-
जन्तूनामधिकारोपपत्तिरीशाभीष्टैव । तेषां फलोन्मुखेन
केन चिदुक्तेन कर्मणा शूद्रजन्मोपपत्तिः । अनादिनिध-
नविनाशिंच्युवार्थैः काश्यां मरणे मुक्तिश्चेति बोध्यम् । यत्तु
कं चित्वेन भेदादधिकारिभेदाच्च सामीप्यादिफलकीर्त-
नम् । तन्निर्विषयमोक्षभीरूणां तन्माहात्म्यानभिज्ञानां
सन्तोषार्थं ज्ञेयम् । काश्यां स्वर्गादिकमुद्दिश्य यागाद्य-
नुष्ठाता अपि पादिकान्वेषणे प्रवृत्तश्चिन्तामणिं लब्धवा-
निति वासिष्ठोक्तन्यायेन मोक्षमेव लभते । अत्र
के चिदाहुः । स्वस्वधर्मनिरतस्यापापस्य सर्वस्याप्यनन्त-

रमेव मोक्षः । तज्ज्ञिज्ञासस्य तु पातभावो ऽधिकारसंपा-
दनेन । तदुक्तम् । स्वे स्वे कर्मणि निष्णातानुसारावश्य-
म्भवात् । अथमानपि मार्गस्थाक्ष्यामि परमां गतिम् । केवलं
धर्मसापेक्षः कथं जयति तद्ध्वः । अयमिष्टस्य तल्लोके
पातनान्ते द्विशेन्मतिमित्यादीनि । अन्ये तु सर्वत्र तात्-
योपदेशे .वर्तमानतानिर्देशात् । कर्मजापेक्षेऽपि देहे सत्ये-
वोपदेशेऽ ज्ञानं च देहापाये तु कैवल्यमेव । तथा च धर्म-
मर्यादास्थापनार्थं भैरव्यतानां स्वी रुद्रोदनादिप्रवर्तनाद्
यदि तु सा प्रामाणिकी तदा प्रारब्धमजीर्णा ज्ञानं तु तदैव
भवतीति मन्यन्ते । ननु श्रुतिभाले प्रकाश्यवस्तुस्वरूपस्वो-
दृशेषामाभिघातेन विदीर्णमाणावेदनमेषे व्याकुलमा-
न्तान्तरिन्द्रियस्य श्रवणात्मकशब्दस्य आपरोक्षसाक्षात्कार
एव दुर्लभः । सत्यपि तत्त्विंतद्वर्णो दुस्तथः साक्षिणि
सति तस्य सर्वेषां वेदान्तानां चाद्वितीये तात्पर्यनिर्धार-
णानुकूलविचारात्मकस्य तादृक्तात्पर्यविषयीभूतब्रह्मज्ञाना-
त्मकस्य वा श्रवणस्य मुख्यार्थस्य युक्तिभिरनुचिन्तनरू-
पस्य विपरीतभावनानिवृत्तिफलकमननस्यावधारणानु-
कूलतर्कानुसंधानात्मकस्य वा मननस्यासंभवः । अत एवा-
संभावनाविपरीतभावनयोरसत्यवधानसाक्षात्कारप्रतिबन्धक-
योरभावे च शब्दप्रमाणादुत्पन्नो ऽपि ब्रह्मसाक्षात्कारः पुरु-
षापराधसंभावनादिप्रतिबन्धाविद्यानिवर्तनक्षमः ।
तदनिवृत्तौ च तन्मूलकसंसारानिवृत्तेः कथं मोक्षः सकल-
स्यापीमस्य आत्मश्रुतिप्रतिपादकवचनजातं तद्द्वारा विध्ये-
कवाक्यतया तदर्थमाद् एवेति चेन्नैवम् । वृन्दारकवृन्द-
वन्दितपादारविन्दोऽभगवदनादिनिन्त्यवाक्यपरिषेव्यदिव-
श्रीपदकृपया श्रीकृष्णकृपया श्रीनाथस्य धनमल्पजपेद्वा-
निवृत्तिवत्कारणं सुतरां सकलवेदनानिपुणा विश्व-

सादकरणपाटवादिसंभवेन-श्रवणादिसंभवात् । अत एव मात्स्ये अन्तकाले मनुष्याणां म्रियमाणेषु मर्मसु । वायुना प्रेर्यमाणानां स्मृतिर्नैवोपपद्यते इति क्षेत्रान्तरमरणप्रकारमुक्त्वा । अविमुक्ते त्वन्तकाले भक्तानामीश्वरः स्वयम् । कर्मभिः प्रेर्यमाणानां कर्णजापं प्रयच्छति । ईश्वरप्रेरितो याति दुष्प्रापमकृतात्मभिरिति तुशब्देन क्षेत्रान्तरापेक्षया विशेषो ऽभिहितः स च मरणकाले स्मृत्युपपत्तिरूप एव । गारुडे च । मरणावसरे सकलश्रमनिवृत्तिः सहेतुकोक्ता अनिलो मृगनाभिरेणुगन्धैरधिकानि प्रसवोपद्रवकाले । इति मरणश्रमं नराणां हरणार्धकुचेश्वरीघनन्मेति ।

केचित्तु यथा स्वप्ने दृष्टेरेव सुषुप्त्येवेन्द्रियाणां चातीन्द्रियत्वेन तत्सृष्टेरभावे ऽपि श्रवणादिव्यवहारस्तथा जागरे ऽपि दीर्घस्वप्ने बाह्येन्द्रियाभावे ऽपि मनोमात्रेणैव श्रवणादिव्यवहार इति स्थिते ऽत्र मरणकाले बाह्येन्द्रियापेक्षामन्तरेण मनसैव श्रवणाद्युपपत्तौ काशीमरणादत्यन्तशुद्धस्य श्रीचन्द्रशेखरसाक्षात्काराकृष्टाशेषसंतापस्य तदनुग्रहात् सर्वविक्षेपापगमेन प्रत्यगभिन्नब्रह्मनिमग्नचित्तस्य अत एव संजाततत्त्वसाक्षात्कारस्य यथैवासंभावनादेः समूलस्यात्यन्तिको बाध उपपद्यत एव । ननु दीर्घकालनैरन्तर्यादरैरनुष्ठितश्रवणमनननिदिध्यासनादिकं विना शोधिततत्त्वंपदार्थसाक्षात्काराभावात् तादृशतत्पदार्थज्ञानासंभवाच्च न वाक्यार्थसाक्षात्कारोत्पत्तिः पदार्थबुद्धेर्वाक्यार्थबुद्धौ हेतुत्वादिति चेन्न । चिरत्वविशेषणवैयर्थ्यात् उत्तमाधिकारिषु शीघ्रमेव श्रवसंभवात् । न चावृत्तिरसकृदुपदेशादिति सूत्रविरोधः तस्य मध्यमाधमाधिकारिविषयत्वात् । न च काश्यां म्रियमाणानां सर्वेषां कथमुत्तमत्वमिति शङ्क्यम् ।

यतः स्थावराणां कृम्यादीनां च तत्त्वावबोधाधिकारं संपाद-
यितुर्विश्वेशस्य सर्वेषामुत्तमाधिकारित्वसंपादने न कश्चित्
प्रयत्नः । श्रूयते हि मार्कण्डेये परमेश्वरानुगृहीतमहर्षिवर-
प्रभावेण पक्षिणामुत्तमाधिकारित्वलाभेन वात्स्यपक्षि-
शीघ्रमेव तत्त्वसाक्षात्कारलाभः जैमिनिं प्रति पुराणव-
क्तृत्वं च । वासिष्ठे च श्रीसरस्वतीकरकमलस्पर्शप्रभावेण
भुशुण्डप्रमुखाणां काकानां तत्त्वसाक्षात्कारः तत्र भुशुण्डस्य
श्रीवसिष्ठं प्रति वक्तृत्वं च श्रूयते । एवं च परमेश्वरानु-
गृहीतानां किं किं न संभाव्यते । न चैवं श्रवणादेः साक्षा-
त्कारं प्रति व्यभिचारः । भगवत्कृपया वामदेवादिवत् पूर्व-
जन्मश्रवणादिकमनुष्ठितमेव । तदुक्तं पाराशरेण । अत्रैव
मरणं यस्य सिध्यति देहिनः । विज्ञानसाधनं तेन
सर्वं पूर्वमनुष्ठितमिति । तस्माच्छ्रीशंभुमुखचन्द्रनिःसृतप्र-
णवामृतस्य श्रुतिपुटेन पानाद्देहाद्यविद्यानिवृत्तिसिद्धेः
काशीमरणान्मुक्तिरित्यादिवाक्यानां नार्थवादतेति
सिद्धम् ।

एतेन मरणात्प्राक्साधनचतुष्टयसंपत्तेः प्रायेणानुपलम्भा-
त्तद्धितायोपदेशाभावे ऽथातो ब्रह्मजिज्ञासेति सूत्रे ऽथश-
ब्देन साधनचतुष्टयसंपत्त्यानन्तर्योक्तेः तत्संपन्नमेवाधिका-
रिणं प्रति वेदान्तशास्त्रारम्भो न स्यात् तदसत्त्वेऽपि श्रव-
णादिपरिहारेण काशीमरणादेव प्रयासपरिसिद्धेति परा-
स्तम् । बहुजन्मार्जितपुण्यपुञ्जप्रसादितेश्वरकृपया मरणा-
वसर एव साधनसंपत्तिस्वीकारात् । जीवदवस्थायामेव
सद्यो मोक्षप्रदविज्ञानोपायं श्रवणादिकं हस्तगतं त्यक्त्वे-
न्द्रियविहितकामादिविषयविवशस्य काश्यां मुक्तिकालिकवि-
लम्बनाय प्रवृत्त्यसंभवात् । किंच उपायान्तरमभिधाय वसेदा
ऽऽमरणाद्धीरो वाराणस्यां समाहित इति वदता महेश्वरे-

नैव यावज्जन्मकाश्यासा बहिर्विज्ञानसंपादनायुक्तत्वेन
काशीवासावश्यकत्वाङ्गीकाराच । काश्यां शतवर्षजीवि-
नामप्यन्ते प्रारब्धेन बहिर्मरणदर्शनाच शास्त्राधिकारिणां
सर्वेषां सिद्धगुरूपदेशान्वयं किन्नरादीनां काश्यां मानु-
षत्वसंभवत्वाच काशीमरणस्य मोक्षं प्रति साक्षाद्धेतुत्वाभा-
वात्तत्र कस्यापि मुमुक्षोः प्रवृत्तिर्न स्यादित्यपि न च वक्तव्यम् ।
परंपराहेतावपि प्रवृत्तिसंभवात् । अन्यथा मुमुक्षोः शास्त्रे
ऽपि प्रवृत्तिर्न स्यात्तथा चाविर्मोक्षप्रसङ्गः । न स्याच्च मुमु-
क्षोर्मोक्षजनकज्ञानप्रयोजनसंपादकत्वादौ स्वर्गकामस्य
स्वर्गसाधनयागसाधनपुरोडाशाद्युत्पत्तीक्रियणादौ च
प्रवृत्तिरिति वैदिकलौकिकसर्वव्यवहारोच्छेदप्रसङ्गः ।
तस्मात्काशीमरणान्मुक्तिरिति श्रुत्या ज्ञानसाधनमन्तरेण
मुक्त्युपपत्तिसामर्थ्यं संगृहीतं भवतीति गुरुमस्या पूर्व-
कुमारीवाक्यन्यायोदाहरणत्वाद् । तथा सितासिते सरिते
यत्र संगते तत्राप्लुतासो दिवमुत्पतन्ति ये वै तन्वं विसृ-
जन्त्यत्र धीरास्ते वै जनासो अमृतत्वं भजन्त इति श्रुति-
वाक्यं युक्तो ऽपि दुराचारो ब्रह्महत्यादिपातकी हरिं
ध्यात्वा त्यजेदेहं प्रयागे मुक्तिभाग्भवेदित्यादिपुराणवाक्यं
च यदन्तरेण मोक्षो नुपपन्नस्तत्सर्वमनेन न्यायेन कल्प-
यति । तत्र तावत्तमेव विदित्वेत्यादिश्रुतिविरोधाद्धरिं
ध्यायतो मुमुक्षोः प्रयागमरणावसरे तत्त्वज्ञानं भवतीति
कल्प्यते । ज्ञानं प्रति श्रवणादेर्व्यभिचारवारणायाध्ययनहि-
तोपायत्वनिवेशप्रयुक्तगौरवनिरासाय च जन्मान्तरीयश्र-
वणादिकारणं चादृष्टादिव कल्प्यते, काश्यामिव प्रयागे
ऽपि मुक्तिकाद्युपदेशो भवतीत्यसंभवात् । तथा च प्रया-
गमाहात्म्ये विना ज्ञानेन मुच्यन्त इत्यादिवचनं तज्जन्या-
त्कृष्टिश्रवणादिजन्यज्ञानं विना न मुच्यन्त इत्यर्थपरतया

बोध्यम् । चित्तशुद्धिस्तु भगवदर्पणबुद्ध्यनुष्ठितस्नानश्रा- द्धलिङ्गदर्शनादिभिर्भवतीति बोध्यम् तद्वचनानि ग्रन्थवि- स्तरभयान्नेह लिख्यन्ते । चिरायुषो च शमादयो ऽपीहानु- ष्ठानात्सिध्यन्तीति सर्वं पूर्ववज्ज्ञेयम् । इयांस्तु विशेषः पक्वाम्रस्य वृन्तस्य तन्तुमात्रस्य भेदः प्रयासे तु स्वयं कालेन वा वृन्तस्य शुष्कतयैव भेदः । अन्येषां तु यत्प्रा- तीच्छया यो वृन्तस्थानितैव तस्य भवतीति । स च विशेषविशिष्टस्तु नाम वृद्धान्तस्मृत्यादेरेतन्न्यायोदाहरणत्वे तु न का ऽपि क्षतिः । इति वृद्धकुमारीवाक्यन्या० । अयमेव कैश्चित् वृद्धकुमारीवरन्यायत्वेनोदाह्रियते १४ । ७९ ।

अत्रापि प्रसङ्गात्पठितं न्यायत्रयम् । अन्ते या मतिः सा गतिरिति न्या० । १५ । ८० ।

ब्राह्मणश्रमणन्या० । श्रमणो बौद्धयतिः यथा तस्या- शास्त्रीयविधिना स्वकशिखासूत्रत्यागादेस्त्यक्तनित्यादिक- र्मणश्चेदानीं ब्राह्मणत्वाभावे ऽपि भूतपूर्वेण ब्राह्मणत्वेन निर्देशस्तथा विरक्तानां संन्यासिनामपि प्राक्तनया मानव- संज्ञया निर्देश इत्युदाहरणसंगतिः । एवं विज्ञातारमरे केन विजानीयादिति श्रुतजीवपरतया वृद्धैर्विवृतायां श्रुतौ विज्ञातृत्वोक्तिर्निरुपाधिके तस्मिंस्तदसंभवादनेन न्यायेन भूतपूर्वगत्यैव संगच्छत इति बोध्यम् । १६ । ८१ ।

अत्र तु भाविसंज्ञया निर्देशो यथा नारदो धर्मेन्द्रा- ण्याभिमन्यं तत्र सूत्रशाटिकान्यायावतारः । सूत्रस्य शा- टिकां वाययतीत्यत्र यथा सूत्रावस्थायां भाविन्या शाटि- केति संज्ञया निर्देशस्तथा दार्ष्टान्तिके ऽपीति बोध्यम् । १७ । ८२ ।

अज्ञातकुलनामगोत्रशीलन्यायो ऽप्यवतरति १८ । ८३ ।

आभाणकन्या० । आभाणकं लौकिकी गाथा । न्यायो ऽयं सर्वैराख्यातविषयः । ३९ । ८४ ।

कुमारीन्यायविषय एव जलानयनन्यायो ऽप्यवतरति तद्यथा जलमानीयतामित्युक्ते ऽनोदितमपि पात्रानयनं जलानयने ऽन्तर्भवति एवमिहापि बोध्यम् । ४० । ८५ ।

एतेनाग्न्यानयनन्यायो व्याख्यातः । ४१ । ८६ ।

इक्षुरसन्या० व्याख्यातोऽप्ययम् । ४२ । ८७ ।

इक्षुविकारन्यायो ऽप्येतद्विषये प्रवर्तते । इक्षूणां विकारेष्वपि हि रसगुडशर्करासितासु माधुर्यसामान्ये तारतम्यादेव विभिन्नरूपत्वं दृश्यते तथा सत्त्वादिष्वपीति बोध्यम् । ४३ । ८८ ।

व्रीहिबीजन्या० व्याख्यातः ४४ । ८९ ।

राजसं तामसं चेति न्यायः । ४५ । ९० ।

यः कुरुते स भुङ्क्ते इति न्यायश्च स्पष्टः ४६ । ९१ ।

कीटभृङ्गन्या० । कीटो यथा भृङ्गेण गृहीतस्तद्भयात्तमभिध्यायंस्तत्स्वरूपतामेति तथा हरिहरौ प्रेम्णा ऽन्योन्यध्यानादन्योन्यात्मकतां प्राप्तावित्यर्थः । ४७ । ९२ ।

अश्मलोष्टन्या० । यथा तूलाद्यपेक्षयाऽतिकठिनस्यापि लोष्टस्याश्मापेक्षया मृदुत्वं तथा प्रकृते ऽपीत्यर्थः ४८ । ९३ ।

अयं वैषम्याधिक्यविवक्षायां स्वल्पवैषम्यविवक्षायां तु पाषाणेष्टिकान्या० । ४९ । ९४ ।

बिल्वखल्वाटन्या० । अयं केन चित्पद्येन निबद्धः । तद्यथा । खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः । तत्रा-

च्याशु मुद्गरकलेन पतता भग्नं तमन्धं शिरः प्राणो गच्छति तत्र भाग्यरहितस्त्वापदां भाजनमिति । ५० । ६५ ।

कोशपानन्या० । कोशपानं दिव्यविशेषस्तस्य न्यायः तथाह्यारब्धेऽर्थ दुर्गादीनुग्रान्देवान्पूजयित्वा तत्स्नानोदकं चाहृत्य तेन त्वं शापितो प्राश इत्यादिमन्त्रेण शाक्षिका-कसतोयं संश्राव्य तेनैव च तत्तोयं पात्रान्तरे कृत्वा तस्यैव सा ऽभिरक्षेत्यनेनाभिमन्त्रितं प्रसृतित्रयं पाययेत् । एवं कृते चतुर्दशादिनाभ्यन्तरे यस्य राजनिमित्तं दैवं वा घोरं दुःखं न जायते स शुद्धः चतुरो ऽन्यः । तथा च सर्वदिव्यसाधारणसर्वदिनोपवासयत्नशौरस्य तत्पानकाले सुखं भवति शास्त्रनिर्दिष्टावधिकाले तु महत् दुःखं यथा तथा हरिहरादिष्वेकस्य भक्तिभ्राजैनेतरनिन्दां कुर्वतो निन्दाव्यसनिनो यद्यपि तत्काले स्वान्तिकं चित्सुखं तथा ऽपि निन्दाजन्यायपरिपाककाले ऽतिघोरं नरकादिदुःखं भवतीति न्यायसंगतिः । ५१ । ६६ ।

यद्वा त्वींगकोपाख्यौषधमेव निम्बकस्य दुग्धं स्यात्तदा तत्कृतस्पष्टग्न्यायप्रवृत्तिः इदमपि दिव्यम् । एवमग्रे ऽपि दिव्यम् । एवमग्रे ऽपि बहुषु न्यायेषु बोध्यम् । तदित्थं शुक्लाज्ञस्थापितत्रपुशलाकादित्यपृष्ठे कृत्वा स्नानोदकेन संसिच्य रात्रौ तत्रैव वासयेत् प्रातः स्नातं प्राङ्मुखमुपोषितं भक्षयित्वा पिप्पलपत्रे निष्ठीवयेत् । एवं कृते यस्य मुखरौधिरं दृश्यते तालु च शीर्णं कम्पते च गात्रं सो ऽशुद्धः शुद्धो ऽन्य इति । ५२ । ६७ ।

विषभक्षणन्यायो ऽपीह बोध्यः । तद्यथा कुलोपकारः प्राड्विवाकः शंभुं संपूज्य तदग्रे विषं संस्थाप्य त्वं विष ब्रह्मणा सृष्टमित्यादिना ऽभिमन्त्र्य निंबकुशेन घृतेन

संयोज्य च दक्षिणाभिमुखाय शीतलदेशे निविष्टाय दद्यात् । एवं कृते आकल्पतालिकापर्यन्तपञ्चकं यो निर्विकारः स शुद्धः । अनन्तरं चिकित्सनीयः । अशुद्धो ऽन्यः । ५३ । ९८ ।

सत्याभिसंधस्य मोक्षो बन्धो ऽनृतस्येति विवक्षायां तप्तपरशुग्रहणन्यायो ऽवतरति । अयं चोदाहरणं श्रुत्योपपादितः । पुरुषं सोम्योत हस्तगृहीतमानयन्ति अपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति । स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते । सो ऽनृताभिसंधो ऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यते ऽथ हन्यते । अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते सत्याभिसंधः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यते ऽथ मुच्यते स यथा तत्र न दह्येत ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति । ५४ । ९९ ।

घटारोहणन्यायो धर्माधर्मन्यायस्तप्तमाषिकोद्धरणन्याय उदकनिमज्जनन्यायश्चापीह प्रवर्तते । तत्र तावद्घटारोहणप्रकार उच्यते सर्वदिव्यसाधारणकर्मानुष्ठानानन्तरं प्राड्विवाको घटं घट त्वं ब्रह्मणा सृष्ट इत्यादिमन्त्रेणामन्त्रयते शोध्यस्तु त्वं तुलेत्यादिना मन्त्रेण घटापरनामधेयां तुलामभ्यर्थयते । अनन्तरं प्राड्विवाकः शोध्यं तुलामारोपयति आरोपितं च विनाडीपञ्चकं यावत्तथैवावस्थापयति । दशगुर्वक्षरोच्चारणकालः प्राणः षट्प्राणा विनाडी शुद्ध्यशुद्धिनिर्णयकारणं वेद्यम् । तुलितो यदि वर्धेत स शुद्धः स्यान्न संशयः । समो वा हीयमानो वा न विशुद्धो भवेन्नर इति । ५५ । १०० ।

धर्माधर्मदिव्यविधिः राजतं कारयेद्धर्ममधर्मं सीसकायसम् । लिखेद्भूर्जे पटे वापि धर्माधर्मौ सितासितौ ।

अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत्। सितपुष्पस्तु धर्मः स्यादधर्मो ऽसितपुष्पकम्। एवंविधावुपालिख्य पिण्डयोस्तौ निधापयेत्। गोमयेन मृदा वापि पिण्डौ कार्यौ समन्ततः। मृद्भाण्डके ऽनुपहते स्थाप्यौ चानुपलक्षितौ। उपलिप्ते शुचौ देशे देवब्राह्मणसंनिधौ। आवाहयेत्ततो देवांल्लोकपालांश्च पूर्ववत्। धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत्। ततः यदि पापविमुक्तो ऽहं धर्मस्त्वायातु मे करे इत्यभिशस्तोऽभिमन्त्रयेत्। अभियुक्तस्तयोरेकं प्रगृह्णीतापविलम्बितः। धर्मे गृहीते शुद्धिः स्यादधर्मे तु स हीयते इत्यादिना पितामहेनोक्तः। ५६। १०१।

एकवतिलतैलादेः शैत्यसंपादकोऽन्तरेण शोध्यस्य करे स्फोटाद्यभावे शुद्धिः अन्यथा त्वशुद्धिः। ५७। १०२।

शोध्यस्य निमज्जनसमये तत्स्थानात्क्षिप्तं शरमादाय तत्पतनस्थाने स्थितो नरो यावद्वेगेन शोध्यस्थानमागत्य सन्निहितोऽतिरिक्तं शुष्कालिकादिरूपं तदवयवं न पश्यति तदा स शुद्ध इतरथा त्वशुद्ध इति। एते ऽपि न्यायाः परशुप्रदानन्यायविषये प्रवर्तन्ते घटन्यायश्च कोशपानविषये तण्डुलभक्षणविषये ऽपि च वर्तते इति बोध्यम्। ५८। १०३।

त्याज्या कुत्सादिवीति न्या०। ५९। १०४।

वैराग्यमात्रान्मायाद्यन्त्यनिर्वह इति न्या०। ६०। १०५।

काकदधिघातकन्या० यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदं दधिघातकपरकं तथा प्रकृते ऽपीत्यर्थः। ६१। १०६।

गयापसिन्या०। ६२। १०७।

निखनस्थूणन्या० । ६३ । १०८ ।

नीरक्षीरन्या० । ६४ । १०९ ।

मेघाकाशन्या० । इदं न्यायचतुष्टयं स्वस्थाने व्याख्यातम् । ६५ । ११० ।

येनोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थ इति न्या० इदं परार्थानुमाने प्रसिद्धम् । यत्स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानं पञ्चावयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाः तत्र गिरिरग्निमानिति प्रतिज्ञा धूमादिति हेतुः यो यो धूमवान्सो ऽग्निमान्यथा महानस इत्युदाहरणम् । धूमवांश्चायमित्युपनयः । तस्मादग्निमानिति निगमनमिति । साध्यवत्तया पक्षवचनं प्रतिज्ञा पञ्चम्यन्तलिङ्गप्रतिपादकं हेतुः व्याप्तिप्रतिपादकमुदाहरणं पक्षधर्मताज्ञानार्थमुपनयः हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम् । तथा च यथा ऽत्र पक्षस्य साध्यवत्तयोपक्रमस्तत्तयैव चोपसंहार इति तदेव वाक्यार्थस्तथा प्रकृते ऽपीति बोध्यम् । ६६ । १११ ।

संभवत्येकवाक्यत्व इति न्या० । ६७ । ११२ ।

एकवाक्यतापन्नानामिति न्या० । ६८ । ११३ ।

अपन्थानं तु गच्छन्तमिति न्या० । ६९ । ११४ ।

वध्यतां बध्यतामेवेति । ७० । ११५ ।

विषवृक्षो ऽपीति न्या० । ७१ । ११६ ।

यस्मार्थे भूपतत्विति । ७२ । ११७ ।

इदं न्यायषट्कं स्वस्थाने संदंशन्यायेन स्फुटतया प्रतीयते स्वभावतो ऽपि स्पष्टार्थं चेति नेह व्याख्यातम् । ७३ । ११८ ।

तालस्थालाच्छब्दमिति न्या० मुद्रिकयेन्द्रः क्रीतः ।

द्वारात्स्थूलपथः सूक्ष्म इत्यादौ काष्ठपुरुषादीनामुद्गारादि-लिङ्गत्वादुद्गारादिशब्दविषयत्वं यथा तथा प्रकृते ऽपीत्यर्थः । यजमानपञ्चमा इडां भक्षयन्तीत्यस्योदाहरणं बोध्यम् । ७४ । ११९ ।

एकं संधित्सतो ऽपरं प्रच्यवत इति न्या० । यथैकं कांस्यपात्राद्यन्यतरं संधातुमिच्छतो ऽपरं तदन्यत्स्थानचलनयोगादेः प्रच्यवते । ७५ । १२० ।

सुतजनिव्यतिन्यायो ऽपीदृशः । यथा कश्चित्कं चिद्देवमाराध्य ततः पुत्रं लब्ध्वा चान्यपुत्रलाभाय देवान्तरमाराध्य तत्सुतं लब्ध्वा तज्जन्मक्षण एव च पूर्वदेवकोपात्पूर्वमरणं तथा प्रकृते ऽपि ज्ञातमित्यर्थः । ७६ । १२१ ।

सार्वजनीनस्तुल्यायव्ययन्यायो ऽपीह बोध्यः । ७७ । १२२ ।

पतन्तमनुधावतो वज्रो ऽपि गत इति न्या० । पतन्तं कं चिच्चिल्लादिकास्यसंयोगीय गच्छन्तं पक्षिणमनुधावतो लोष्टान्तकस्य वज्रो ऽपि पक्षी यथा गतस्तथा प्रकृते ऽपीत्यर्थः । ७८ । १२३ ।

श्यालशुनकन्या० । इत्थं हि लौकिकी गाथा कश्चित्कुतुकी स्वसमक्षे शुनि श्यालनामसंकेतं कृत्वा स्वस्त्रीकोपोत्पादाय तं गालीर्ददौ सा च तं भ्रातरं मत्वा ऽतिकोपपरीतात्मतया ऽतिदुःखिता बभूवेति । तथा च यथा श्वाभ्रातरि शुनि भ्रातृताभ्रान्तिमत्या भार्यायाः कोपनाय भर्त्रा श्वनिन्दा क्रियते तथा ऽन्यत्रापि स्वे ऽपि तत्तद्विग्रहावच्छिन्ने परात्मनि भेदभ्रमवतां कोपोत्पादाय शास्त्रेण तद्भिन्नविग्रहावच्छिन्नेश्वरनिन्दाव्याजेनान्यविग्रहावच्छिन्नेशस्तुतिः क्रियते । अथ वा कार्यद्वयापि चिह्नवाटी जिह्वया-

दिनाद्यसंकेतं कृत्वा यागेन तन्न्यूनताबुद्ध्या विध्यादिस्तुतिः क्रियतइति भावः । ७९ । १२४ ।

न हि निन्दा निन्दितुं प्रवर्तते अपि तु विधेयं स्तोतुमिति न्या० केवलायां निन्दायां प्रयोजनाभावात् भावाभावपरत्वे वाक्यभेदप्रसङ्गाच्चेति भावार्थो ऽस्य प्रागेवोक्तः अक्षरार्थस्तु स्पष्टः । ८० । १२५ ।

यश्चोभयोः समो दोष इति न्या० । ८१ । १२६ ।

उपवासादवरं भिक्षेति न्या० । वरमिति सामान्ये नपुंसकम् एकवचने ऽपि । ८२ । १२७ ।

शालिसक्तैः कोद्रवाच्छादनन्या० । ८३ । १२८ ।

कूपखानकन्या० । यथा कूपखानके पतितं पङ्कादि कूपाविःसृतेनाम्भसा प्रक्षाल्यते तथा तत्तद्विग्रहार्चनकिञ्चिद्भेदबुद्धिजो दोषस्तदुपासनाजन्यशुद्धान्तःकरणविशेषोत्पन्नाद्वैतबोधेन तत्सर्वं निवर्त्यतइति ज्ञेयम् । ८४ । १२९ ।

निखातप्रपादन्या० । अयं स्वस्थाने स्पष्टं प्रतीयते । ८५ । १३० ।

घृते पक्वान्नवदिति न्या० । ८६ । १३१ ।

यादृशो यक्षस्तादृशो बलिरिति न्या० । ८७ । १३२ ।

यादृशं मुखं तादृशी चपेटेति न्यायो ऽपीह बोध्यः । ८८ । १३३ ।

भारभयात् वहीतोऽप्यन्यद्वहं स्वीकरोतीति न्या० । ८९ । १३४ ।

मरणाद्वरं व्याधिरिति न्यायो ऽपीह ज्ञेयः । ९० । १३५ ।

एकाकिनी प्रतिज्ञा हीति न्या० । ९१ । १३६ ।

न हि प्रतिज्ञामात्रेणार्थसिद्धिरिति न्यायो ऽप्येतदर्थः

एतयोरैक्ये ऽपि स्वरूपभेदमाश्रित्य भेदेन निर्देश इति बोध्यम् । ६२ । १३७ ।

शतपत्रपत्रशतभेदन्या० । यथा सूच्या पद्मपत्रशतभेदने कालयौगपद्यप्रतीतिर्भ्रमस्तथेत्यर्थः । ६३ । १३८ ।

षट्कुटीप्रभातन्या० यथा षट्कुटीस्थेभ्यः करग्राहिभ्यो भीत्या रात्रौ पलायितानां पथिकजनानां पथिज्ञां दूरं गत्वा ऽपि यथा भ्रान्तिवशात् षट्कुट्यामेव प्रभातोदय इति लोके प्रसिद्धं तथा प्रकृते ऽपि जातमिति तदैव स्पष्टम् । ६४ । १३९ ।

वरघाताय कन्यावरणमिति न्या० । अयमेव च निम्बे हि वरघाताय कन्यामुद्वाहयन्तीति लिख्यते । ६५ । १४० ।

नष्टाश्वदग्धरथन्या० । तौ हि रथिनौ कं चित् ग्रामं प्रविश्य रथादश्वांश्च ताभ्यां मोचयित्वा स्वकुटे निविष्टौ । ततो दैवेन दंदह्यमाने ग्रामे तयोरेकः पञ्चास्याग्निः सारयिष्यामीति धिया रथमादौ निःसारितवान् । अपरस्त्वश्वान् । तावता तस्मिन् दाहे दग्धे एकस्याश्वा नष्टा द्वितीयस्य रथो दग्धः तौ च यथा ऽन्योन्याकाङ्क्षितैकं रथं कृत्वा स्वेष्टदेशं प्राप्नुतस्तथा ऽर्थादपिपिताख्ये प्रधानाङ्गवाक्ये परस्पराकाङ्क्षितैकवाक्यतां प्राप्य प्रवृत्त्यादि जनयत इति संक्षेपः । ६६ । १४१ ।

यदा तु निराकाङ्क्षे ऽपि वाक्ये साकाङ्क्षत्वमुत्पाद्यैकवाक्यता क्रियते तदा रथदग्धन्यायप्रवृत्तिः । यथा घटो ऽस्तीति वाक्यस्य निराकाङ्क्षस्यापि कीदृश इत्याकाङ्क्षामुत्पाद्य रक्त इत्यनेनैकवाक्यता क्रियते तथा प्रकृतीनां दर्शपूर्णमासादीनां स्वप्रकरणस्थाङ्गैर्निवृत्तोपकाराकाङ्क्षाणामप्यन्याधीनाङ्गैर्विकृतीनां चातिदेशाद्यैः परिपू

श्रौतं शरमयत्वादिभिः सहोत्थिताकाङ्क्षाविरहे ऽनुत्था-
पिताकाङ्क्षया ऽन्वय इति संक्षेपः । ९७ । १४२ ।

सविशेषणे हि वर्तमानौ विधिनिषेधौ सति विशे-ष्यबाधे विशेषणमुपसंक्रामत इति न्या० । घटाकाशमानय न मठाकाशमित्यानयनविषयौ विधिनिषेधौ विशेष्ये आकाशे बाधात् घटादिरूपं विशेषणमुपसंक्रामतस्तथा प्रकृते ऽपि । न च निषेधस्य कथं बाधः तस्य प्रसक्तिपूर्वक-त्वात् तदभावे ऽनुपपत्तेः । किं चात्र विधिनिषेधशब्दौ भावाभावबोधकौ तथा च घटाकाशो ऽऽनीतो न मठाकाशः घटाकाश उत्पन्नः शरावाकाशो विनष्ट इत्यादौ भावाभावौ विशेष्ये बाधाद्विशेषणमुपसंक्रामतस्तथा प्रकृते ऽपि विशेष्ये बाधाद्विशेषणे तयोः पर्यवसानमित्यर्थः । ९८ । १४३ ।

सावकाशनिरवकाशन्यायः स्वस्थाने स्पष्टः । ९९ । १४४ ।

अहिकुण्डलन्या० । १०० । १४५ ।

प्रकाशाश्रयन्या० । इदं न्यायद्वयं स्वस्थाने व्याख्या-तम् । १०१ । १४६ ।

गुडजिह्विकान्या० । यथा तिक्तत्वभीत्या निम्बपान-मकुर्वाणस्य बालस्य जिह्वायां गुडलेपनं कृत्वा तं निम्बं पाययन्ति तथा ऽर्थवादवाक्यानि कष्टे कर्मण्यप्रवर्तमानं पुरुषं स्वर्गाद्युत्कृष्टफलादिकं श्रावयित्वा 'तस्मिन्प्रवर्तय-न्तीति संक्षेपः । १०२ । १४७ ।

यत्कृतकं तदनित्यमिति न्या० । १०३ । १४८ ।

नहि दृष्टे ऽनुपपन्नं नामेति न्या० १०४ । १४९ ।

न हि कारकव्यपदेशेनार्थादर्थापेक्षेति न्यायः । १०५ । १५० ।

प्रत्यक्षे किमनुमानमिति न्यायश्चैतत्कल्पः । १०६ । १५१ ।

भक्षितेऽपि लशुन इति न्या० १०७ । १५२ ।

रज्जुसर्पन्यायः यथा रज्जोरज्ञातायाः सर्पात्मना भानं ज्ञातायास्तु स्वरूपेण तथा ब्रह्मणो ऽनवबुद्धस्य प्रपञ्चत्वेन बुद्धस्य निष्प्रपञ्चत्वेन भानं न मानान्तरविरुद्धमित्यर्थः । १०८ । १५३ ।

नाहमीश्वर इति प्रत्यक्षविरोधपरिहारार्थौपाधिकाकारभेदन्यायावतारः । यथौपाधिकाकारभेदविषयं मानं सविशेषणे हीति न्यायेनोपाधिगोचरं तथा जीवेश्वरभेदप्रत्यक्षादि तदुपाधिभेदविषयमिति न तेन तदैक्यप्रमाणविरोध इति दिक् । १०९ । १५४ ।

इति वृद्धप्रकल्पनन्यायान्तर्गतास्तैः संगताश्च न्याया व्याख्याताः । केचित्तु प्रधानेनेति पठन्ति तदस्तु नामार्थे तु नाणुरपि विशेषो ऽस्ति प्रधानेनेत्यपि क्वचित्पाठः । यत्रान्योन्यविरुद्धानामपि संभूयैककार्यकारित्वं तत्र प्रदीपन्यायावतारः । यथाहि वर्त्तितैले वह्निविरोधिनी अप्युपरि तैलपाते ऽग्निनाशात् । वर्त्तिरपि स्वल्पकालेनाग्निनाशिका । ते च त्रयः अथ च संभूय प्रकाशलक्षणमेकं कार्यं कुर्वन्ति । तथा सत्त्वरजस्तमांसि परस्परं विरुद्धान्यपि संभूयैकं देहादिकं प्रीत्यादिकं च कार्यं जनयन्ति । तथा हि सत्त्वमेव लघु । लघु हि कार्योद्गमने हेतुर्येन लाघवं यतो ऽग्नेरूर्ध्वज्वलनं जीवानां चोर्ध्वं गच्छन्ति सत्त्वस्था इति स्मृतिसिद्धमूर्ध्वगमनम् । प्रकाशकं च सत्त्वात्संजायते ज्ञानमिति स्मृतेः । सुखकारणं च सत्त्वं सुखे संजयतीति स्मृतेः । तथा च लघुत्वे सति ज्ञानसुखहेतुत्वं सत्त्व-

लघुत्वम्। रज उपष्टम्भकं संश्लेषजनकं सत्त्वतमसी स्वयम-क्रियतया स्वकार्यप्रवृत्तिं प्रत्यवसीदन्ती रजसोपष्टभ्येते । अवसादात्प्रच्याव्य स्वकार्ये प्रयत्नं कार्यते । चलं च रजः चलत्वं च सक्रियत्वम् । एवं च प्रवृत्तिहेतुत्वं रजसः । तथा च स्मृतिः । रजसो लोभ एव चेति । लोभस्य च प्रवर्तकत्वं प्रसिद्धमेव दुःखकारणं च रजः रजः कर्माणि आतनोतीति स्मृतेः । कर्मणां दुःखहेतुत्वं च सर्वानुभवसिद्धं कर्तुं कर्मेति न्यायसिद्धम् । तथा च प्रेरकत्वे सति सक्रियत्वे च सति दुःखहेतुत्वं रजोलक्षणम् । तमस्तु गुरु आवरकं मोहकरं च भवति । तथा च गुरुत्वे सत्यावरकत्वे च सति मोहकत्वं तल्लक्षणम् । एतेनैतेषां विरुद्धत्वं प्रतीयते विरुद्धे चैषां संभूयैककार्यजनकत्वम् । तत्र रज उभयोः स्वकार्ये प्रवर्तनं तच्च परिणतगुरुत्वं चावरकगुणा आवृण्वता तमसा तत्र तत्र प्रवृत्तिप्रतिबन्धेन क्वचिदेव प्रवर्त्यते ततस्तमो व्यावृत्त्येति तमसो नियामकत्वम् । सत्त्वं च प्रवृत्तिविषयद्रव्याद्यवभासकम् । न हि चक्षुरादिज्ञानं विना सक्रियत्वा प्रवृत्तिः । तस्मादेषामन्योन्यं विरुद्धानामपि संभूयैकप्रवृत्त्यादिकार्यहेतुत्वम् । तथा देहादिषु सर्वकार्येष्वपि ज्ञेयम् । तथा हि सुखदुःखमोहाः परस्परं विरोधिनः स्वानुरूपाणि सुखादीनि निमित्तानि कल्पयन्ति । तद्यथा एकैव नारी भासती स्त्री रूपयौवनादिसंपन्ना पतिं सुखाकरोति दुःखाकरोति च सपत्नीः मोहयति च नरान्तरम् । तत्कस्य हेतोः तं प्रति तस्यास्तद्रूपसमुद्भवात् । एतेन आसीन्यायो व्याख्यातः न चैकस्य त्रिरूपत्वमयुक्तम् । वह्निन्यायेनोपपत्तेः यथा ह्येकस्यापि वह्नेर्दाहकत्वं पाचकत्वं प्रकाशत्वं च तथा सत्त्वादेरपि किं न स्यादिति । कार्यजातं च कारणे सदैव कूर्माङ्गन्यायेन निःसरति पुनश्च तत्रैव लीयते ।

यथा कूर्मो देहे स्वान्येवाङ्गानि निःसारयति विघटयते इदं कूर्मशरीरमेतान्येतस्याङ्गानीति । एवं निर्विकाराणामपि सत्त्वा-न्यथाभवन्ति । तथा सुवर्णाद्रेव विकारा कटकमुकुटादीनि इति प्रदीपन्यायः ११० । १५२ ।

कूर्माङ्गन्यायस्य तदर्थो निगडव्याख्यानः पिण्डं न्यायमयं तु स्वस्थाने व्याख्यातम् । १११ । १५३ ॥

वातादिन्यायोऽपीह बोध्यः । वातपित्तश्लेष्माणो हि अन्योन्यविरोधिनो ऽपि देहधारणलक्षणैककार्यकृत इति प्रसिद्धम् । ११२ । १५७ ॥

भ्वादिन्यायस्तु यथा भूसत्तायामित्यादयो धातवो गृह्यन्ते तदेकरूपोपाधिभेदेन नानात्वविषयतां प्रवर्तन्ते । तथैक एव धातुरुपसर्गप्रत्ययरूपोपाधिभेदेन नानात्वं भजति तद्यथा करणं क्रिया कर्तेत्यादौ प्रत्ययभेदेन पराभवो ऽनुभव इत्यादौ चोपसर्गभेदेन रूपार्थभेदः प्रतीयते तथैकस्येव ब्रह्मोपाधिभेदेन नानेवावभासत इति । यदि तु भ्वादिगणेन पृथिव्यादयो विवक्षितास्तदा सूक्तविषय एवास्य प्रवृत्तिः प्रसिद्धं हि परस्परविरुद्धानामपि तेषां संभूयैककार्यकारित्वमिति भ्वादिन्यायः । ११३ । १५८ ॥

यत्रोभयोरुपकार्योपकारिभावेनान्योन्यापेक्षया संबन्धे सति कार्योत्पत्तिस्तत्रान्धपङ्गुन्यायः । यथा हि कश्चित्पुरुषो दृक्शक्तिसंपन्नः प्रवृत्तिविहीनः पङ्गुरन्यं पुरुषं प्रवृत्तिमन्तं दृक्शक्तिरहितमन्धमाश्रित्य प्रवर्तयति किंचित्फलमुद्दिश्य । तथा चेतनः पुरुषः स्वयमप्रवर्तमानः प्रवृत्तिशक्तिमदचेतनं प्रधानं प्रवर्तयति तत्र प्रधानं स्वकर्मकपुरुषकर्तृकदर्शनार्थं पुरुषमपेक्षते भोग्यं हि प्रधानं न च भोक्तारं विना भोग्यस्य भोग्यत्वं संभवतीति पुरुषाऽस्य

भोगापेक्षा । पुरुषस्तु मोक्षार्थं प्रधानमपेक्षते । तथा हि भोग्येन हि प्रधानेन संबद्धः पुरुषस्तद्गतं दुःखत्रयमात्मन्यभिमन्यमानः मोक्षं प्रार्थयते स च सत्त्वपुरुषान्यताख्यातिनिबन्धनः न च सा प्रधानं विनेति भवति पुरुषस्य मोक्षाय प्रधानापेक्षा । अनादिश्चायं संबन्धपरंपराया भोगाय संबद्धो ऽपि मोक्षाय पुनः संयुज्यत इति युक्तम् । यथा चान्धपङ्गुसंयोगः स्वजन्यगमनादिकं विना नैष्फल्यभये इति स एव तदर्थं गमनादिकमुत्पादयति तथा प्रकृतिपुरुषसंबन्धो ऽपि न भोगाय न मोक्षाय च पर्याप्त इति स एव तदर्थं करोतीति दिक् । ११४ । १५९ ॥

ननु सांख्यैः प्रधानस्य स्वतन्त्रस्य प्रवृत्त्युपगमात् पुरुषस्य च प्रवर्तकत्वास्वीकारात् तथा च तेषामपसिद्धान्तः स्यात् कथं चोदासीनः पुरुषः प्रधानं प्रवर्तयेत् । पङ्गुरपि ह्यन्धं वागादिभिः प्रवर्तयति । नैवं पुरुषस्य कश्चित्प्रवर्तनव्यापारो ऽस्ति निष्क्रियत्वान्निर्गुणत्वाच्चेति शङ्कानिरासाय सो ऽयं चुम्बकन्यायो ऽवतरति । यथा चुम्बकमणिः स्वयमप्रवर्तमानो ऽपि लोहं प्रवर्तयति तथा पुरुषः प्रधानं प्रवर्तयिष्यतीति । अयं न्यायो ब्रह्मवादिमते ऽपि प्रवर्तते । इयांस्तु विशेषः ब्रह्मवादिभिरनिर्वचनीयस्याव्याकृतस्य मायाप्र[illegible]संबन्धस्याङ्गीकारान्न तन्मते को ऽपि दोषः ब्रह्मण्यपि प्रवर्तकत्वस्याप्यनिर्वचनीयत्वाङ्गीकारान्न कौटस्थ्यहानिरपि । सांख्यमते तु चुम्बकस्यानित्यसंनिधिविशेष व्यापारः प्रधानपुरुषसंनिधेस्तु नित्यत्वेन व्यापारत्वायोगः । तुष्यतु दुर्जन इति न्यायान्नित्यस्यापि व्यापारत्वोपगमे प्रधानप्रवृत्त्यविच्छेद इत्यादयो दोषा वज्रलेपवदनिवार्या इति दिक् । ११५ । १६० ॥

तुष्यत्विति न्यायः प्रासङ्गिकः । ११६ । १६१ ॥

इति सकलकल्याणगुणसमूहशरण्यश्रीनानकसद्वंशस-न्मौक्तिकश्रीरामदयालुशिष्येण सोमवंशीयमिन्द्रराजकुलो-त्तंसश्रीगुलाबरायवर्मात्मजेनोदासीनवर्येण रघुनाथव-र्मणा विरचिते लौकिकन्यायसंग्रहे प्रमेयनिरूपणपरः पूर्व-भागः ।

अथ प्रमाणनिरूपणप्रचुरो भागः प्रारभ्यते । अत्रैव च प्रसङ्गात्पूर्वोक्तार्थो ऽपि द्रढीक्रियते । यदा हि तरति शोकमात्मविदित्यादौ प्राचीनमार्गिकमतमाश्रित्यानेक-पदार्थस्मरणाद्युगपदेव विशेष्ये विशेषणं तत्र विशेषणान्त-रमिति न्यायेन सर्वपदार्थानामन्योन्यं क्रियाकर्मभावेना-न्वयरूपः शाब्दबोधः स्वीक्रियते तदा खलेकपोतन्यायो ऽवतरति । यथा ऽऽहुः वृद्धा युवानः शिशवः कपोताः खले यथा ऽमी युगपत्पतन्ति । तथैव सर्वे युगपत्पदार्थाः परस्प-रेणान्वयिनो भवन्तीति । अत्र वृद्धयुवशिशुभिः कपोतैश्चि-रतरचिरसन्निहितकालोक्तानां पदार्थानां साम्यं बोध्यम् । न चोत्तरपदार्थस्मरणेन पूर्वपदार्थस्मरणनाशात्कथं युगपत्स-र्वपदार्थस्मरणमिति शङ्क्यम् । प्रत्येकपदार्थानुभवजन्यसं-स्कारैरन्त्यस्य तावद्विषयकस्मरणस्योत्पत्तिसंभवात् । एतेन विशेष्ये विशेषणमिति न्यायो ऽपि व्याख्यातः । यदि तु स्वार्थोपस्थितिविषयो भवति तेन तेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यते । अनन्तरं च सकलवाक्यार्थबोध इति नव्य-नैयायिकमतमाश्रित्य विशिष्टस्य वैशिष्ट्यार्थाकाङ्क्षितं यो-ग्यं च पदत्वमिति न्यायेन शाब्दबोधो ऽङ्गीक्रियते तदा राजपुरप्रवेशन्यायः प्रवर्तते । तत्र हि क्रमेणैव बहूनां पुरु-षाणां प्रवेशो भवति न युगपत् । अस्मिन्मते पूर्वोक्तं सङ्कु-लनात्मकं स्मरणं विना ऽपि निर्वाह इति संक्षेपः । १ ।

अथ विशिष्टवैशिष्ट्यन्यायो व्याख्यातः । ४ ।

नाज्ञातविशेषणा विशिष्टबुद्धिर्विशेष्यं संक्रामतीत्यपि न्यायः पूर्वेणोदाहृतः विशेषणज्ञानस्य विशिष्टज्ञाने हेतुत्वात्तदन्तरेण तदसिद्धिः । न हि दण्डज्ञानं विना दण्डीति ज्ञानं संभवति न चाज्ञातविशेषणं तद्विशेष्यं विषयीकरोतीति तदर्थः । ५ ।

यत्रोभयकोटिकसंशये एकत्र बहुर्थहानिः द्वितीयस्वीकारे स्वेकार्थहानिस्तत्र द्वितीयपक्षः स्वीकर्तव्य इति विवक्षायां त्यजेदेकं कुलस्यार्थे इति न्यायः प्रसरति । तद्यथा कठवाक्यम् । आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च । इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः । सो ऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्यन्तनियतेन्द्रियादेः पुंसः संसारित्वमन्यस्य च परं पदं श्रावयित्वा किं तदित्याकाङ्क्षायां तेभ्य एवेन्द्रियादिभ्यः परमात्मानं विष्णोः पदं दर्शयति । इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति । तत्र संशयः । किमव्यक्तशब्देन प्रधानमुच्यते उत पूर्ववाक्यसंदर्भे प्रकृतं शरीरमिति । तत्र द्वितीयपक्षस्वीकारे ऽव्यक्तपदमुख्यवृत्तिमात्रत्यागः प्रसज्यते । अत्र हि विषं मृत्युरिति न्यायार्थप्रकृतिवाचिशब्देन विकारो लक्ष्यते । न च कथं देहस्य महतः परत्वम् । अविद्यानिष्ठपरत्वस्याभ्युपगमात् । पूर्वकल्पस्वीकारे तु परिशेषात् न्याय्यत्वेन ग्रासग्रहस्य शरीरस्य परित्यागः प्रसज्यते पूर्ववाक्येष्वनुक्तस्य प्रधानस्य परिग-

स्य शरीरस्य । किंच सांख्यैः प्रकृतिपुरुषविवेकान्मोक्षं वदद्भिः प्रकृतिरपि तद्वत् ज्ञेयेति स्वीक्रियते न चाव्यक्तं ज्ञेयत्वेनोच्यते । तथा च ज्ञेयत्वाभाववचनानुसारेणाव्यक्तपदेन न प्रधानं ग्रहीतुं शक्यम् । तद्ग्रहे तु तदनुसारित्वत्यागः । किंच कठवल्ल्यामग्निजीवपरमात्मनामेव पूर्वोत्तरवाक्यपर्यालोचनया प्रकृतत्वेनोपन्यासवस्तुविषय एव प्रश्नश्च दृश्यते न प्रधानस्य येनास्याव्यक्तपदवाच्यत्वं स्यात् । तथा चैतदनुसारेणापि नेदमव्यक्तपदवाच्यं तदुपगमे तु तदनुसारित्वत्यागोऽपि प्रसज्यत इति । ९ ।

विषं भुङ्क्ष्वेति न्यायो ऽत्र प्रासङ्गिकः । १ । ७ ।

वाङ्कुरं जीवनमिति । २ । ८ ।

बाहुवृत्तमिति । २ । ९ ।

दृष्टिपथवर्ती प्रत्यक्षो ज्वर इति च न्यायो ऽनेन तुल्यः । ४ । १० ।

वस्तु त्यजेदेकमिति न्यायं नानुसरति यः अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वमिति न्यायविषयतां नातिवर्तते । ७ । ११ ।

एकस्मिन्साध्ये ऽनेकेषु साधनेषु सत्स्वन्यतरापेक्षितमनुसृते सति साध्यसिद्धावन्यप्रयोगे ऽर्थाभावात्तत्स्वयमेव निवर्तते । एवं कस्य चित्प्रयोगे केनचिदेव सिद्धमिति विषयायामर्थेऽकर्तृनिवारणन्यायः प्रयुज्यते । यथा राघवो लङ्कायां सीतां नीत्वा राक्षसीभ्य अशङ्कत् । अशोकवनिकायां स्थाप्येति । ताश्च तत्र बह्व्यः सन्ति तन्मैकस्यां स्थापिता चेत्तापत्तैव. तदाज्ञया परिपालिता स्यात्तथैव स्थापयितुमवकाशसर्वाभ्यन्तरे स्थापनं स्वयमेव निवर्तते ।

के चित्तु यथा रावणेन सीता नीता चेदशोकवनिकायामेव हृता स्थापिता नान्यत्रेत्यत्र राघवेणैव निवा-

सिका तावतैव तङ्खायां तदवस्थानसिद्धेः सर्वत्र स्थापना-संभवाचान्यत्र स्थापनं व्यर्थमेव निवर्ततइति न्यायार्थ-माहुः । सर्वथा ऽपि प्रकृतोदाहरणसंगतेयं गतिः । तथा ऽयं घट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी अवयवित्वा-त्पटान्तरवदित्यत्रावयवित्वेन व्याप्तिग्रहानन्तरमत्यन्ताभाव-प्रतियोगित्वलक्षणमिथ्यात्वरूपसाध्ये सिद्ध इत्यन्तादिति हेतुर्धर्मभावो ऽपि तत्प्रयोगस्य पिष्टपेषणन्यायेनायोग्य-त्वात् मिथ्यात्वस्य सिद्धत्वेन साध्यत्वाभावाच्च स्वय-मेव निवर्त्तते । एवं कस्य चित्प्रयोगे येनकेन नियामिकेति दिक् । ८ । १२ ।

खञ्जपिण्डोलि प्रासङ्गिकः १ । १३ ।

तुषकण्डनन्यायो ऽपीह बोध्यः । २ । १४ ॥

जलमन्थनन्या० । ३ । १५ ।

काकदन्तपरीक्षान्या० ४ । १६ ॥

गर्दभरोमगणनन्या० । इदं न्यायत्रयं वैयर्थ्याभावे बोध्यम् । ५ । १७ ॥

एवं घटे मिथ्यात्वे निश्चिते घटादिषु स्थालीपुलाक-न्यायेन निश्चेयम् । पुलाकाः स्वल्पधान्यविशेषाः यथा भक्तार्थतण्डुलस्थनिरोहितस्थाल्यन्तर्गतेषु एकस्मिन्पक्वे नि-श्चिते सर्वे पक्वा इति निश्चीयन्ते तद्वत्प्रकृते ऽपीत्यर्थः ६ । १८ ॥

अनेकेषु वाक्येषु पदेषु वा व्याख्येयेषु प्रथमंपठितमपि वाक्यं पदं वा बहु वक्तव्यं परित्यज्य मध्ये अन्ते वा पठितं स्वल्पवक्तव्यं पूर्वं व्याख्यायते यत्तत्सूचीकटाहन्यायेनेति ज्ञेयम् । यथा लोहकारं प्रति पूर्वं कश्चित्तेन कटाहोत्पाद-नार्थी आगतः पश्चात्सूच्युत्पादनार्थी प्राप्तः । तत्र स्वया लो-

प्रकारः प्रथमं कर्तव्यत्वेन प्राप्तमपि कटाहं बहुकालसाध्यत्वात्परित्यज्य पश्चात्कर्तव्यतया प्राप्तामपि स्वल्पकालसाध्यां सूचीं पूर्वमुत्पादयति तथा प्रकृते ऽपि १० । १९ ॥

उद्देश्यविधेयार्थानां संख्यासाम्ये यथाक्रमं संबन्ध इति विवक्षायां यथासंख्यन्यायो यथासंख्यमनुदेशः समानामिति पाणिनिसूत्रसिद्धः प्रयुज्यते । यथा तक्षशिलाभिनास्त्या इत्यादिषु पाणिनीयेषु सूत्रेषु तक्षशिलादीनुद्दिश्याणञ्प्रभृतयो विधीयन्ते ते च यथाक्रमं प्रथमः प्रथमेन द्वितीयो द्वितीयेनेत्यन्वयं प्राप्नुवन्ति. तथा द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चेत्युद्दिश्य विधीयते अथात आदेशो नेति नेतीति। तत्र हि क्रमेण मूर्तयोर्निषेधद्वयमन्वेति । अन्यथैकस्यैव निषेधद्वयान्वये मूर्तामूर्तयोरनिषेधप्रसङ्गेन द्वैतापत्तिः स्यात् ब्रह्मण्यपि वा निषेधान्वये शून्यवादप्रसङ्गः । अयं च न्यायः उद्देश्यविधेयहीनेष्वपि समसंख्येषु क्वचित्प्रवर्तते । यथा शोऽभ्यावासे दीपवन्तः समासमाभ्यां विषमस्तने पूजात इति स्तुतौ । न ह्यत्रोद्देश्यविधेयभावो ऽस्ति विद्यते च यथासंख्यमन्वयः एवं पृथिव्यम्भसोर्गन्धरसावित्यादावपि बोध्यम् ११ । २० ॥

सर्वसाधारण्येन प्राप्तो ऽर्थः कथ्यमानो यत्र स्वेन स्वप्राप्तेतरपरिसंख्यायां पर्यवस्यति तत्राभ्यक्षन्यायावतारः । यथा ऽभक्ष्यो ऽयं शिव इत्युक्तिरन्यवस्त्वादिभक्ष्येष्वपि सत्स्वांदृर्शितदितरभक्षणनिषेधे पर्यवस्यति १२ । २१ ॥

धातुमलन्या० १३ । २२ ॥

कुम्भीधान्यन्यायश्चापीदृशः । यथा कुम्भीधान्याय द्विजायैव देहीत्यत्र विशेषणसामर्थ्यात् कुम्भ्यां धान्यं करोति, विज्ञायते । तथा तं त्वौपनिषदं पुरुषं पृच्छामीत्यत्रौ-

पनिषदमिति उपनिषन्मात्रगम्यमिति विग्रहणात् । अन्यथा विपुलधान्यराशिमतामपि सर्वेषां विप्राणां कुम्भ्यां धान्यसंभवेन कुम्भीधान्यायेति विशेषणवैयर्थ्यवज्जीवतलुपाध्यादेरप्यौपनिषदबोधविषयत्वसंभवेन विशेषणवैयर्थ्यापातात् । एवं शेद्वालसखेऽशौ घर्मौ इत्यादावपि बोध्यम् १४ । २३ ॥

यत्र सामान्यवाचकं पदं स्वयुक्तविशेषवाचकपदस्य सान्निध्यात्तदन्यविशेषपरतया नीयते तत्र ब्राह्मणपरिव्राजकन्यायः यथा ब्राह्मणा भोज्यन्तां परिव्राजकाश्चेत्यत्र परिव्राजकानामपि ब्राह्मणत्वाद्ब्राह्मणपदं परिव्राजकेतरपरम् । तथा एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति श्रुतावन्तरिन्द्रियस्य मनसः समभिव्याहारात्सर्वेन्द्रियाणीति पदं मनोन्यसर्वेन्द्रियपरम् । इदमुदाहरणं मनइन्द्रियत्ववादिमते । मतान्तरे तु तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायत इत्यादि बोध्यम् १५ । २४ ॥

ब्राह्मणवसिष्ठन्यायोऽपीह बोध्यः । ब्राह्मणा आयाता वसिष्ठोऽप्यायात इत्यत्रापि सामान्यपदस्य विशेषपदसमवधानात्तदितरविशेषपरत्वात् १६ । २५ ॥

गोबलीवर्दन्यायोऽपीदृशः । एतावांस्तु विशेषः यत्र विशेषेणोपात्तस्य प्राशस्त्यमभिप्रेतं तत्र पूर्वन्यायप्रवृत्तिः यत्र तन्नास्ति तत्रैतस्य प्रसिद्ध्यप्रसिद्धिनिबन्धनश्चायं गोपदस्य हि स्त्रीव्यक्तौ प्रसिद्धिर्न पुंव्यक्तौ । अत एव गामानय बलीवर्दं चेति प्रयुज्यते । उदाहरणं तु देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः । प्रेताः पिशाचास्तरवः समस्ता ये चाभिमिच्छन्ति यस्मात्प्रवृत्तमित्यादि । अत्र हि विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः । पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनय

इत्यभिधानात्सिद्धादीनामपि देवत्वेन देवपदस्य सिद्धादीनरदेवपरत्वं विद्यते । न चेन्द्राद्यपेक्षया तेषां गौणत्वमस्ति न च देवपदस्य पिशाचादौ प्रसिद्धिरस्तीति सर्वमनवद्यम् । १७ । २६ ।

विशिष्टवाचकानामपि पदानां सति पृथग्विशेषणवाचकपदसमवधाने विशेष्यमात्रपरतायां करिबृंहितन्यायः । बृंहितं करिगर्जितमिति कोशाद्विशिष्टवाचकस्य बृंहितपदस्य तत्र च द्विरदबृंहितशङ्कीत्यादौ विशेषणवाचिद्विरदपदसमवधानाद्यथा गर्जितरूपविशेष्यमात्रपरत्वं तथा स्वर्गे च जीवः सुखदुःखभोक्तेति श्रुतौ सुखदुःखसाक्षात्कारकर्तृत्वस्य भोक्तृत्वाद्विशिष्टवाचकस्यापि भोक्तृपदस्य सुखदुःखपदसमभिव्याहारात्साक्षात्कर्तृरूपविशेष्यमात्रपरत्वमिति १८ । २७ ।

एतेन न्यायषट्कं व्याख्यातं बोध्यम् । गजघटान्या० १९ । २८ ।

नीलेन्दीवरन्या० २० । २९ ।
पर्वताधित्यकान्यायः २१ । ३० ।
पर्वतोपत्यकान्यायः २२ । ३१ ।
वाजिमन्दुरान्यायः । २३ । ३२ ।

मृगवागुरान्यायश्च । करिणां घटना घटा इन्दीवरं नीलेऽस्मिन् । उपत्यकाद्रेरासन्ना भूः तथोर्ध्वमधित्यका वाजिशाला तु मन्दुरा । वागुरा मृगबन्धनीति कोशाद्विशिष्टवाचकानामपि घटादिपदानां नैषान्यत्र मदान्धसिन्धुरघटा नीलेन्दीवरलोचनः अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लमित्यादौ विशेषणपदसमभिव्याहाराद्विशेष्यमात्रपरत्वादिति । २४ । ३३ ।

यत्र विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यकशास्त्रस्य विशेषशास्त्रेण बाधस्तत्र येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति न्यायोऽवतरति । प्राप्तइति भावे-क्तः । येन नाप्राप्तेत्यस्य यत्कर्तृकावश्यप्राप्तावित्यर्थः तत्पूर्वस्य प्रकृतार्थदार्ढ्यबोधकत्वात् । सामान्यशास्त्रप्राप्तियोग्ये ऽचरितार्थे हि विशेषशास्त्रस्य बाधकत्वे बीजम् । ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषातामित्यत्र यथा भोजनकर्तृकावश्यप्राप्तौ परिवेषणविधेरारब्धत्वात्तेन सामान्यशास्त्रप्राप्तियोग्ये शूद्रादावचरितार्थेन विशेषविधिना स्वोद्देश्यमाठरत्वादिविशेषधर्मावच्छिन्नवृत्तिब्राह्मणत्वरूपसामान्यधर्मावच्छिन्नोद्देश्यकस्य ब्राह्मणा भोज्यन्तामिति शास्त्रस्य बाधः । तथा न हिंस्यात्सर्वा भूतानीति हिंसानिषेधकर्तृकावश्यप्राप्तावग्नीषोमीयं पशुमालभेतेत्याग्नीषोमीयादिपश्वालम्भनविधेरारब्धत्वात्तेन सामान्यशास्त्रप्राप्तियोग्ये पुरोडाशादावचरितार्थेन विशेषविधिना स्वोद्देश्याग्नीषोमीयत्वादिविशेषधर्मावच्छिन्नवृत्तिभूतत्वरूपसामान्यधर्मावच्छिन्नोद्देश्यकस्य न हिंस्यादिति शास्त्रस्य बाधः । एवं वाजपेये सुराग्रहादिष्वपि द्रष्टव्यम् । न सुरां पिबेदित्यादिनिषेधस्य विहितेतरविषयत्वात् । तथा वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेदित्यत्रापि ज्ञेयम् । न च तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैरिति प्रायश्चित्तविधानात्तस्य निषिद्धत्वं निर्णीयत इति वाच्यं निषिद्धत्वनिर्धारणाभावप्रयुक्तशिष्टनिश्चये प्रायश्चित्तविधानाच्च निषिद्धत्वनिर्धारणे ऽन्धवृत्त्यन्यायेनान्योन्याश्रयान्निषिद्धत्वानिर्णये प्रायश्चित्तानिर्णयात् । तद्विधानस्य स्यायार्हेऽपि विधानवर्त्मनिरतत्वेनाप्युपपत्तेर्मूलकल्पनाया-

शैत्यकल्पनायोगात्। शिथिल एव प्रवृत्त्युपगमेनात्र रागतो प्रवृत्तेरिति दिक्। इति येन नाप्राप्तिन्यायः। २५। ३४।

अत्र प्रासङ्गिको ऽन्धभृत्यन्यायः। यथा कस्याचदन्धेर कस्याहं भृत्यः त्वं भृत्यः कस्य यस्याचक्षुष्य इत्यत्र यथा न वस्तुनिर्णयस्तथा प्रकृते ऽपीत्यर्थः। १। ३५।

यत्रान्योन्याश्रयो न दोषाय यथा देहादृष्टादौ तत्र बीजाङ्कुरन्यायः। २। ३६।

घरट्टकुटीन्यायश्च प्रवर्त्तते। अयं शुल्कप्रत्तावन्योन्याश्रयः प्रवांद्दानादित्यत्र दोषावहः। ३। ३७।

यत्रोत्पाद्योत्पादकभावे स न दोषस्तत्र नैनाथिक-न्यायः। ४। ३८।

आत्माश्रयस्य दोषत्वविवक्षायां न हि सुशिक्षितो ऽपि बटुः स्वस्कन्धमारोढुं पटुरिति न्यायः प्रवर्त्तते। ५। ३९।

कर्त्तारं विना करणस्य कार्यक्षमत्वविवक्षायां तु न हि सुतीक्ष्णा ऽप्यसिधारा स्वयं छेत्तुमाहितव्यापारेति न्यायः। इति येन नाप्राप्तिन्यायान्तर्गतास्तेन संगताश्च न्यायाः। ६। ४०।

तक्रकौण्डिन्यन्यायो ऽपि सामान्यशास्त्रप्राप्तस्य विशेषशास्त्रेण बाध एव प्रवर्त्तते। यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्र कौण्डिन्यस्यापि ब्राह्मणत्वात्सामान्यशास्त्रेणास्यापि दधिदानं प्राप्तं तच्च विशेषविहितेन तक्रदानेनापोद्यते। एवमाहवनीये जुहोतीति सामान्यशास्त्रप्राप्तस्याहवनीयाधिकरणकहोमस्य पदे जुहोतीति विशेषविहितेन पदहोमेन बाधः। तथा यतो वा इमानि भूतानि जायन्ते इति श्रुत्या बोधितस्य भूतेषु साक्षाद्ब्रह्मकार्यत्वस्य तस्माद्वा एतस्मादात्मन आकाशः

संभूतः आकाशाद्वायुरित्यादिविशेषश्रुत्या बाधः । न चैकविज्ञानात्सर्वविज्ञानश्रुतिविरोधः व्योमादेर्ब्रह्मानन्यतया तद्भावापन्नब्रह्मजन्यत्वेन तद्विज्ञानाद्विज्ञानसंभवात् । न चैवमेतयोर्वाक्ययोर्नैतन्न्यायोदाहरणत्वम् । आकाशादिभावापन्नब्रह्मकार्यत्वस्य सामान्यश्रुत्या बोधितस्य बाधान्यायसंगतेः । न चानयोर्न्याययोः साङ्कर्यं शङ्क्यम् । विरोधात्सामान्यशास्त्रस्य विशेषशास्त्रेण बाधे पूर्वन्यायस्य फलसाम्यात्तेन तस्य बाधे तूत्तरस्य प्रवृत्तेः तत्रकालिकभोजनपरिवेषणयोर्हिंसातत्प्रतिषेधयोश्च विरोधः स्पष्टः । दधितक्रयोस्त्वोदनसेकरूपस्य तृप्तिरूपस्य वा फलस्य तुल्यत्वात् बाध्यबाधकता । दधिफलस्य तक्रेणैव जनितत्वाद् दध्नो निवृत्तिः । अत एव ब्राह्मणेभ्यो दधि दीयतां कम्बलः कौण्डिन्यायेत्यत्र न बाध्यबाधकभावः । एवं होमयोरपि क्रतूपकारलक्षणस्य फलस्यैक्याद् बाध्यबाधकतेति तक्रकौण्डिन्यन्यायः । २६ । ४१ ।

के चिन्न्याया व्याकरणमात्रगोचरास्तदुदाहरणस्यान्यत्राऽनुपलम्भात् व्याकरणोदाहरणस्य त्वत्रानुपयुक्तत्वात्तत्स्वरूपं बीजं च प्रदर्श्यते ।

पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानिति न्यायः । अवश्यं स्वपरत्विन् बाध्ये प्रथमोपस्थितानन्तरबाधेन चरितार्थे पश्चादुपस्थितस्य ततः परस्य बाधे मानाभावः । आकाङ्क्षानिवृत्तेर्विप्रतिषेधशास्त्रबाधे मानाभावादित्येतस्य बीजम् । २७ । ४२ ।

मध्ये ऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरानिति न्यायः । पूर्वोपस्थितबाधेन नैराकाङ्क्ष्यमस्य बीजम् । २८ । ४३ ।

पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गा इति न्यायः । सम्यगेकचक्षुष्को ह्यपवादविषयं पर्यालोच्य तद्वि-षयत्वाभावनिश्चये उत्सर्गेण तल्लक्ष्यं संस्करोति अन्यथा विकल्पापत्तेरित्यर्थः । अभिनिविशन्त इत्यस्य बुद्ध्यारूढा भवन्तीत्यर्थः । २९ । ४४ ।

प्रकल्प्यापवादविषयं तत उत्सर्गो ऽभिनिविशतइति न्यायः । तत इत्यस्यापवादशास्त्रपर्यालोचनात्प्रागपीत्यर्थः प्रकल्प्येत्यस्य परित्यज्येत्यर्थः । ततश्च सद्यैकचक्षुष्कस्त-च्छास्त्रपर्यालोचनं विना ऽप्यपवादविषयं परित्यज्योत्स-र्गेण संस्करोतीति न्यायार्थः ।

ये त्वाहुर्येन नाप्राप्तन्याये प्रदर्शितविधिनिषेधवा-क्ययोर्न सामान्यविशेषभावः न हि यथा होमसामान्याधि-करणतया प्राप्तस्याहवनीयस्य विशेषविहितेन पदहोमेन संकोचस्तथेह हिंसामात्रविषयतया निषेधः प्रवर्तते येन विशेषणसंकोचः स्यात्किं तु रागप्राप्तहिंसायामेव तावता ऽपि निषेधोपपत्तौ न क्रतुप्रकरणे ऽपि निषेधप्रवृत्तिः प्रमा-णाभावात् प्रत्युत पदार्थाप्रवृत्तिस्तदर्थः प्रतिषेध इति न्यायेनानृतवदनादिनिषेधस्येवास्यापि क्रत्वर्थत्वं स्यात्तथा चानयोर्विधिनिषेधयोरर्थद्वयप्रसङ्गविकल्पः स्यादित्यन-र्थपरंपरापत्तिरिति तेषां तदन्यस्योदाहरणं बोध्यम् । ३० । ४५ ।

उपजीव्यमाणनिमित्तो ऽप्यपवादः संजातनिमित्त-मप्युत्सर्गं बाधतइति न्यायः । अस्य तु भवति याज्ञो ऽप्युदाहरणम् । तथा हि । ज्योतिष्टोमे बहिष्पवमाना-ख्यस्तोत्रं कर्तुं क्रमेण पृष्ठतो हस्तेन संस्पृश्योपसर्पतामृ-त्विजां मध्ये उद्गातुरपच्छेदे यद्युद्गाता ऽपच्छिद्येतादक्षिणं

एवमग्निरुद्धाने न पुनर्यजेतेति श्रुतिजन्या तन्निमित्तप्राय-श्चित्तकर्तव्यताबुद्धिः पश्चात्प्रतिहर्त्रपच्छेदे यदि प्रतिहर्ता-ऽपच्छिद्येत सर्ववेदसं दद्यादिति श्रुतिजन्यया प्रायश्चि-त्तान्तरकर्तव्यताधिया बाध्यते । अत्रोपजनिष्यमाणनि-मित्तान्तरे क्रतौ पूर्वनिमित्तकप्रायश्चित्तस्याङ्गत्वादि प्रतीत बाध्यते अन्यथा ऽस्य निमित्तान्तररहितक्रतुवत्सदनुष्ठाने वैकल्यप्रसङ्गादुत्सर्गापवादत्वं चात्र बाध्यबाधकभावेनो-पचारादिति संक्षेपः । ३१ । ४६ ।

पूर्वात्परबलीयस्त्वन्यायः । ३२ । ४७ ।

शाबरजलसर्पिन्यायश्चेह बोध्यः । रजतादिज्ञान-शुक्त्यादिज्ञानयोः सर्पत्वरज्जुत्वादिरूपजलस्थावरविषयो-र्वोत्तरेण पूर्वबाधः प्रसिद्धो यथा तथा प्रकृते ऽपि । इयांस्तु विशेषः यत्पूर्वस्मिन्पूर्वापरभावस्य नियतत्वाद्बाध्यबाध-कभावो ऽपि नियतः । अतस्तत्र तादृशयोर्ज्ञानयोः सत्यत्व-मिथ्यात्वज्ञानयोरुदाहरणत्वं बोध्यम् । द्वितीये त्वनियत-पूर्वापरभावप्रयुक्तबाध्यबाधकभावस्यानियतत्वात्तादृश-योरुद्गातृप्रतिहर्त्रपच्छेदयोरुदाहरणत्वमिति । ३३ । ४८ ।

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायः । अयमपि व्याकरणशास्त्रगोचरः । न हन्यादित्यादावव्यव-धानेन नञर्थस्य धात्वर्थेनान्वयाभावेन हन्यादित्यस्योदाह-रणमिति चेन्नाव्यवधाने ऽपि धात्वर्थस्य प्रत्ययार्थोपसर्जन-त्वेनोपस्थितस्य नञर्थेनान्वयानुपपत्तेः । एवं चाव्यवधाने ऽपि नञर्थो न धात्वर्थेन संबध्यते किं तु प्रत्ययार्थेन तस्य प्राधान्यादिति दिक् । ३४ । ४९ ।

एवमन्ये ऽप्यध्यधिकादयो न्याया व्याकरणशास्त्र-गोचराः सन्ति विस्तरभयान्नेह दर्शितम् ।

कृदभिहितो भावो द्रव्यवत्प्रकाशते इति न्यायस्य तु प्रमाणप्रमेयेति गौतमीयसूत्रान्तर्गतमधिगम इति पदमुदाहरणं बोध्यम् । तथा च तत्त्वज्ञानान्निःश्रेयसाधिगम इत्यस्याधिगम्यमानं निःश्रेयसं तत्त्वज्ञानाद्भवतीत्यर्थः । अन्यथा ज्ञानस्य मोक्षं प्रत्यहेतुत्वापत्तेरिति । ३५ । ५० ।

तक्रकौण्डिन्यन्याये प्रदर्शितायामेतस्मादात्मन इति श्रुतेर्वीचीतरङ्गन्यायोदाहरणत्वमपि बोध्यम् । तथा हि । वीचीतरङ्गशब्दौ हि पर्यायौ । भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरिति कोशात् । एवं च यथा वाय्वादिसंयुक्तात् उदकाद्वीचिर्जायते तद्व्यापकाच्च तदन्यस्तरङ्गान्तरं तद्व्यापकाच्च तदन्यस्तरङ्गान्तरम् । तथा मायोपहिताद्ब्रह्मणः खमुत्पद्यते तद्व्यापकाच्च तस्माद्वायुरित्यादि । तार्किकास्तु शब्दोत्पत्तावेतमवतारयन्ति भेरीदेशे जातः शब्दो वीचीतरङ्गन्यायेन स्वसंनिहितं शब्दान्तरमारभते स च शब्दः शब्दान्तरमिति क्रमेण श्रोत्रदेशे जातः शब्दः श्रोत्रेण गृह्यत इति । ३६ । ५१ ।

तदेकदेशिनस्तु कदम्बमुकुलन्यायमिहावतारयन्ति । यथा हि कदम्बमुकुलात्कालविशेषनिमित्तेन सर्वासु दिक्षु युगपद्बहूनि केसराण्युत्पद्यन्ते तथा भेरीदण्डसंयोगेन वंशादिदलद्वयविभागेन वा निमित्तेन भेर्यादिदेशावच्छिन्नाकाशे युगपद् दिक्षु दश शब्दा जायन्ते एतावन्मात्र एव दृष्टान्तः । अग्रे तु पूर्वोक्तप्रकारेण स्वसंनिहितान्यशब्दानारभन्त इत्यादि ज्ञेयम् । ३७ । ५२ ।

अन्योन्यनाश्यनाशकभावविवक्षायां सुन्दोपसुन्दन्यायः । यथा हि सुन्दोपसुन्दसंज्ञौ सहोदरावसुरौ तिलोत्तमार्थं परस्परं वध्यघातकभावेनोभावपि नष्टाविति ना-

रते प्रसिद्धम् । यथा वीचीतरङ्गन्यायेनोत्पन्नानां कार्यशब्द-जन्यानामन्त्योपान्त्ययोर्द्वौ परस्परेण नाश्यनाशकत्वप-न्त्येनोपान्त्यस्यान्त्येनेति केचित्तार्किकाः । तदयुक्तमित्थ-परे उपान्त्येन द्वितीयक्षणस्यापि नान्त्यस्य द्वितीयक्षणवृत्ति-ध्वंसप्रतियोगिना तृतीयक्षणवृत्त्यन्त्यध्वंसजनना-योगात् तस्यानुपान्त्यनाश इति । किं तर्हि तन्न्यायोदाहर-णमिति चेत्सत्प्रतिपक्षावित्यपेहि तौ हि परस्परानुमि-तिप्रतिबन्धकत्वेनानुमितिकरणत्वरूपानुमानत्वनिरासकौ भवतः । इदमेव तयोरितरेतरनाशकत्वं नामेति । ३८ । ५३ ।

अयं तुल्यबलयोर्विरोधे प्रसरति प्रबलनिर्बलविरोधे सबलेन निर्बलबाधविवक्षायां तु मात्स्यन्यायावतारः । अयं प्रायः इतिहासपुराणादिषु दृश्यते । यथा हि वासिष्ठे प्रह्लादाख्याने तत्समाधिं प्रस्तुत्योक्तम् । एतावता ऽथ कालेन तद्रसातलमण्डलम् । बभूवाराजकं तीव्रं मात्स्य-न्यायकदर्थितमिति । यथा प्रबला मत्स्या निर्बलांस्तान्नाश-यन्ति तथा ऽराजके ऽमुकदेशे प्रबला जना निर्बलान्नाशयन्ति चेति न्यायार्थः । प्राग्दर्शितं आगमेन प्रत्यक्षादिबाधो ऽप्यस्योदाहरणं बोध्यम् । प्रबलश्रुत्यादिप्रमाणैर्निर्बललि-ङ्गादिप्रमाणबाधो ऽप्ययं बोध्यः । तथा हि विधिविशेषस्य सहकारीणि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थान-समाख्यारूपाणि । विध्यन्तरस्य च श्रुत्यर्थपाठस्थानमुख्य-प्रवृत्त्याख्यानि । तेषु पूर्वपूर्वस्य प्रबलत्वेनानेन न्यायेनोत्त-रोत्तरबाधकत्वमग्रे वक्ष्यामस्तावत्तदुपोद्घातत्वेन विधि-भेदाः संक्षेपतो निरूप्यन्ते । अप्राप्तं फलवन्तं चार्थं यः स्वसामर्थ्येन प्रकाशयति स विधिरुत्पत्त्यादिभिर्धर्मैर्युक्तः उत्पत्तिविधिर्विनियोगविधिः प्रयोगविधिरधिकारवि-धिश्चेति चतुर्विधो भवति । तत्र कर्मस्वरूपमात्रबोधको

विधिः प्रथमः । यथा ऽग्निहोत्रं जुहोतीति । अङ्गसम्बन्धबोधको विधिर्विनियोगविधिः । यथा दध्ना जुहोतीति । स हि तृतीयाप्रतिपन्नाङ्गभावस्य दध्नो होमसंबन्धं विधत्ते दध्ना होमं भावयेदिति । श्रुत्यादीनामङ्गत्वं नाम परोद्देशप्रवृत्तकृतिव्याप्यत्वं पारार्थ्यं तच्चानेन विधिना ज्ञाप्यते । प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः । स चाङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव । स हि साङ्गं प्रधानमनुष्ठापयन्विलम्बे मानाभावादविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते । न च विलम्बवदविलम्बे ऽपि मानाभावः । विलम्बे ऽङ्गप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तेः । न हि विलम्बेन कृतयोः पदार्थयोः सह कृतमिति साहित्यं व्यवहरन्ति । स चाविलम्बो नियते क्रमे आश्रीयमाणे भवति । अन्यथा किमेतदनन्तरमेतत्कर्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते । तत्र क्रमो नाम विततिविशेषः पौर्वापर्यरूपो वेति । फलस्वाम्यबोधको विधिरधिकारविधिः । फलस्वाम्यं च कर्मजन्यफलभोक्तृत्वम् । स च यजेत स्वर्गकाम इत्येवंरूपः । अनेन हि स्वर्गमुद्दिश्य यागं विदधता स्वर्गकामस्य यागजन्यफलभोक्तृत्वं बोध्यते । तच्च स्वाम्यं तस्यैव यो ऽधिकारिविशेषणविशिष्टः । अधिकारिविशेषणं च तदेव यत्पुरुषविशेषणत्वेन श्रुतम् । अत एव राजा राजसूयेन स्वाराज्यकामो यजेतेत्यनेन स्वाराज्यमुद्दिश्य राजसूयं विदधता ऽपि न स्वाराज्यकाममात्रस्य तत्फलभोक्तृत्वं बोध्यते किं तु राज्ञः सतस्तत्कामस्य । किं तु पुरुषविशेषणत्वेनाश्रुतस्याधिकारिविशेषणं भवति । यथा ऽध्ययनविधिसिद्धा विद्या अग्निसाध्येषु च कर्मस्वाधान-

सिद्धाधिमत्ता । एवं सामर्थ्यस्याप्यधिकारिविशेषणत्वम् ।
आवश्यकसामर्थ्यं ब्रुवतां श्रुतिः सहकारिणीति न्या-
यात् । असमर्थं प्रति विध्यप्रवृत्तेश्च । एवमर्थित्वादेरपि
बोध्यमिति दिक् । तदित्थं फलस्वाम्यबोधको ऽधिकार-
विधिरिति । तदेवं निरूपितश्चतुर्विधो विधिः । उत्तरकाण्डे
ऽप्युपलभ्यते सः । तथा हि । तस्माद् ब्राह्मणः पाण्डित्यं
निर्विद्येत्यादिरुत्पत्तिविधिः । शान्तो दान्त इत्यादिर्विनियोग-
विधिः । तद्विजिज्ञासस्वेत्यादिना तु सन्प्रत्ययवाच्याया
इच्छायाः प्रकृत्यर्थभूतस्य ज्ञानस्य चानुष्ठातुमशक्यतया
सन्प्रत्ययेन विचारं लक्षयित्वा प्रकृत्या च फलीभूतज्ञानं
लक्षयित्वा ऽज्ञातब्रह्मज्ञानाय तत्कर्तव्यता विधीयते
ब्रह्मसाक्षात्कारकामो वेदान्तविचारं कुर्यादिति । अतो
ऽयमधिकारविधिः साधनचतुष्टयसम्पन्नो ऽधिकारी जि-
ज्ञासुः साङ्गं वेदान्तश्रवणं कुर्यादिति प्रयोगविधिः कल्प्य
इति । चतुर्विधो ऽप्ययं विधिः पुनः प्रकारान्तरेण त्रिविधः ।
स च विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् । उक्तत्वं
चापूर्वत्वात् विधिस्तु धारणे ऽपूर्वत्वात् नियमार्थो पुनः
श्रुतिरुच्यते ऽपि तु संख्येत्येवमादिषु भगवतो जैमिनेः
वचनेषु व्यवहृतः । अप्पदीक्षितैश्चान्योन्यासंकीर्णतया सलक्षणो
निरूप्योपपादितः । विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके
सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयतइति ।
अस्यार्थः यस्य यदर्थत्वं मानान्तरेणाप्राप्तं तस्य तदर्थत्वेन यो
विधिः सो ऽपूर्वविधिः । यथा यजेत स्वर्गकामः व्रीहीन्प्रो-
क्षतीत्यादिः । अत्र यागस्य स्वर्गार्थतायाः व्रीहीणां प्रोक्ष-
णस्य च संस्कारकत्वस्य विधिं विना कथमपि अप्राप्तेर-
यमपूर्व एव विधिः । पक्षप्राप्तस्याप्राप्तांशपरिपूरण-
फलो विधिर्नियमविधिः । यथा व्रीहीनवहन्तीति । अत्र

नियमाभावे ऽपि पुरोडाशप्रकृतिद्रव्याणां तण्डुलनिष्पत्त्या- क्षेपादेवावहननप्राप्तिरस्ति । किं तु तदेव लोकावगतका- रणत्वाविशेषान्नखविदलनादिरपि पक्षे प्राप्नुयादित्यवहन- नाप्राप्तांशसंभवान्नियमपरिपूरणफलः । उभयस्यैकस्योभयो- र्वैकत्र युगपत्प्राप्तावन्यतरनिवृत्तिफलो विधिः परिसंख्या- विधिः । यथा चयने ऽश्वगर्दभरशनयोर्ग्रहणे युगपत्प्राप्ते सामर्थ्याविशेषात्प्राप्तस्येमामगृभ्णन् रशनामिति मन्त्रस्या- श्वाभिधानीमादत्त इति गर्दभरशनाग्रहणव्यावृत्तिमात्रफ- लको विधिः । एवं पञ्च पञ्चनखा भक्ष्या इत्यपि परि- संख्याविधिः । इदं हि न भक्षणपरं तस्य रागतः प्राप्तत्वात् किं त्वपञ्चपञ्चनखभक्षणनिवृत्तिपरमिति । न च नियमप- रिसंख्ययोः फलतो न विशेषः । यतो नियमस्य विधेयाव- घातनिष्ठत्वात्तद्विहितप्राप्तांशपूरणमेव फलं नखविदल- नादिनिवृत्तिस्त्वार्थिकीति ।

अथ श्रोतव्य इति को विधिरिति विचार्यते । तत्र के- चिच्छ्रवणं श्रोतव्यार्थसाक्षात्कारहेतुरिति सामान्यनिय- मस्य धर्मिभेदे व्यभिचारादसिद्धेः ब्रह्मश्रवणं ब्रह्मसा- क्षात्कारहेतुरिति विशेषनियमस्यापीदानीं केषु चिद्वाम- देवे चान्वयव्यतिरेकव्यभिचारादसिद्धेः अलौकिके ब्रह्म- साक्षात्कारे लौकिकोपायाप्राप्तेश्च यद्युपायान्तरेण सह विकल्पेन समुच्चयेन वा श्रवणं मानान्तरेण प्राप्तं स्यात्तदा नियमः परिसंख्या वेति संभावना स्यान्न तु तथा ऽती- त्यपूर्वविधिरेवायमिति मन्यन्ते ।

—अपरे तु विचारमात्रे. विचार्यनिर्णयहेतुत्वस्य लोक- सिद्धत्वादपरोक्षार्थविषयमानाभ्यन्तरेणापरोक्षहेतुत्वस्य ऽप्युक्तेः शाब्दापरोक्षवादे ऽभ्यन्तरस्यापनात् यत्साक्षादप- रोक्षाद् ब्रह्मेति श्रुतिर्नित्यापरोक्षब्रह्मप्रमाणविचारितत्वे-

दान्तरूपश्रवणस्यापि ब्रह्मसाक्षात्कारहेतुत्वमर्थप्राप्तमेव परं त्वात्मतत्त्वजिज्ञासोरेतद्विध्यभावे मनोगोचरे स्वस्मिन् श्रुतिबोधितसूक्ष्मतमविशेषावधारणाय मनस एव समाधिधानव्यापारे ऽद्वैतशास्त्रश्रवणे वा भेदवादिनो गुरुनिरपेक्षवेदान्तविचारे मन्दव्युत्पन्नस्य भाषाप्रबन्धश्रवणे प्रवृत्तिप्रसक्तिरस्तीति साधनत्वप्राप्तिमात्रेणैनःप्रणिधानादिभिर्वैधीनाद्वितीयात्मपरवेदान्तश्रवणस्य पाक्षिकत्वप्रसक्तौ नियमविधिरयमित्याहुः।

चिकित्साज्ञानार्थं चरकादिग्रन्थश्रवणे प्रवृत्तस्येव ब्रह्मज्ञानार्थं वेदान्तश्रवणे प्रवृत्तस्यापि मध्ये मध्ये प्रवृत्त्यन्तरप्रसक्तौ तन्निवृत्तिफलकः परिसंख्याविधिरयमित्यन्ये।

आगमाचार्यवाक्यजं ज्ञानमेव श्रवणं तस्मिंश्च विधयप्रमाणतत्त्वे ऽयोग्ये शिलादौ क्षुरधारेव श्रूयमाणो विधिः कुण्ठीभवतीति नात्र विधित्रयस्याप्यवकाश इतीतरे।

परे तु विचारे ऽपि विचार्यनिर्णयहेतुत्वस्य लौकिकमानसिद्धत्वात्तदुपसदनविधेर्दृष्टार्थत्वाच्च गुरुपूर्वकत्वनियमसिद्धेरीशानुग्रहलभ्याद्वैतशास्त्रश्रवणाहीनस्य श्रवणविधावपि द्वैतात्मश्रवणपरत्वसंभवादिति न कस्यापि विधेरवकाश इत्याहुः। अलं प्रपञ्चेन। तदेवं संक्षेपतो विधिभेदा निरूपिताः। तत्र विनियोगविधेः सहकारीणि पूर्वोक्तानि श्रुत्यादिषट्प्रमाणानि निरूप्यन्ते। तत्र निरपेक्षो रवः श्रुतिः सा च त्रिधा विधात्री अभिधात्री विनियोक्त्री चेति। तत्र विधात्री लिङाद्यात्मिका अभिधात्री व्रीह्यादिश्रुतिः यस्य च शब्दस्य श्रवणादेव संबन्धः प्रतीयते सा विनियोक्त्री। सा च त्रिविधा विभक्तिरूपा एकाभि-

धानरूपा एकपदरूपा चेति । तत्र व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम् । पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वं यजेतेत्याख्याताभिहितसंख्यायाः भावनाङ्गत्वं समानाभिधानश्रुतेरेव । पदश्रुत्या च यागाङ्गत्वं परिगणनं च प्रायोऽभिप्रायं तेन शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धान्वितो भूत्वाऽऽत्मन्येवात्मानं पश्येदित्यत्र लकाश्रुत्या शमादेरात्मदर्शनाङ्गत्वमिति वृद्धोक्तिः संगच्छते । एवं रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वेत्यादावपि बोध्यम् । सामर्थ्यं लिङ्गं सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयत इत्युक्तेः तेनाङ्गत्वं यथा बर्हिर्देवसदनं दामीत्यस्य मन्त्रस्य लवनाङ्गत्वम् । स हि लवनं प्रकाशयितुं समर्थः । तच्च लिङ्गं द्विविधं सामान्यसंबन्धबोधकप्रमाणान्तरापेक्षं तदनपेक्षं च तत्र यदन्तरेण यन्न संभवत्येव तस्य तदङ्गत्वं तदनपेक्षम् । यथाऽर्थज्ञानस्य कर्मानुष्ठानाङ्गत्वम् । लवनं हि मन्त्रं विनाऽप्युपायान्तरेण स्मृत्वा कर्तुं शक्यते अतो न मन्त्रो लवनस्वरूपार्थः संभवति किं त्वपूर्वसाधनभूतलवनप्रकाशनार्थः । तच्च सामर्थ्यमात्रादवगम्यते लवनप्रकाशनमात्रे सामर्थ्यात् । अतोऽवश्यं प्रकरणादि सामान्यसंबन्धबोधकमपेक्ष्य दर्शपूर्णमासप्रकरणे मन्त्रस्य पाठादेवमवगम्यते अनेन मन्त्रेण दर्शपूर्णमासापूर्वसंबन्धि किंचित्प्रकाश्यं तदिति । अन्यथा प्रकरणपाठवैयर्थ्यप्रसङ्गात् । किं तदपूर्वसंबन्धि प्रकाश्यमित्याकाङ्क्षायां सामर्थ्याद्बर्हिर्लवनमित्यवगम्यते । समभिव्याहारो वाक्यम् । समभिव्याहारो नाम साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणं यथा यस्य पर्णमयी जुहूर्भव-

तीति । अत्र न द्वितीयादिविभक्तिः श्रूयते किं तु पर्वता-
ग्न्योः समभिव्याहारमात्रम् । तथाप्येव च पर्वतस्याग्रह-
त्वं प्रतीयते न चानर्थक्यम् अदृष्टदेशापूर्वकल्पनात् ।
तदर्थं वाक्यार्थः । पर्वतस्याऽसदृष्टिनिर्धारणद्वारा यदपूर्व-
साधनं तद्भावयेदिति । एवं च पर्वतस्य यदि ग्रहः क्रियते
तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यत इति न पर्व-
तस्या वैयर्थ्यम् । उभयाकाङ्क्षा प्रकरणम् । यथा प्रयाजा-
दिषु समिधो यजतीत्यत्र हीनविशेषस्यानिर्देशात्समिद्यागेन
भावयेत् किमित्यस्त्युपकार्याकाङ्क्षा दर्शपूर्णमासवाक्ये-
ऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्कथमित्यस्त्युपकाराका-
ङ्क्षा अत उभयाकाङ्क्षायां प्रयाजादीनां दर्शपूर्णमा-
साङ्गत्वं सिध्यति । महाप्रकरणावान्तरप्रकरणभेदादिदं
द्विविधम् । तत्र फलभावनायाः प्रकरणं महाप्रकरणं
तच्च प्रयाजादेर्ग्राहकं सत्पुनः प्रकृतावेव । यत्र समग्राङ्गो-
पदेशः सा प्रकृतिः । यथा दर्शपूर्णमासादि तत्रैवोभया-
काङ्क्षारूपं प्रकरणं संभवति आकाङ्क्षाऽनुपरमात् वि-
कृतौ तु न प्रकरणम् । यत्र समग्राङ्गोपदेशो नास्ति सा
विकृतिः । फलभावनाया अन्तराले यदङ्गभावनायाः प्रक-
रणं तदवान्तरप्रकरणम् । तच्चाभिक्रमणादीनां प्रयाजादिषु
विनियोजकम् । उभयविधं प्रकरणं क्रियाया एव विनि-
योजकं न द्रव्यगुणयोरिति स्थितम् । देशसामान्यं स्था-
नम् । तच्च द्विविधं पाठसादेश्यमनुष्ठानसादेश्यं चेति ।
पाठसादेश्यमपि द्विविधम् । यथासंख्यपाठः संनिधिपा-
ठश्चेति तत्रैन्द्राग्नमेकादशकपालं निर्वपेद्वैश्वानरं द्वादशक-
पालं निर्वपेदित्येवं क्रमविहितास्विष्टिषु इन्द्राग्नी रोचना
दिव इत्यादीनां याज्यानुवाक्यानामाम्नातानां यथासंख्यं प्र-
थमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं यो विनियोगः स

पवासंकल्पपाठात् । प्रथमपठितस्य मन्त्रस्य हि कैमर्थ्याका-ङ्क्षायां प्रथमतो विहितं कर्मैव प्रथमस्तूपतिष्ठते समानदे-शत्वात् । यानि तु वैकृतान्यङ्गानि प्राकृताङ्गानुवादेन विहितानि प्राकृताङ्गाप्राकृताङ्गानुवादेन विहिताङ्गविध्यो-स्तादर्थ्याङ्गप्रधानविध्योर्वा मध्ये न पठितानि तेषां विकृ-त्यर्थत्वं सन्निधिपाठात् । पशुधर्माणामग्नीषोमीयार्थत्वम-नुष्ठानसादेश्यात् । औपवसथ्येऽहनि अग्नीषोमीयः पशुरनु-ष्ठीयते तस्मिन्नेव दिने ते धर्माः पठ्यन्ते अतस्तेषां कैमर्थ्या-काङ्क्षायामनुष्ठेयत्वेनोपस्थितपशुपूर्वमेव भाव्यत्वेन संब-ध्यते । अतो शुक्लानुष्ठानसादेश्यात्तदर्थत्वं तेषामिति संक्षेपः । समाख्या यौगिकः शब्दः । सा द्विविधा वैदिकी लौकिकी च । तत्र हौतुश्चमसभक्षणाङ्गत्वं होतृचमस इति वैदिक्या समाख्यया अध्वर्योस्तत्पदार्थाङ्गत्वं लौकिक्या ऽऽध्वर्यवमिति समाख्ययेति । तदेवं निरूपितानां श्रुत्या-दीनामुत्तरोत्तरं प्रति पूर्वपूर्वस्य प्राबल्यम् । तदुक्तम् । श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौ-र्बल्यमर्थविप्रकर्षात् । समवाये समानविषयत्वेन द्वयोर्वि-रोधे परस्य दौर्बल्यं कुतः अर्थविप्रकर्षात् परस्य पूर्वव्य-वधानेन प्रवृत्तेरित्यर्थः । अयं भावः एकत्र विनियुक्तस्य निराकाङ्क्षत्वादन्यत्र विनियोगो विरुद्ध एव परं तु विनियोजकप्रमाणयोः समबलत्वे ऽन्यतरविनियोगान्ता-नायोजनदृष्ट्या ऽऽकाङ्क्षोत्पादनेन विनियोगः स्वीक्रि-यते । यथा खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कुर्यादिति वाक्याभ्यां क्रतौ विनियुक्तस्य खादिर-त्वस्य फले विनियोगः । यत्र तु प्रमाणयोरतुल्यत्वं तत्र न स्वीक्रियते प्रबलेन दुर्बलविनियोगबाधात् । यथा कदा चन स्तरीरसि नेन्द्र सश्चसीत्यस्या ऋच ऐन्द्र्या गार्हपत्य-

मुपतिष्ठत इति तृतीयाश्रुत्या ऽन्यनिरपेक्षया गार्हपत्यो-पस्थानशेषत्वबोधिकयेन्द्रप्रकाशनसामर्थ्यरूपलिङ्गप्राप्तै-न्द्रशेषत्वं बाध्यते । लिङ्गं हि न साक्षाच्छेषत्वं बोधयति । किं त्विन्द्रप्रकाशनमात्रं करोति । तेन च लिङ्गेनानेन मन्त्रेणेन्द्र उपस्थापयितव्य इति श्रुतिः कल्प्या तथा शेष-त्वबोध इति श्रुतिव्यवधानेन शेषत्वबोधकं लिङ्गं झटिति स्वार्थबोधकश्रुत्या बाध्यम् । तथा लिङ्गेन वाक्यं बाध्यं यथा स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्प-यामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्य-मान इति मन्त्रभागयोः प्रत्येकं सदनकरणे पुरोडाशा-सादने च तत्प्रकाशनसामर्थ्यलिङ्गेन श्रुतिद्वारा विनि-योगे सति प्रतीतमेकवाक्यत्वं बाध्यते । तस्य कृत्स्ने ऽपि मन्त्रे सदनकरणप्रकाशनसामर्थ्यं पुरोडाशासादनप्रकाशन-सामर्थ्यं च लिङ्गं कल्पयित्वा श्रुतिकल्पनयोभयत्र कृत्स्नविनियोगबोधने द्वाभ्यां लिङ्गश्रुतिभ्यां व्यवधा-नेन श्रुत्येकव्यवहितक्लृप्तलिङ्गाद् दुर्बलत्वात् । तथा वाक्येन प्रकरणं बाध्यम् यथा साह्नप्रकरणाम्नातद्वादशोपसदां द्वादशाहीनस्येति वाक्येनाहीनाङ्गत्वबोधकेन प्रकरणप्राप्त-साह्नाङ्गत्वबाधादुत्कर्षः प्रधानस्याङ्गाकाङ्क्षारूपं प्रकरणं तस्याङ्गभाववाक्यैकवाक्यतासामर्थ्यश्रुतिभिः कल्प्यमा-नाभिः स्वार्थविनियोगप्रमितौ व्यवधानेनाङ्गसामर्थ्यश्रु-त्योर्द्वयोः कल्पकवाक्यात दुर्बलत्वात् । तथा प्रकरणेन सन्निधिर्बाध्यः । यथा राजसूयप्रकरणेन तदन्तर्गताभिषे-चनीयाख्यसोमयागविशेषसन्निधिपाठप्राप्तं शुनःशेपोपा-ख्यानादेरभिषेचनीयशेषत्वं बाधित्वा कृत्स्नराजसूयशेष-त्वमापादितम् । सन्निधेः प्रकरणादिकल्पकत्वेन क्लृप्तप्रकर-णात् दुर्बलत्वात् । तथा संनिधिना समाख्या बाध्यते ।

तथा हि पौरोडाशिकसमाख्याते काण्डे आग्नेयपुरोडा-
शादिकर्मणां क्रमेण मन्त्रा आम्नातास्तत्र दधिपयोरूपसा-
न्नाय्यसन्निधौ शुन्धध्वं दैव्याय कर्मणइति मन्त्र आम्नात-
स्तत्र समाख्याबलेनास्य मन्त्रस्य पुरोडाशपात्रं शुन्धनशे-
षत्वं प्राप्तं सन्निधिना बाधित्वा सान्नाय्यपात्रशुन्धनशेष-
त्वमापाद्यते । पुरोडाशसंबन्धिकाण्डं पौरोडाशिकमिति
समाख्यायाः काण्डान्तर्गतमन्त्रस्य पुरोडाशसंबन्धसामा-
न्यबोधकत्वे ऽपि शेषशेषिभावरूपविनियोगबोधकत्वे
सन्निध्याद्यपेक्षया दुर्बलत्वात् । एवं च विरोधे सति
श्रुतिर्बाधिकैव समाख्या बाध्यैव । मध्यानां तु पूर्वबा-
ध्यत्वं परबाधकत्वं चेति श्रुतिलिङ्गसूत्रार्थः । तदेवं निरू-
पितानि विनियोगविधिसहकारीणि प्रमाणानि निरू-
प्यन्ते तद्बाध्यबाधकभावश्चोपपाद्यते । तत्र क्रमपरं वचनं
श्रुतिः । सा द्विविधा केवलक्रमपरं तद्विशिष्टपदार्थपरं
चेति । तत्र वेदं कृत्वा वेदिं करोतीति केवलक्रमपरम् ।
वेदिकरणादेर्वचनान्तरेण विहितत्वात् । वषट्कर्तुः प्रथ-
मभक्ष इति तु क्रमविशिष्टपदार्थपरम् । एकप्रसरताभङ्गभ-
येन यथाप्राप्तानुवादेन क्रममात्रस्य विधातुमशक्यत्वात् । सेयं
श्रुतिरितरप्रमाणापेक्षया बलवती । तेषां वचनकल्पन-
द्वारा क्रमबोधकत्वात् । अत एवाश्विनस्य पाठक्रमात्तृती-
यस्थाने ग्रहणप्राप्तौ आश्विनो दशमो गृह्यत इति वचना-
द्दशमस्थाने ग्रहणमिति सूक्तम् १ । यत्र प्रयोजनवशेन निर्णयः
स आर्थक्रमः । यथा ऽग्निहोत्रहोमयवागूपाकयोः । अत्र हि
यवाग्वा होमार्थत्वात्तत्पाकः प्रयोजनवशात्पूर्वमनुष्ठीयते ।
स चायं पाठक्रमाद्बलवान् । यथापाठे ह्यनुष्ठाने क्रमप्रयो-
जनाभावः अदृष्टार्थत्वं च स्यात् । न हि होमानन्तरं क्रिय-
माणस्य किंचित्प्रयोजनमस्ति २ । पदार्थबोधकवाक्यानां

यः क्रमः स पाठक्रमः तत्र पदार्थानां क्रम आश्रीयते । स च पाठो द्विविधः । मन्त्रपाठो ब्राह्मणपाठश्च । तत्राग्नेयाग्नीषोमीययागयोस्तत्प्रकाशकयाज्यानुवाक्याक्रमाद्यः क्रम आश्रीयते स मन्त्रपाठात् । सोऽयं ब्राह्मणपाठाद्बलवान् । अनुष्ठाने ब्राह्मणवाक्यापेक्षया मन्त्रवाक्यस्यान्तरङ्गत्वात् । ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदमेवं कर्त्तव्यमित्यवबोधेन कृतार्थमिति न पुनः प्रयोगकाले व्याप्रियते मन्त्राः पुनरनन्यप्रयोजनाः प्रयोगसमवेतार्थस्मारकाः ३ । प्रकृतौ नानादेशानां पदार्थानां विकृतौ वचनादेकस्मिन्देशे ऽनुष्ठाने कर्त्तव्ये यस्य देशे ऽनुष्ठीयन्ते तस्य प्रागनुष्ठानमितरेषां तु पश्चादिति क्रमः स्थानक्रमः । स्थानं नामोपस्थितिः । यस्य हि देशे ऽनुष्ठीयन्ते तत्पूर्वतने पदार्थे कृते स एव प्रागुपस्थितो भवतीति युक्तं तस्य प्रागनुष्ठानम् ४ । प्रधानक्रमेणाङ्गक्रमो मुख्यक्रमः । येन क्रमेण प्रधानानि क्रियन्ते तेनैव क्रमेण तेषामङ्गान्यनुष्ठीयन्ते तदा सर्वेषामङ्गानां स्वैः प्रधानैस्तुल्यं व्यवधानं भवति व्युत्क्रमेण त्वनुष्ठाने केषांचिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानम् अन्येषामत्यन्तं व्यवधानं च स्यात् तथा तु प्रयोगविध्यवगतसाहित्यबाधापत्तिः । अतः प्रधानक्रमो ऽङ्गक्रमे हेतुः । स चायं मुख्यक्रमः पाठक्रमाद्दुर्बलः । मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षतया विलम्बितप्रतिपत्तिः । पाठक्रमस्तु निरपेक्षत्वाद्यावत्पाठक्रममात्रसापेक्षतया न तथेति बलवान् । प्रवृत्तिक्रमात्तु बलवानयम् । प्रवृत्तिक्रमे ह्याश्रीयमाणे बहूनामङ्गानां प्रधानविप्रकर्षो भवति मुख्यक्रमे त्वाश्रीयमाणे संनिकर्षः ५ । सह प्रयुज्यमानेषु प्रधानेषु संनिपातिनामावृत्त्या ऽनुष्ठाने कर्त्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठित-

पदार्थकृत्यायः अतः स प्रकृतिक्रमः ९। तदेवमेतेषु बाध्यबाधकभावस्य संगतिपादनान्मात्स्यन्यायोदाहरणत्वमायत्नत्वम् । यथा च तिमिंगिलगिलो ऽप्यस्ति तद्गिलो ऽप्यस्ति राघव इत्युक्तेस्तिमिंगिलबाधकस्य राघवस्य सुतरां तद्गिलतिमिंगिलादिबाधकत्वं तथा लिङ्गादिबाधकस्य श्रुत्यादेः सुतरां तद्बाध्यबाध्यादिबाधकत्वमिति सर्वमनवद्यम् । ननु श्रुत्यादिभिर्न हि बाध्यमित्येवं लिङ्गादि बाध्यते किं तु सति विरोधे बलवद्भिस्तु दुर्बलमात्रं बाध्यते तथा च कथमुदाहरणसंगतिरिति चेन्न तद्बाध्यबाधकत्वावस्थापि विरोधपुरःसरत्वात् । न हि तैः पुत्रपौत्रादयो ऽपि बाध्यन्ते किं तु प्रत्युत पाल्यन्त इति वैरूप्ये सोदरेराख्याने प्रसिद्धमिति सर्वं सुस्थमिति मात्स्यन्यायः ३९ । ५४ ।

यत्र निर्बलेनापि प्रबलसहायेन प्रबलो बाध्यते तत्र अत्यन्तबलवन्तो ऽपि पौरजानपदा जनाः । दुर्बलैरपि बाध्यन्ते दुर्बलैः पार्थिवाश्रितैरिति न्यायो ऽवतरति । स्पष्टार्थो ऽयम् । उदाहरणं तु श्रुत्यपेक्षया दुर्बलाया अपि स्मृतेराचमनरूपप्रबलपदार्थाश्रितत्वेन प्राबल्यम् अतः श्रौतकर्मत्यागेन वेदकरणानन्तरं क्षुते आचमनेन कार्यमिति दिक् । ४० । ५५ ।

यत्रान्यजातिप्रसक्तावयवार्थबोधनसापेक्षावयवार्थसमुदायशक्तेः प्राबल्यं विवक्ष्यते तत्र रूढिर्योगमपहरतीति न्यायः । यथा गौरित्यादावन्यजातिप्रसक्तप्रकृतिप्रत्ययार्थबोधनसापेक्षगमनकर्तृत्वादियोगार्थत्यागेन रूढ्या सास्नादिमती व्यक्तिर्गृह्यते तथा वर्षासु रथकारो ऽग्नीनादधीतेत्यत्र रथकारशब्देन माहिष्यवैश्योत्पन्नो

यद्वैविध्येन उच्यते न तु स्वयं करोतीति व्युत्पत्त्या द्विजालय इति संक्षेपः । ४१ । ५७ ।

श्रुतयौगिकार्थलाभे सत्यनन्वितरूढार्थस्त्याज्य इति न्यायो विशेषतया ऽस्य बाधकः । दृश्यते हि स्तनपं भोजयेत्यत्र पयः पिबतीति यौगिकार्थलाभेनानन्वितपृष्ठरूप-रूढार्थत्यागः । ४२ । ५८ ।

एवं प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमिति न्यायः सामान्यविषयः । औपगवो याचक इत्यादौ हि प्रत्ययार्थस्यापत्यकर्मादिरूपस्य प्राधान्यं यातीत्यादिक्रि-यान्वयात् । एवमन्यत्रापि बोध्यम् । ४३ । ५९ ।

भावप्रधानमाख्यातमिति न्यायः । ४४ । ६० ।

इच्छार्थसन्प्रत्ययसमभिव्याहारे इष्यमाणस्यैव प्राधान्यं न इच्छाया इति न्यायश्च तद्बाधकः । अश्वेन जिगमिषति असिना जिघांसतीत्यादौ इष्यमाणस्य गमनहननादेः प्राधान्यात्तत्रैवाश्वादेः करणत्वेनान्वयस्तथा तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा ऽनाशकेनेत्यत्रेष्यमाणस्य वेदनस्य प्राधान्यात्तत्रैव वेदानु-वचनादेर्विनियोग इति दिक् । ४५ । ६१ ।

एतेन कामनागोचरत्वेन शाब्दे बोध एव शाब्दसा-धनतान्वय इति न्यायो ऽपि व्याख्यातः । ४६ । ६२ ।

ननु कामनागोचरत्वस्य मोक्षसाधारण्यात्तत्रैव यज्ञा-दिविनियोगः कुतो न स्यादिति शङ्कानिरासाय शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यत इति न्यायः । ४७ । ६३ ।

न हि शाब्दमशाब्देनान्वेतीति न्यायश्च प्रवर्तते संज्ञानुगौ । ४८ । ६४ ।

यत्रैकपदवाक्यार्थस्य सारासारभूतमंशद्वयमस्ति स्या-द्वासारांशविनाभूताभीप्सितसारजिघृक्षया च तदविनाभूतम-सारस्याप्यादौ ग्रहणं त्यज्यते च गृहीते सारे तत्र स त्यक-दलकन्यायः । यथा मत्स्यमांसार्थी मत्स्यं सशल्ककण्टकादी-नपि तावद्गृह्णाति त्यजति च तानि गृहीते । तथा तत्त्वं-पदलक्ष्यार्थजिघृक्षया तदुपायौ अपि गृह्येते त्यज्येते च भागत्यागलक्षणया सति तत्त्वार्थज्ञाने । उपपादितो ऽय-मर्थः प्राक् । ४९ । १५ ।

धान्यपलालन्यायो ऽपीदृशः । ५० । १६ ।

अर्थं त्यजति पण्डित इति न्यायो ऽपि भागत्याग-लक्षणास्थल एव प्रसरति । ५१ । १७ ।

तत्त्वंपदलक्ष्यार्थाभेदे ऽन्यतरपदवैयर्थ्यमिति शङ्का-क्षेपाय पदमत्यधिकाभावात्सार्थकाव विशिष्यतइति न्यायो ऽवतरति । तथा च तत्त्वार्थबोधे प्रमाणसंपादक-तया पदान्तरसाफल्यमिति बोध्यम् । ५२ । १८ ।

कृत उपायेऽपि त्यागनियमः । नेतिनेतीत्यादिनिषे-धान्यथाऽनुपपत्त्या सर्वतो बलवती ह्यन्यथाऽनुपपत्ति-रिति न्यायेन तस्मिन्मिथ्यात्वापवादत्वात् । सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति न्यायाच्च । ५३ । ६९ ।

सर्वत इति प्रासङ्गिकः । १ । ७० ।

आत्मनाद्यसत्यापन्नत्वानात्मनो नेतीत्यादिनिषेध-वाक्यैर्बोधे कथं तत्सादृश्यापन्नस्यात्मनो न बाधः स्या-दिति शङ्कापाकरणाय नागोङ्कन्यायावतारः । यथा कश्चि-द्दुष्पतिरजगरेण वेष्टितस्तुष्टं रज्ज्वादीर्जगरं जनानेति लौ-किकी गाथा तथा निषेधवाक्यानि बाधायविरोधेनात्मानं रज्ज्वन्तःस्थात्मानं बाधन्त इति । ५४ । ७१ ।

स्वमते परैरापाद्यमानानां दूषणानां तन्मते पातने उष्ट्रलगुडन्यायावतारः । यथोष्ट्रेणाऽऽनीतेनैव लगुडेन तस्य-प्रहारः क्रियते तथा तार्किकोत्थापितदूषणैस्तन्मतस्यैव वेदान्तिभिर्निराक्रियते । तथा हि । अद्वैतवादे यत्संयोगसांकर्यादिरूपदूषणं तैरुच्यते तदौपनिषदैर्विभ्वनेकात्मवादिनां तेषामेव गले पात्यते तद्यथा यद्येकेनात्मना मनः संयुज्यते तदात्मान्तरैरपि तत्संयोगस्यावश्यकत्वेन तद्विशेषात्सुखादेरप्यविशेषः स्यात् । अदृष्टाभिसंध्यादेरपि सर्वसाधारणतन्मनःसंयोगासमवायिकारणकत्वेन व्यवस्थापकत्वाभावात्सांकर्यं दुष्परिहरमिति संक्षेपः । ५५ । ७२ ।

एकतात्त्विकमतनिराशाय प्रवृत्तया युक्त्या तत्सहकमतान्तरनिराकरणं यदा विधीयते तदा पुष्टलगुडन्यायप्रवृत्तिः यथा बहूनां मध्यस्थस्य पुंसः प्रहारार्थं प्रक्षिप्तः पुष्टलगुडस्तं सहस्थानन्यानपि प्रहरति । तथा ब्रह्मकारणवादिभिः सांख्याभिमतप्रधानकारणवादनिरासाय प्रयुक्ता ईक्षतेर्नाशब्दम् रचनानुपपत्तेश्च नानुमानमित्यादिसमन्वयाविरोधाध्यायगतसूत्रस्था युक्तयस्तं निरस्य योगाभिमतप्रधानकारणवादमपि साम्यान्निराकुर्वन्तीति दिक् । ५६ । ७३ ।

आमन्त्रणं प्रसक्तस्य सूपादेरतिथ्युपकारकत्वमिति न्यायः । ५७ । ७४ ।

गृहार्थमारोपितस्य दीपस्य रथ्योपकारकत्वमिति न्यायश्चेह प्रवर्तते । ५८ । ७५ ।

एवं कुलोचलनन्यायो ऽपि बोध्यः । यथा हि कुलायः पश्चिमभागस्याभ्यन्तरनिष्क्रियाद्याघातेनोल्लसने कृते सति पूर्वभागस्य नमनं यत्नान्तरमन्तरेणैव भवति, तथैक-

क्षिप्रगामित्वादिषु जिते ऽन्ये किमेषामेवं जिता भवन्तीति । ५९ । ७६ ।

एकस्मिन्प्रधाने प्रतिवादिनि जिते ऽन्ये सुखेन जेतुं शक्यन्त इतीदं निमित्ते प्रधानमल्लनिबर्हणन्यायः मल्ला बाहुयुद्धविशारदास्तेषु प्रधानस्य निबर्हणं भूमौ प्रतिष्ठापनं तत्पृष्ठभागस्य तथा संयोजनमिति यावत् अयमाशयः प्रथमं क्रियते तन्निबर्हणे हि तदपेक्षया दुर्बलानामन्येषां जयः सुकर इति न्यायार्थः । ६० । ७७ ।

यामिर्मुक्तिभरतिमब्रह्मसूक्तानर्थैककर्तृत्वेन प्रसिद्धो ऽपि द्वैतसत्यत्ववादी वैशेषिकादिर्जल्पस्ताभिरिति वृद्धाचार्योक्तादृष्टस्तु दूरतो निरस्तो भवतीति निदर्शनायासाधारणाने भवति ग्रियेन्द्रे वनीयतो वारिरिव काकेति न्यायप्रवृत्तिः । भवतीति सान्यन्तं पदं देहलीदीपन्यायेनोभयत्र संबध्यते । वनीयाद् गर्दभः । वनीयस्तु वालेया रासभा गर्दभाः खरा इत्यभिधानात् । स्पष्टमन्यत् । ६१ । ७८ ।

देहलीति प्रासङ्गिको ऽत्र । यथा देहल्यां धृतो दीपो बाह्याभ्यन्तरं च देशं प्रकाशयति तथा मध्ये निहितं पदं पूर्वोत्तराभ्यां साकाङ्क्षपदाभ्यां संबध्यत इत्यर्थः । १ । ७९ ।

काकाक्षिन्यायो ऽपीह बोध्यः । काकस्यैकमेव चक्षुरिन्द्रियं गोलकद्वये ऽपि क्रमेण यथा संबध्यते तथा प्रकृते ऽपीत्यर्थः । २ । ८० ।

आभाणकवाक्यन्यायविषये कैमुतिकन्यायो ऽपि वर्ण्यते । इयांस्तु विशेषो यत्पूर्वो दृष्टान्तदार्ष्टान्तिकयोर्निन्दायां प्रवर्तिष्यते अयं तु स्तुतिनिन्दोभयसाधारणः । तत्र निन्दायां पूर्वस्यैवोदाहरणं बोध्यम् । स्तुतौ तु यां हि पार्वे-

त्यादि भगवद्गीतायाः सार्धश्लोक उदाहरणम् । अपि चेत्सुदुराचार इत्यादावपि विध्यर्थेन योजितो ऽयं न्यायः सर्वैरेवैर्गृहीतान्वै सर्वपापसमन्वितान् । सं मोचयति सुशीलः शरण्यः शरणागतानित्याद्यर्थवर्णनम् । यदि स धार्मिकः सर्वपापयुतानपि शरणागतान्मोचयति तदा ऽल्पपापान्वितान्साधून्वा शरणागतान्मोचयतीति किमु वक्तव्यमिति । १२ । ८१ ।

अत्र हि पार्थेत्यादिकैमुतिकन्यायोदाहरणेषु द्वयोरन्वयोर ब्राह्मणाः क्षत्रियाश्चेशब्दपाश्रयाः सन्तः सुतरां मोक्षं यान्तीत्याद्यर्थसिद्धं दण्डापूपिकान्यायेन दण्डाकर्षणेन तदवलम्बितापूपानामाकर्षणं यथा ऽर्थसिद्धं तद्वदित्यर्थ इति केचित् । अन्ये त्वपूपवन्तं दण्डमानयेति स्वाम्युक्तासनाद्गतो भृत्यो मूषकैः किं भक्षितं दण्डं दृष्ट्वा दण्डस्तु भक्षितो मूषकैरित्युवाचेति लौकिकी गाथा तथा च यथा तद्वाक्यादेवापूपभक्षणं सुखेन प्रतीयते तथा प्रकृतेपीत्याहुः । १३ । ८२ ।

सूचीकटाहन्यायादारभ्यैतत्पर्यन्तानां न्यायानां साम्ये ऽपि यत्किंचिद्विशेषवादार्थाञ्चुरपि विशेषो ऽध्यवसायकर इति न्यायेन भेदसिद्धिर्भिन्नोदाहरणवशाच्चिन्त्या केषांचिदिति बोध्यम् । १४ । ८३ ।

यत्रायासं विना क्रमात्सिद्ध्यन्तमर्थं सुपेत्यायासेन परम्परया स एवार्थः साध्यते तत्र दण्डसर्पमारणन्यायावतरणम् । कश्चित्सर्पं दृष्ट्वा तन्मारणाय दण्डसन्निधानस्तम्भनमागत्य कुठारं गृहीत्वा तच्छेदाय प्रवर्तते । तत्र यथा ऽऽयासो वृथा कुठारेणैव सर्पस्य मारणशक्यत्वात् । तथा यथा पुरुषा रज्जुसर्पादिसंसर्गख्यातिनिर्वचनीयत्वं प्रसाध्य

तद्दृष्टान्तेन सर्वांशनिर्वचनीयत्वं साध्यते तथैव सर्वांश-निर्वचनीयत्वस्य शुक्त्याद्यर्थांशस्यानिर्वचनीयत्वसाध-नायासो वृथेत्यादि । ६५ । ८४ ।

एकमन्थनन्यायो ऽपीह प्रवर्तते । एवं जिघृक्षुः कश्चि-त्सूर्यरश्मितप्ते तत्करस्थि नवनीतं निधाय विलीनेन तेन तयोरपोः पूर्वयोरन्धीभूतं जिघृक्षति तस्य यथा नवनीत-प्रक्षेपणायासो वृथा तं विना ऽपि तद्वैव ग्रहीतुं शक्यत्वात्-तथा प्रकृते ऽपीत्यर्थः । ६६ । ८५ ।

अन्ये त्वरुणाविवाहच्छेदादावेव कृतो न स इति न्या-यः । ६७ । ८६ ।

ऋजुमार्गेण सिध्यतो ऽर्थस्य वक्रेण साधनायोग इति न्यायः । ६८ । ८७ ।

शिरोवेष्टनेन नासिकास्पर्शन्यायश्चापीदृशः । अत्र कुजयेत्यादिः । स्पष्टमन्यत् । अयमेव कैश्चिद् दधिदधा-धाधामन्यायो ऽभिधीयते । ६९ । ८८ ।

यत्र न्यायात्सर्वस्याने प्रवृत्ते वा प्रवर्ते निर्युक्तिक-मेकांशोपादानमंशान्तरत्यागश्च क्रियते तत्रार्धजरतीन्या-यप्रयोगः । जरत्या वृद्धायाः स्त्रियाः पतित्वादर्धं मुखार्धं गृह्णाति अवयवान्तरं त्यजतीति यथा युक्तियुक्तं तथा यद्यतद्वचनस्येतरागमप्रामाण्यमुपगच्छन्ति तेषां पुनरव-शिष्टमपि प्रामाण्यप्रसङ्गः । वेदस्यापि वा ऽप्रामाण्यापत्तिः यदि वेदवचनत्वसाम्ये ऽपि वेदस्य प्रामाण्यमप्रामाण्यं च बुद्धवचनस्याङ्गीक्रियते तदेतदपि युक्तियुक्तम् । ७० । ८९ ।

तदसंभवविषयत्वादर्धकुक्कुटीन्यायः । यथा कुक्कुटी-मांसभोजनकामस्तत्संततिकामश्च कश्चिदेकस्याः कुक्कुट्या अर्धं छित्त्वा मुखं उदरं च संतानार्थं स्थापयति तद् यथा न संभवति तथा प्रकृते ऽपीत्यर्थः । ७१ । ९० ।

एकत्र विरुद्धानेकधर्मसमावेशासंभवविवक्षायां सुभगाभिक्षुकन्यायः। यथा सुभगात्वं भिक्षुकत्वं च पुंस्त्वं च तथाविधपदद्वयसामानाधिकरण्यात्प्रतीयमानमपि विरुद्धत्वादेकस्मिन्युगपन्न संभवति तथैकस्मिन्नीश्वररूपाप्तवचने प्रामाण्यमप्रामाण्यलक्षणं विरुद्धं धर्मद्वयं न संभवतीति केचित्। अन्ये तु यथा सुभगाभिक्षुकौ मधकघातकभयात्तं निष्कासयितुं अपत्नौ स च तरणगतत्यागदोषभयात् सर्वप्रयत्नेनोभयो रक्षणे प्रवृत्तारिकुलस्यघातभयेन त्यागे वा प्राप्ते ऽपि सुभगां रक्षति भिक्षुकं त्यजतीति यथात्र तद्वेदत्वैव निर्णायिका न तु किं चिदिति निगमकमस्ति तथा प्रकृते ऽपीश्वरवचनत्वादुभयोः प्रामाण्ये पौरुषेयत्वान्मूलप्रमाणसापेक्षतया धर्मादौ तदभावादप्रामाण्ये वा प्राप्ते ऽन्तरुरविभागे तार्किकैर्वेव निर्णायिकेत्यर्थमाहुः। ७२। ६१।

एवं स्मृत्यादि दृष्ट्वा ऽऽगमस्मूलकतया प्रामाण्यं न तु कपिलवचनत्वादिना बुद्धप्रणीतनास्तिकग्रन्थानामपि प्रामाण्यापत्तेरित्यादि स्वयमूह्यम्। एकत्र निर्णीतः शास्त्रार्थो ऽन्यत्रापि तथेति न्यायात्। ७३। ६२।

यत्र स्वमतविरुद्धेषु बहुषु मतेष्वेकेन प्रबलयादितसेन मतान्तरं निरस्य तत्स्थयं निरस्यते तैर्दूषितं च स्वमतं सद्युक्तिभिः सम्यक् स्थाप्यते तत्र कण्टकन्यायप्रवृत्तिः। कण्टकाः प्रसिद्धाः तद्द्वयञ्च तत्र प्रथमस्तु पादप्रविष्टं कण्टकं तथा पदेन कण्टकान्तरेण निष्कास्यानेनापि कालान्तरे पीडा मा भवत्विति तमप्यन्यत्रैव प्रक्षिपन्ति प्रथमं पादलग्नेन तदुद्धारायाङ्गुष्ठविद्धेन च कृतं तथाविधं यथा योग्योपायैकपदार्थं नयन्ति। द्वितीयकल्पे च तथा ये शत्रवः स्वदेशोपद्रवं कुर्वन्तस्तदपेक्षया प्रबलसमितान्तरं तत्र-

दानरूपेणोपायेन वशीकृत्य मद्भक्ता सामन्तराजिन्य भेदरूप-पेणोपायेन तमपि पराजयन्तो तैः कृतं स्वप्रजोत्सादना-द्युपद्रवं च स्वस्वस्थाने स्थापनादिना दूरीकुर्वन्ति नीति-निपुणा नृपाः । तथौपनिषदा असत्ख्यात्यात्मख्यात्य-सत्ख्यातिवादानन्यथाख्यातिवादेन निरस्य तमपि नि-राकुर्वन्ति अनिर्वचनीयख्यातौ तैस्तार्किकैश्च दूषणग-णमुद्धरन्तीति न्यायोदाहरणसङ्गतिः । तत्प्रकारस्तु ग्रन्थवि-स्तरभयान्नेह तन्यते । ७४ । ९३ ।

बाध्यं प्रबाध्य स्वयमेव बाधकनिवृत्तौ विवक्षितायां तु जलकतकरेणुन्यायः । यथा हि सपङ्कजले निक्षिप्ताः कतकस्यौषधिविशेषस्य रेणवो रजांसि तज्जलस्थपङ्कं वि-लाप्य स्वयमेव विलीयन्ते तथा तत्त्वज्ञानं सविलासमज्ञानं निवर्त्य स्वयमेव निवर्तते । ७५ । ९४ ।

तृणेन्धनवह्निन्यायो ऽपीह बोध्यः । तृणानीन्धनानि येन सो ऽग्निर्यथा स्वयमेव शाम्यति तथेति पूर्ववत् । ७६ । ९५ ।

तत्त्वज्ञानबाधके ज्ञाने विनष्टे पुनरज्ञानोदयेन बन्ध-प्रसङ्ग इति शङ्कायां देवदत्तहन्तृहतन्यायावतारः । यथा देवदत्तहन्तरि हते ऽपि न देवदत्तस्य जीवनं तथा प्रकृते ऽपि । ७७ । ९६ ।

इदं च तुष्यतु दुर्जन इति न्यायेनोपगम्योक्तं वस्तुत-स्तत्त्वज्ञानस्याज्ञानादित्यादुदयाशङ्कैव नोचिता । ७८ । ९७ ।

ननु यन्निवृत्तिमत्तत्तदुत्पत्तिमदपीति न्यायाद्वि-नाशिनो ऽज्ञानस्योत्पत्तिरपि संभाव्यत इति चेत्तर्हि सर्वं कार्यं सकारणकमिति न्यायाक्रान्तकार्यस्य तत्पूर्वकत्वनिय-मस्यास्य किं निष्कारणं वाच्यम् । तच्च किमज्ञानं प्रत्य वा

आद्ये किञ्चिदेवाज्ञानं किमन्यद्वा आद्ये आत्माश्रयः द्वि-
तीयेऽनवस्थाकृतमुभयतःपाशा रज्जुरिति न्यायापातः । का-
र्यविशेषे शुद्धं ब्रह्म तत्कारणं विशिष्टं वा नाद्यः शुद्धस्यापि
पुनर्बन्धापत्तेः । द्वितीये ऽप्यज्ञानं विशेषणमन्यद्वा आद्ये
ज्ञाने ऽप्यज्ञानकारणत्वापत्तिः विशिष्टवृत्तेर्धर्मस्य विशेष-
णवृत्तित्वनियम इति न्यायात् । अन्यथा व्यापकव्यावृत्त्या
व्याप्यव्यावृत्तिरिति न्यायेन कारणत्वधर्मस्य विशिष्टवृ-
त्तित्वाभावापत्तेः । न द्वितीयः । अन्यस्य सर्वस्याज्ञान-
कार्यत्वेन ततः प्रागसत्त्वात् । व्यभिचारी चायं यन्नि-
वृत्तिमदिति न्यायेऽसौ नियमः प्रागभावइति दिक् ।
७ । ६८ ।

अथ प्रासङ्गिकाः यन्निवृत्तिमदिति न्या० । १ । ९९ ।

उभयतः पाशारज्जुरिति न्या० यथा मृगादिर्बन्धना-
र्थमन्यत्र कृतपाशायां रज्जौ प्रविष्टं मृगादि कुतश्चिदपि
मार्गाद्गन्तुं न शक्नोति तथा प्रकृते ऽपि । २ । १०० ।

विशिष्टवृत्तेरिति न्या० । दृश्यते हि कुण्डली याती-
त्यादौ विशिष्टवृत्तेर्धर्मस्य गत्यादेः कुण्डलादिरूपविशेष-
णवृत्तित्वम् । कुण्डली भुङ्क्तइत्यादौ तु कुण्डलादेरुप-
लक्षणत्वाद्विशेष्यस्यैव भोजनान्वयः । न च पदार्थः पदा-
र्थेनान्वेति न पदार्थैकदेशेनेति न्यायात्तदनुपपत्तिः । तद-
पवादभूतेन व्यक्तिन्यायेन तदुपपत्तेः । स्वीक्रियते हि
जातिविशिष्टव्यक्तौ शब्दशक्तिमुपगच्छद्भिरपि तार्किकैर्गौ-
र्नित्येत्यादौ पदार्थैकदेशस्यापि व्यक्तेरनित्यत्वाद्यन्वयः ।
पुरोडाशकपालेनेत्यादौ मीमांसकैरपि । तथा च परोप-
गतं पदार्थैकदेशान्वयं निराकृत्य स्वयं तदुपगच्छन्तः क-
भूमिनिर्देशोक्तिन्यायविषयतां नातिवर्तन्ते यथा विवा-

नष्टे वत्से भित्तां प्रत्यानयामां स्वस्नुषां पश्यन्पिता मयूः पुनस्तमाहूय समागते तत्क्षणाद्धि भित्ता निर्गच्छेति तथैव प्रत्याचष्टे । तथैते ऽपीत्यर्थः । ३ । १०१ ।

अथाप्यत्रगुप्रत्यक्षं न्यायत्रयं व्याख्यातम् । ४ । १०२ । ५ । १०३ । ६ । १०४ ।

व्यापकेतिस्पष्टः । ७ । १०५ ।

एकूलमत्रसराः । इदं सविलासाज्ञानं ज्ञानेन नाशितं सद्गजभुक्तकपित्थन्यायेन न ज्ञायते कुत्र गतमिति गजभुक्तं हि कपित्थफलं तदुदराद्यन्तरेव निःसरति तच्च कर्णं सन्नबाह्यशून्यं प्रत्यागतमिवाभातीति प्रसिद्धम् । तथा च यथा निश्छिद्रादतिकठिनात्तत्रावृतिस्थानं तत्कर्णादि कथं निःसृतमिति न तर्केणावगमेति तथा तत्त्वबोधबाधितं तत्कुत्र गतमिति न तर्कितुं शक्यमित्यर्थः । ८ । १०६ ।

सति तत्त्वज्ञाने सविलासाज्ञानं बाध्यमिति किं बाध्यं तत्त्वज्ञानात्प्रागप्यवाङ्मनसगम्ये निर्विकल्पे शुद्धाद्वितीये सच्चिदानन्दघने परे ब्रह्मणीदं द्वयं सावयवमशुद्धमसज्जडदुःखात्मकं कथमासीदित्यपि नारिकेलफलाम्बुन्यायेन न तर्कगोचरत्वं याति । यथा ऽतिदृढावयवसंयोगवति नारिकेलफले जलं कथमागतमिति न तर्कगोचरतामेति तथा पूर्वोक्ते ब्रह्मणि तद्विपरीतद्वैतं कथमासीदित्यपि न तर्कितुं पार्यत इति न्यायसंगतिः । ८१ । १० ।

किं चैतदप्यनुक्तमन्यत्रान्तमिति न्यायान्तरमुक्तस्ताद्यर्थं नार्थमेव किं विक्रूयते तैः । वस्तुतस्तु तदत्रोक्तं वस्तु न शब्दगम्यम् । कथं तर्हि तद्बोधः लक्षणयेत्यत्रेति उत्पादितमिदं प्राक् । न्यायस्तु निगदव्याख्यातः । ८२ । १०८ ।

द्वैतबाधकयोर्यद्यपि बाधो निरूपित इति न तेनापि द्वैतशङ्का। ये त्वाचार्या बाधज्ञानस्य बाध्यबाधकभेदेन द्वे रूपे तत्र बाध्यरूपेणाज्ञानादिवत्तदपि बाध्यं रूपान्तरेण च बाधकम् तथा च न कर्मकर्तृभावविरोधो ऽपि। न चाविशिष्टेन बाधकरूपेण द्वैतापत्तिः बाध्यरूपाद्भेदाभावेनास्य तद्बाधे ऽवस्थानायोगादिति मन्यन्ते तेषां स्वगत्याग्न्यायो ऽवतरति यथा हस्ती व्याघ्रो हि स्वयं निवार्य तत्र वर्तमानेन बाध्यरूपेण स्वयमपि निवीयते बाधकरूपमपि च बाध्यरूपाद्भेदाभावेनानवस्थेयः। ८३। १०९।

ननु सविलासाज्ञानबाधकत्वमावर्त्यं वेदोषस्य तथा स्वभावो दुरतिक्रम इति न्यायात्तस्य तत्त्वज्ञानोदयानन्तरं सविलासाज्ञानबाधनाद्देहपातस्तात्कालिकः स्यात्। तथा लौकिकसंप्रदायत्वादुपनिषदामबोधकत्वलक्षणाप्रामाण्यभावप्रसङ्ग इति शङ्कानिरासाय यदा ज्ञानस्य नाशे ऽप्यारब्धकर्मणा प्रतिबन्धाद् देहादिलयः प्रारब्धकर्मणश्च भोगलक्षणकार्यक्षणादेव लय इति समाधीयते तदेषुवेगक्षयन्यायप्रवृत्तिः। धनुषः सकाशान्मुक्तस्येषोर्बाणस्य कर्मणः प्रारब्धवेगक्षयादेव लय इति प्रसिद्धम्। ८४। ११०।

अत्र स्वभाव इति प्रासङ्गिकः। १। १११।

कुलालचक्रन्यायो ऽपीह बोध्यः। चक्रभ्रान्तिहेतौ कुलालव्यापारे निवृत्ते ऽपि हि भ्रान्तिस्तस्य वेगक्षयादेव भवति। ८५। ११२।

ननु कर्मोपादानकारणयोरिषुचक्रयोर्नाशाभावात्पुनः तस्य वेगक्षयपर्यन्तमवस्थानं धनुःकुलालव्यापृत्योस्तन्निमित्तयोर्निमित्तापाये च कार्यापायादर्शनादज्ञानस्य च देहेष्वुपादानत्वात्तदपाये कारणनाशे कार्यनाश इति न्यायेन

देहाद्यवस्थानायोगादिति शङ्कानिरासायोपादाननाशे ऽप्युपादेयं क्षणं तिष्ठतीति समाधानविवक्षायां तन्तुपटन्यायावतारः । स्वीक्रियते हि तार्किकैरपि समवायिकारणतन्त्वादिनाशे ऽपि पटादि क्षणं तिष्ठतीति । ८६ । ११३ ।

अथ प्रासङ्गिकः कारणनाशे कार्यनाश इति न्यायः । अत्र कारणकार्यशब्दावुपादेयोपादानपरौ । १ । ११४ ।

ननु तन्तुनाशे पटस्य क्षणमात्रमवस्थानं भवति तत्त्वमिदं तु लोकसमार्कपर्णादीनां पञ्चकल्पपर्यन्तमवस्थानं स्मर्यते तथा च कथमेतन्न्यायसंगतिरिति शङ्कानिरासायेयत्नस्य कतिपयदिवसैकपद्य निवणानां तन्तूनां पाटववयस्त्वयोग्यः स्वीकृतस्तार्किकैरस्माभिरप्यनादेरसंकेतसैकल्पानधिगतेरज्ञानस्य योग्यत्वादस एव क्षण उचितरूपेतुमिति समाधानवाक्यस्य योग्यो योग्येन संबध्यत इति न्यायः सन्निपततीति । दृश्यते हि लोके ऽयोग्ययोग्यतानामेव बभ्रुपद्मादीनां मिथुनत्वादिसंबन्धः । सांप्रदायिकैश्चोक्तम् । तन्तूनां दिनसंख्यानां त्रैलोक्य क्षण ईरितः । क्षणस्यासंख्यकल्पस्य योग्यः क्षण इहेष्यतामिति । अत्र अक्षपद्मज्ञानपरम् । ८७ । ११५ ।

यावच्छिद्रस्तावती शिरोव्यथेति न्यायो ऽपीह योज्यः । ८८ । ११६ ।

जीवन्मुक्तिदशायां च विद्वान्ब्रह्मात्मानं हस्तामलकन्यायेनार्थैर्द्विधाविपर्यस्तं साक्षात्करोति । करे स्थितमामलकीफलं निर्मलं जलं वा यथा दृश्यते तद्वदर्थः । ८९ । ११७ ।

एतेन करस्थबिल्वन्यायो ऽपि व्याख्यातः । ९० । ११८ ।

देहे च योगाभ्यासात्स्वेनाभिमतमपि सति योगे

ऽहिनिर्ल्वयिनीन्यायेन कश्चि ऽनात्मतया पश्यति । यथा सर्पः स्वत्वचं पुरा ऽऽत्मतयोपगतामपि त्यागानन्तरं स्वसमीपे वर्त्तमानामपि न कदा चिदात्मत्वेन जानाति तथेत्यर्थः । ६१ । ११९ ।

प्रपञ्चं च दग्धरशनान्यायेन निःसारतया वेत्ति । यथा दग्धा रज्जुः पूर्ववद्विगुणत्वादिरूपेण प्रतीयमानापि निःसारा बुध्यते बुधैस्तथेत्यर्थः । ६२ । १२० ।

दग्धपटन्यायो ऽप्येतादृशः । ६३ । १२१ ।

कथं त्वयि नानात्वानुभवे कथमद्वैतबोध इत्याकाङ्क्षायां चित्रपटन्यायावतारः । यथा पटे स्थितानां चित्राणां न पटातिरेकेण सत्ता ऽस्ति तथा न ब्रह्मातिरेकेण द्वैतसत्ता ऽस्ति । तथा च चित्रनानात्वज्ञानेन पटैकत्वानुभवाप्रतिबन्धवत्तत्त्वविदो न प्रपञ्चनानात्वधिया ब्रह्माद्वैतधीप्रतिबन्धः । ६४ । १२२ ।

ये कारणं विना कार्योत्पत्त्यसंभवं मन्यमाना अन्धकपर्दिकान्यायेन संस्काराख्यज्ञानादिशेषं निक्षेपाच्छक्त्यवशेषं येऽपगच्छन्ति तेषां मते तेन पुनः संस्काराशक्तोत्पादकांकुरेणन्यायेन वारणीया । घटोत्पादितदन्तचक्रनिर्माणो नापकारकत्वस्तथा ऽत्रापि ज्ञेयम् । ६५ । १२३ ।

चम्पकेति प्रासङ्गिकः । यथा दूरीकृतेष्वपि पटनिबद्धचम्पकपुष्पेषु पटऽपलभ्यमानो गन्धो निराश्रयगुणावस्थानायोगात्सूक्ष्माश्रयं द्रव्यं कल्पयति तथा ऽत्रापीत्यर्थः । १ । १२४ ।

अपसारिताग्निभूतलन्यायो ऽपीदृशः । २ । १२५ ।

ननु विहिताविधिनिषिद्धादि कर्म कुर्वत्सपदि नित्यं न संस्कलेन युज्येतेति चेन्न । यतो निरहंकारतया कृतत्वात्-

स्वर्गोऽपि चित्राङ्गनान्यायेनाकर्मोत्पाद्येति न तेषान्तरमा-
रब्धुं शक्यते । यथा चित्राङ्गना लोके दृश्यमाना ऽपि न
कुम्भनालिङ्गनादि फलं जनयितुं शक्नोति तथा प्रकृते ऽपी-
त्यर्थः । ८६ । १२६ ।

अथ चित्रापूपन्यायः । ८७ । १२७ ।

चित्राखानन्यायश्च बोध्यः । ८८ । १२८ ।

तत्त्वादावनन्ते यं पक्षास्ति यत्सत्त्वे ऽपि तत्साधेनि
न्यायाचे तुच्छत्वेन द्वैतं मन्यन्ते, तेषां प्रपञ्चस्य सवि-
कल्पमिथ्यात्वाभावो न स्यात् तस्य प्रत्यक्षरूपनित्यबोधम-
हिमा सदैव बाधितत्वात् । अदृष्टवदृढन्यायेनाबाधित-
स्यैव बाधसंभवात् । न हि वन्ध्यादुग्धं दुह्यति । किं न दुग्धं
तथा ऽऽत्मनः स्वतःसिद्धे द्वैतादर्शने नित्यमुक्तस्यासंसा-
रित्वः शास्त्रसाध्यप्रयोजनशून्यतया शास्त्रस्योपरतृप्तिन्या-
येनानर्थक्यप्रसङ्ग इति चेन्न । नित्यमुक्तस्यैवासंसारित्वे
ऽप्यनात्मस्वसंसारनिवर्तकतया शास्त्रसाफल्योपपत्तेः ।
नित्यबोधमहिमा बाधिते ऽपि द्वैते बाध्यजबोधस्य धनं-
जयन्यायेन बाधकत्वोपपत्तेः । यथा ऽऽहुः । नित्यबोधप-
रिपीडितं जगदिदं तुदति वाक्यजा मतिः । वासुदेवनि-
हतं धनंजयो हन्ति कौरवकुलं यथा पुनरिति । ८९ । १२९ ।

अथ प्रासङ्गिकाः । आदावन्ते चेति न्या० । १ । १३० ।

अदृष्टवदृढन्यायो ऽत्र चित्रः २ । १३१ ।

ऊषरवृष्टिन्यायस्तु निगदव्याख्यातः । ३ । १३२ ।

शवोद्वर्तनन्यायः । ४ । १३३ ।

अन्धदर्पणन्यायः । ५ । १३४ ।

अपुत्रकोशार्जनन्यायः । ६ । १३५ ।

अरण्यरोदनन्यायः । ७ । १३६ ।

सूर्यसेवनन्यायश्चापीदृशः । सर्वे ऽप्येते वैयर्थ्यबोधकाः स्पष्टाश्च । ८ । १३७ ।

सक्तुप्रसृतिन्यायमपि के चिदुदाहरन्ति । ९ । १३८ ।

ननु जीवत्वस्याज्ञानत्वात्तथा तन्नाशे बाधात्तद्विशिष्टस्य जीवस्य नाशः स्यात् । तथा चाद्वैतत्वस्यारोहणं जीवस्य ताक्ष्यसर्पन्यायात्स्वनाशाय स्यात् यथारोहणसमये ऽतर्बहुलैस्तादृग्ग्रन्थिभिः सर्पोदरविदारणात्ताक्ष्यारोहणं सर्पस्य स्वनाशायेति प्रसिद्धम् । एवं च मोक्षार्थिनां तत्साधनोपायहेतुश्रवणादिप्रवृत्तिर्न स्यादिति चेन्न रोगिन्यायेन प्रवृत्त्युपपत्तेः । यथा रोगनाशोद्देश्यकाभावे विशिष्टाभाव इति न्यायेन रोगविशिष्टस्य नाशे ऽपि शुद्धस्य तत्स्वरूपस्यानाशाद्रोगिणस्तन्नाशके भेषजादौ प्रवृत्तिस्तथेत्यर्थः । १० । १३९ ।

प्रासङ्गिको ऽत्र ताक्ष्यसर्पन्यायो व्याख्यातः । १ । १४० ।

विशेषणाभाव इति तु स्पष्टः । २ । १४१ ।

नन्वज्ञानकार्यान्तःकरणवृत्त्यात्मकं ज्ञानं कथं स्वकारणीभूताज्ञाननाशाय स्यादुपजीव्यविरोधादिति चेदश्वतरीगर्भन्यायादित्यवेहि । वडवायां गर्दभादुत्पन्ना ऽश्वतरी तस्या गर्भो यथा तन्नाशाय भवति तथा भवतु ज्ञानमपि स्वहेत्वज्ञाननाशायेत्यनवद्यम् । १०१ । १४२ ।

वृश्चिकीगर्भन्यायो ऽपीदृक् । १०२ । १४३ ।

कदलीफलन्यायो ऽपि च । १०३ । १४४ ।

कार्यकारणाभेदपक्षे ऽपि नानुपपत्तिः किमज्ञानस्य दुष्करमिति न्यायात् । १०४ । १४५ ।

अधिकारिवाक्ये शमादिसाधनसंपन्नस्यैवाधिकारः । शान्तो दान्त इत्यादिनाक्षोपदेशो हि व्याजीवीतन्यायेन

तथैव सत्पात्रे प्रतिष्ठां लभते यथा तन्तुवायपाकगत तिष्ठति फलाय च भवति तथेत्यर्थः । १०५ । १४६ ।

शमादिश्चानन्यमेधावी न श्रवणाधिकारी तथापि कृत उपदेशो बधिरकर्णजपन्यायेन पूर्वोक्तान्धदर्पणादिन्यायैश्च व्यर्थतामेति । तदुक्तं वासिष्ठे । यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् । लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यतीति । १०६ । १४७ ।

शिष्यवैराग्यादिपरीक्षा श्रद्धावैव कर्तव्या न हि विवाहानन्तरं वरपरीक्षा क्रियत इति न्यायात् । १०७ । १४८ ।

पश्चात्कृतायास्तु परीक्षायाः कृते कार्ये किं मुहूर्तप्रश्नेनेति न्यायेन व्यर्थता । १०८ । १४९ ।

किं च यः शूर्पन्यायेन सतां गुणानेव गृह्णाति स एव शिष्यत्वेन स्वीकार्यः । शूर्पो हि तुषादि त्यक्त्वा शुद्धान्नमवशेषयतीति प्रसिद्धम् । १०९ । १५० ।

भ्रमरन्यायो ऽप्यत्रोदाहार्यः । सो ऽपि कण्टकादीन्परित्यज्य पुष्पादीनां गन्धगुणमात्रमादत्ते । ११० । १५१ ।

यस्तु चालिनीन्यायेनासारमात्रग्राही स नादर्तव्यः । १११ । १५२ ।

अत्र मक्षिकान्यायः । ११२ । १५३ ।

जलौकान्यायश्च योज्यः । मक्षिका सर्वं देहं परित्यज्य व्रणमेवावलम्बते । जलौका ऽपि क्षीरस्तनार्पणे तत्र क्षीरं त्यक्त्वा रुधिरं पिबतीति प्रसिद्धम् । ११३ । १५४ ।

चिरं परीक्ष्यश्च शिष्यः । यतः केषु चिदन्यथाचारवत्सु शिष्येषु दम्भमात्रेणापि साधनानि । उत्पूतिलन्यायेन क्रमेण वीक्ष्यन्ते । यथा गर्दभस्य बाह्यतुं-

कैवल्याभ्यासे पश्चान्मन्दतां प्राप्नुवन् क्रमेण क्षीयते तद्वे-त्यर्थः । ११४ । १५५ ।

अथ पूर्वाह्णच्छायान्यायः । ११५ । १५६ ।

खलमैत्रीन्यायश्च बोध्यः । ते ह्यादौ वृद्धिं प्राप्य पश्चात्क्रमेण क्षीयन्ते । ११६ । १५७ ।

धीरेषु तु सज्जनेष्वादौ स्वल्पान्यपि साधनानि कुक्कुटशावीन्यायेन क्रमेण वर्द्धन्ते । ११७ । १५८ ।

इह पराह्णच्छायान्यायः । ११८ । १५९ ।

साधुमैत्रीन्यायश्च बोध्यः । ११९ । १६० ।

अवश्यं परीक्ष्यश्च शिष्यः यतो न हि पवित्रं स्याद्गो-क्षीरं श्वदृतौ धृतमिति न्यायेनासत्पात्रे सदुपदेशो ऽप्य-पवित्रतां याति । १२० । १६१ ।

अपि च शिष्यं हि स्तुयन्ते वस्तिवत्तिन्यायेन विद्यो-पायानतिमधुरलघुफलकथनेन संस्तुत्य तेषु श्रद्धातिशयमु-त्पाद्य शिष्यं प्रवर्तयेत् । दृश्यते हि लोके ऽध्येतां गां क्री-णातु भवानिति विधिशेषवत् बहुक्षीरेत्यादिवर्णनादस्य तत्क्र-यणप्रवृत्तिहेतुत्वम् । १२१ । १६२ ।

किंच कृतकृत्यस्य तत्त्वविदो ऽप्यविदुषारातिरि-क्तकर्तव्याभावेऽपि यथा लघुकारः स्यात्तथैव कर्तव्यम् । कुरेन्द्रादिपूज्येभ्यो ऽपि विदुषः पिता वृक्षबन्धनन्यायेनानु-ष्ठातव्यः । लैङ्गिकानां ऽपि देहस्य नित्यत्वाभावात्स्वतो ऽपाकृतस्वतन्त्रत्वं च आगर्भात्रिभजेत् । किं तु प्रस्तुत लक्ष्यानुसारेण स्वयमभ्यस्येत् । १२ । १६३ ।

इह राजा ऽनुपमविवाहमङ्गलमृदङ्गन्यायो ऽपि प्रव-र्तते । विवाहमण्डपे कृष्णो राजा ऽप्यनुगामी भवतीति भावि-कम् । १२३ । १६४ ।

कांस्यभोजिन्यायो ऽप्येतादृशः । तस्यायमर्थः । यथा नित्यं गुरुशिष्यौ भोक्तव्यं कांस्यपात्रे न भोक्तव्यमिति नियमवतो शिष्यस्य नियमभङ्गभयाद् गुरुर्नित्यं कांस्यपात्रे भुङ्क्त इति । यद्यप्ययमस्माकीनस्तथा ऽप्येतद्ग्रन्थकारस्य लौकिकन्यायरत्नाकरोपज्ञन्यायशतीतिकेषु पठितः सुन्दोपसुन्दवधवृत्तकुमारीचरादिनिरूपकशास्त्राणामपि तदानीतनजनप्रसिद्धत्वद्योतनाद् इति ध्येयम् । १६४ । १६५ ।

एवं वैशेष्यात्तु तद्वाद् इति न्यायो ऽपि,सूत्रकारादिरूपलौकिकन्यायरत्नाकरान्तर्गतत्वाल्लौकिकेषु गणनीयः । १६५ । १६६ ।

एवं शिष्येणापि यथाकालं परीक्ष्यैव परब्रह्मसंपन्नो ऽनूचानः श्रोत्रियो ऽद्वैतनिष्ठो गुरुराश्रयणीयः । यदि चापरीक्ष्यैवातिश्रद्धालुतया विप्रलम्भकमेव कं चिदाचार्यत्वेनाश्रयेत मुमुक्षुः । स चास्य मुमुक्षोरहंकारादिकमेतमनात्मानमात्मत्वेनोपदिशेत् । स च शिष्यः श्रद्धालुत्वेनान्धगोलाङ्गूलन्यायेन तदात्मदृष्टिं न परित्यजेत् । तद्व्यतिरिक्तं चात्मानं न प्रतिपद्येत तथा सति पुरुषार्थाद्विहन्येतानर्थं च प्राप्नुयात् । न्यायार्थस्त्वेवम् । कश्चित्किल दुरात्मा महारण्यमार्गे पतितमन्धं स्वबन्धुं पुरे निनीषुमुवाच किमत्र त्वया दुःखितेन स्थीयत इति । स चान्धः कर्णामृतं तद्वचनमाकर्ण्य तथास्तु त्वया नयसे चेत् स्वग्राममेवं धनधान्यादीनं त्वामीशपुरे प्रापयिष्यामीति ब्रवीति स च विप्रलिप्सुर्दुष्टो गोपुच्छमानीय तदीयं लाङ्गूलमन्धं ग्राहयामास उपदिदेश च एष धेनुस्त्वां स्वपुरं नेष्यति मा त्यजैतस्य लाङ्गूलमिति । स चान्धस्तद्वचनमश्रद्धया

तद्वत्यजन्त्यामिषं गुरुमप्राप्यानर्थपरम्परां प्राप्नुवन्तीति । १२६ । १६७ ।

यो भूलिङ्गन्यायेन परोपदेशमात्रकुशलः स्वयं च यथेष्टाचरणशीलः सोऽपि दाम्भिकत्वात्त्यक्तव्यः भूलिङ्गाख्यः पक्षी मा साहसं कुर्विति पुनः पुनर्वदन्सिंहदंष्ट्रान्तरगतं मांसलवं जिघृक्षतीति प्रसिद्धम् । १२७ । १६८ ।

यदि च स प्रतारको न भवति किं तु मूर्खस्तदाऽपि न स आश्रयणीयः । तदाश्रयणेऽपि नाभीष्टसिद्धिः । अपि त्वनर्थप्राप्तिरेव भवति । अन्धस्यैवान्धलग्नस्य विनिपातः पदे पदे इति न्यायात् १२८ । १६९ ।

किमाचार्यमेवं गुरुपरीक्षणेन चिरसहवासादिना प्रत्ययेन मूर्खत्वेन वा ज्ञातश्चेत्त्यक्तव्यः । नैवं प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात्परीक्षया पूर्वमेव त्यागस्योचितत्वात् । १२९ । १७० ।

अत एव श्वः कर्तव्यमद्य कुर्वीतेति न्यायोऽप्यवतरति । १३० । १७१ ।

ननु किमाचार्यपादताडनादिक्लेशेन स्वयमेव मेधाविना वेदान्तविचारेण तत्त्वज्ञानं संपादनीयमिति शङ्कानिरासाय स्वकरकुचन्यायप्रवृत्तिः यथा स्वकरेण स्वकुचयोर्मर्दनं कुर्वती युवती न सुखं लभते तथा जिज्ञासुरपि न स्वतन्त्रविचारेण ज्ञानमाप्नोति । तथा च श्रुतिः । आचार्यवान्पुरुषो वेद प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेत्यादि । १३१ । १७२ ।

ननु स्वतन्त्रविचारेण तत्त्वज्ञानासंभवादुपदेष्टृत्वं च प्रतारकत्वमूर्खत्वसंदेहात्सुलभो ऽनर्थप्राप्तिसंभवेन शङ्किया त्याज्य एव गुर्वधीनो ब्रह्मविचार इति चेन्न यांक्षेपणप्रकारेण सम्यक्परीक्षया साधुत्वासाधुत्वनिर्धा-

रत्नादस्याद्युत्पादनतान्याख्ययोः संबन्धेन भिक्षुभिया स्थाल्यनधिश्रयणन्यायेनापि शुक्लभास्वरभिया प्रमवि-चारस्यानारम्भोपगमात् । १२२ । १७३ ।

इह मृगभिया सस्यानावपनन्यायः । १२३ । १७४ ।

यूकाभिया कन्थात्यागन्यायश्च प्रवर्तते । १२४ । १७५ ।

ननु सुवर्णनीलविचारजन्यज्ञानेन पूर्वोक्तप्रकारेण का-र्यकारणयोरपाभिन्नाधे ऽप्येकदेशविकृतमनन्यवद्भवतिन्यायेन जीवत्वानपायाज्जीवब्रह्मैक्यसिद्धिरिति चेन्न । स्फटिक-लौहित्यन्यायेन तन्निवृत्त्युपपत्त्या प्रमाणसिद्धेः । न तूपा-धिजीवयोः कुण्डबदरादिवदुभयान्यथाभावो ऽस्ति येन किञ्चित्कुण्डादिनाशाद् यथा बदरनिवृत्तिवन्निवृत्तोपाधेरपि जीवस्य जीवत्वानिवृत्तिः स्यात् । किं तु स्फटिके जपाकु-सुमादिसन्निधिकृतलौहित्यस्य यथा तन्निवृत्तौ निवृत्तिः । यथा वा घटाद्यवच्छेदककृतस्याकाशे परिच्छिन्नत्वस्य घटा-द्यभावे ऽभावः । यथा वा जपाद्युपाधिकृतस्य स्वदेहे ऽणो-रुत्वादेस्तदपगमे ऽपगमस्तथा ऽऽत्मन्युपाधिकृतस्य जीव-त्वस्य तन्नाशाद्बाधः । १२५ । १७६ ।

अजैकदेशेति न्यायः प्रसङ्गाद्व्याख्यातः । ११ । १७७ ॥

आकाशापरिच्छिन्नत्वन्यायः । २१ । १७८ ॥

देहाणोरुत्वन्यायश्च प्रकृतन्यायविषये ऽर्थतः पठि-तौ । ६ । १७९ ।

कौन्तेयराधेयन्यायस्यायमत्र संचारः । यथा कर्णः कौन्तेय एव सन्कौन्तेयत्वाज्ञानाद्राधेयमात्मानं मेने पश्चा-त्सूर्योपदेशेन कौन्तेयमात्मानं मन्यते स्म तथा जीव स्वक-ल्पनाज्ञानाज्जीवमात्मानं मन्यते गुरूपदिष्टमहावाक्यजन्यबो-धेनोपलब्धे ब्रह्मैवाहमस्मीति मन्यत इति । १२६ । १८० ।

राजपुत्रव्याधन्यायसिंहदेवन्यायावपीह बोध्यौ ।
राजपुत्रः कश्चित्कदा चित्स्वमातृसपत्न्या क्व चिन्निक्षिप्तो व्याधवर्गग्रामस्तेन पुत्रत्वेन पालितश्च व्याधमेवात्मानं जानीते स्म । पश्चात्कथं चिद्राजपुत्रत्वं निश्चितवता मन्त्रिणाऽनुपदेशाद्राजानमात्मानं मत्वा पैतृसिंहासने प्रतिष्ठां प्राप । सिंहशावको ऽपि कथं चिद् ग्रामीणपशुं प्राप्तो तैः सह चरन्नपि संस्तेषु निर्विभक्तपशुकुलं सस्यचर्वणत्वादम्लकायत्वसम्भूतलाङ्गूलाद्याकृत्यादिकृतं च विशेषं पश्यन्नात्मानमपि तेषु विशेषमेव मेने तृणादिकं च बुभुजे । पश्चादन्यसिंहोपदेशेन मृगराजमात्मानमपश्यदिति गाथे लोकप्रसिद्धे । १६७ । १८१ । १६८ । १८२ । ॥

ननु पूर्वं जीवन्मुक्तिः प्रतिपादिता इदानीमपि बोधेनाबोधभावे प्रवृत्ताविति मन्यत इत्युक्त्या सूचिता न तु सोपपत्तिं युक्ता निष्प्रयोजनत्वात् । प्रयोजनमनुद्दिश्य न मन्दो ऽपि प्रवर्तत इति न्यायेन तदुपगमायोगात् । विदेहमुक्तेरेव सच्चिदानन्दबोधेन सर्वसत्तास्फूर्तिप्रदत्वभावातर्कितब्रह्मादिप्रमानन्दात्मना ऽवस्थानलक्षणायाः परमपुरुषार्थत्वात् । अतः किमर्थं स्थित्वा करं होमीति न्यायात् ब्रह्मानन्दलेशभूतविषयानन्दविद्यानन्दानुभवहेतुभूताया घटप्रदीपन्यायेन स्वोपाधिसत्त्वकार्यमात्मस्फूर्तिहेतुभूताया आवृत्तिकृतिर्व्यर्थैव । ब्रह्मविद्विचारसंप्रदायस्थित्यर्थं तदुपगम इति चेन्न । स्वाज्ञानकल्पितार्थेनापि स्वात्मलाभन्यायेन तद्भ्रान्त्यसंभवादिति चेन्मैवं मुख्याविद्यानिवृत्त्या वस्तुनिवृत्तिकृतार्थश्च प्रयोजनाभावपराहतेन निरस्तसमस्तप्रपञ्चत्वात् । वस्तूनि ज्ञानान्यपेक्षन्ते न प्रयोजनानीति न्यायात् वस्तुस्वभावो दुर्वारो न्याय इति न्यायाच्चेत्यलम् । प्रकृतमनुसरामः न्यायपञ्चकं लिखितं तद्यथा

साक्षात्परम्परया च तत्करणघटप्रदीपन्यायकल्पना अन्येऽपि न्याया लिख्यन्ते । प्रयोजनमनुद्दिश्येति न्या० १ । १८२ ।

पिण्डमिति न्या० । २ । १८३ ।

घटप्रदीपन्या० । यथा घटनिष्ठो दीपो घटस्योदरभाण्डं भासयति तथा ऽत्रापीत्यर्थः । ३ । १८४ ।

चक्षुरादिद्वारा बहिर्निर्गत्यैव जीवोपाधिभूता धीर्बाह्यविषयान्व्याप्नोति तथेयमपि चिदाभासो ऽपि निःसृत इव प्रतीयत इति विवक्षायां बहुच्छिद्रघटप्रदीपन्यायो ऽवतरति । अयं भगवत्पादैः संक्षेपेण भाष्यतात्पर्यप्रकाशके श्रीदक्षिणामूर्तिस्तोत्रे सोदाहरणमुक्तः । नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते । जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तयइति । ४ । १८५ ।

चक्षुरादिद्वारा बहिर्निःसृतस्यान्तःकरणस्य मूषासिक्तताम्रन्यायेन विषयाकारता भवति । तदुक्तं भगवत्पादैः मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा । रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवमिति । ५ । १८६ ।

ननु ताम्रादेस्तेजः संयोगाद् द्रवस्य शीतलकठिनद्रव्याभिघातेन शैत्यापत्तौ मूषाकारतापत्तावप्यन्तःकरणस्य ताम्रादिवद्द्रवत्वाभावात्तया विषयस्पर्शेऽपि कथं तदाकारतापत्तिरिति शंकानिरासाय व्यञ्जकव्यङ्ग्यन्यायो ऽवतरति । यथा व्यञ्जक आतपादिर्व्यङ्ग्यस्य घटादेराकारतामेति तथेत्यर्थः । ६ । १८७ ।

दाहकप्रकाशकयोर्भेदो ऽभेदश्च । दृश्यते हि वितताग्नेर्येव दाहकत्वमल्पदीपिकादेः प्रकाशकता । एते न्याया अ-

स्त्वन्यपि प्रवर्तन्ते । भवति हि तस्यापि तत्तदुपाधिसंब-न्धात्तदाकारतया भानं रूपं रूपं प्रतिरूपो बभूवेत्यादि-श्रुतेः । ७ । १८८ ।

क्रमेण स्वेच्छया बुद्धेर्विविधरूपताङ्गीकरणविवक्षायां वैरूपीन्यायः । वैरूपी नदी सा यथा क्रमेण विविधरूपा-णि धत्ते तथेत्यर्थः । ८ । १८९ ।

एकं विषयमभिभूतया प्रकाशति ततो ऽभीप्सुतरविष-यान्तरलाभे पूर्वं त्यक्त्वा तं यथाऽस्वेनादत्ते एवमग्रे ऽपीति धियः स्वभावः एकस्मिन्विषये बुद्धेः क्रमेण सर्वेन्द्रियवि-षयलम्भने च महाङ्गनान्यायो ऽवतार्यते । रङ्गभूमागतां नटभार्यां यो यो नटः पृच्छति कस्य भार्या ऽसि सुश्रोणी-ति सा तं तं प्रति तवैवेति वदतीति प्रसिद्धम् । ९ । १९० ।

अन्यासाधारणधर्मस्यान्यत्रारोपणविवक्षायां जलौ-ष्ण्यन्यायः । १० । १९१ । वायुशैत्यौष्ण्यन्यायः । ११ । १९२ ।

भूशैत्यौष्ण्यन्यायश्चावतार्यते । जले स्वाभाविकं शैत्यम् । उष्णत्वं तु तेजः संयोगात्तज्जौष्ण्यायोर ऽत्र भुवो वायोश्चानुष्णाशीतस्पर्शः स्वभावः । जलाग्न्यादिसंब-न्धौष्ण्यस्यादिलक्षणारोपः । एवं प्रकृते ऽपि बोध्यम् । १२ । १९३ ।

लोहाग्निन्यायस्तु परस्परधर्मयोर्व्यासतादात्म्याध्यास-योर्विवक्षायां प्रवर्तते । लोहो दहति त्रिकोणो ऽग्निरित्या-द्यनुभवात् । १३ । १९४ ।

भूरिशुकैवर्तन्यायस्तु तादात्म्याध्यासएव ज्ञेयः श्रूयते हि लोके कश्चिद्विशुभाननाकोढ स च नवयु-वनस्थुदावं दृष्ट्वा केन चिन्ते विभिन्नयो न स्यादिति चिन्ह-स्वपादे रज्जुं बद्ध्वा सन्ध्यां प्राप । केनचित्तस्यापहृत्यार्धं तत्पा-

दासीं मोचयित्वा स्वपादे बबन्ध । नापि पादं गतागत-
भरोद्वहनसमये ऽविकृतं स्वपादं रज्जुबद्धं वैवर्ण्येनाहं च तां
दृष्ट्वा ऽस्मत्प्रयत्नवर्धमिति स्वहृदि निश्चित्यारं वैद्यो स्वम-
हर्षं च त्वमिति तेन विवादं कृतवानिति । वह्निर्नामो-
न्मादकर औषधिविशेषः । पेरसेति पाश्चात्त्यभाषया । एव-
मन्ये ऽपीदृशा बहवो न्यायाः सन्ति ग्रन्थविस्तारभयात्ता-
न्यत्र नेह लिख्यन्ते । अत्रापि यत्रैकविषये बहुन्यायप्रद-
र्शनं तत्रैकमेव बोध्यम् । १४ । १९५ ।

अंशिअंश्यासे ऽज्ञानं कारणं तत्त्वज्ञाने वातदीप-
न्यायेन तन्निवृत्तावस्नेहदीपन्यायेन तत्कार्यास्तो ऽपि निव-
र्तते । न च ज्ञानेनैवोभयनिवृत्तिः कुतो न स्यात् । ज्ञान-
स्याज्ञानस्यैव निवर्तकमिति न्यायविरोधात् । द्विविधा हि
निवृत्तिः विरोधिना सामग्रीनिवृत्त्या च यथा वातादिना
दीपनाशः यथा च तैलवर्त्यादिनिवृत्त्या दीपनिवृत्तिः ।
तत्राद्या निवृत्तिरज्ञानस्य द्वितीया कार्यवर्गस्येति बोध्यम् ।
अत्र न्यायत्रयं व्याख्यातम् । १५ । १९७ । १७ । १९८ ।

आपत्तावेव बुद्धौ सत्यां दुःखादयो दृश्यन्ते सुषुप्त्यादौ
तन्निवृत्तौ नोपलभ्यन्त इति तद्धर्मा एव नात्मधर्माः कुसुमा-
द्युपलब्धिप्रसक्ताद्दित्यत्र तदाचये हि इरन्ततेति न्यायो
ऽवतरति । श्वसने हि तैलादुत्पन्नस्पर्शलेशो ऽवयवगतं
संतानोपलब्धिरिति तद्धर्म एव न तैलादिधर्म इति ।
१८ । १९९ ।

अज्ञाननिवृत्तौ चापरोक्षसाक्षात्कारो हेतुः अप-
रोक्षज्ञाने च दग्धपटन्यायेन तदभावो ऽनुपपन्नः । यथा
हि कुजडातिनिवृत्तिनां वनभूमिं दृष्ट्वा शुष्कवृक्षादेरभावो
ऽवतिष्ठते । १९ । २०० ।

स्वादुकपोतकन्यायस्तु तत्र प्रवर्तते यत्र कथंचित्पर-स्परया हेतोरप्युपचारेण साक्षाद्धेतुत्वमुच्यते । यदि खड्गादिघातका नरा नतु तर्हि घातका इति जायका एव घातका इति न्यायार्थः । कुमारीन्यायोदाहरणस्यापि बोध्यम् । २० । २०२ ।

एतदज्ञानानेकत्ववादिनां कल्पनागौरवप्रयुक्ता वाक्षा-ऽस्तत्वभागो ऽपि न कल्प्यो निष्प्रमाणकः । प्रमाणवन्त्य-दृष्टानि कल्प्यानि सुबहून्यपीति न्यायेन वार्यते । २१ । २०३ ।

सदसतोरुत्पत्तिविनाशासंभवेन परस्परविरोधे ऽपि न प्रकारान्तरस्थितिरिति न्यायप्रसिद्धस्य सत्त्वस्यास-त्त्वस्य वा ऽनुपपत्तेर्गेहपादुकान्यायेनाज्ञानकार्यस्य बाधा-नुपपत्त्या चाज्ञानस्यानिर्वचनीयत्वं बलात्स्वीकार्यते । यथा कश्चिद्विद्वत्सभस्य गृहे ऽध्यापयितुमिच्छुकेनागतो निष्पादय कश्चिद्विद्वत्तेन तत्पत्नी ज्ञात्वा गच्छ गच्छेति पुनः पुनरु-च्यमानो ऽपि यदा धैर्येण स्वेच्छया गमनं न स्वीकरोति तदा पादुकासहितं पदं गते निधाय बोधयित्वा च बलान्निःसार्यते तथा प्रकृते ऽपि बोध्यम् । अत्र न्यायस्व-मुदाहरणम् । २३ । २०४ ।

यस्याज्ञानं भ्रमस्तस्य भ्रान्तः सम्यक् च वेद स इति न्यायेन च यस्यानात्मनि देहादावात्मभ्रमो ऽस्ति तस्या-ज्ञानमस्तीति कल्प्यते । २४ । २२५ ।

विचारपादपेन यावद्यावद्विवेकस्तावत् भवति ताव-त्तावद्भ्रमशैथिल्यं जायते तस्माद्भावाभावयोस्तारतम्यं एवं तारतम्यभावापत्तिरिति न्यायात् । २५ । २०६ ।

विचारविषयत्वं च न ज्ञानस्यापि निश्चितं

किं तु संदिग्धस्य संदिग्धं सप्रयोजनं च विचारमर्हतीति न्यायात् । २६ । २०७ ।

ये तु ज्ञानमोक्षहेतुविचारं विहायान्यत्र रतिं कुर्वन्ति ते चिन्तामणिं परित्यज्य काचमणिग्रहणन्यायं नातिवर्तन्ते । २७ । २०८ ।

एतस्माद्विचारादुद्वेगेन न निवर्तेत वेदान्तश्रवणनैर्विघ्न्यहेतुं ज्ञानयोगं प्राप्नोत्येवेति विवक्षायां टिट्टिभन्यायप्रवृत्तिः । अत्र संप्रदायविद आख्यायिकामाचक्षते कस्य चित्किल टिट्टिभस्य पक्षिणो ऽण्डानि तीरस्थान्युदधिस्तरङ्गैरपजहार । स च पक्षी एनं शोषयामीति प्रवृत्तो भार्यादिभिर्बन्धुभिर्वार्यमाणो ऽपि नोपरराम । प्रत्युत तानपि सहकारिणो चक्रे । तांश्च पक्षोत्क्षेपणाभ्यां चञ्च्वा क्षिपतः सर्वानवलोक्य कृपालुर्नारदस्तत्समीपे गरुडं प्रेषयामास तत्पक्षवातेन शुष्यन्समुद्रो भीतस्तदण्डान्यानीय पक्षिणे ददाविति । तथा च यथा दृढाध्यवसायस्य पक्षिणो गरुडसाहाय्यादण्डलाभस्तथा दृढमुमुक्षोर्जिज्ञासोरपि गुरुभक्त्यापि तत्त्वज्ञानस्येश्वरानुग्रहात्सुखेन लाभो भवति । २८ । २०९ ।

यः सारासारविवेकविधुरः सन्नुक्तं तैलसारं वस्तु त्यक्त्वा च सारं वस्तु गृह्णाति तस्य न ततो ऽर्थान्तरे ऽभीष्टप्राप्तिर्भवतीति विवक्षायां पतिंवरान्यायावतारः । यथा स्वयंवरा कन्या ऽन्यांस्त्यक्त्वा सर्वोत्तमत्वेनाभिमतं यमभीष्टतमत्वेनावृणोत् न ततो ऽन्यमभीष्टमतिं कुरुते तथा प्रकृते ऽपीत्यर्थः । २९ । २१० ।

। स्यामे मञ्जुलामन्या० । उपासकस्य स्वाभीष्टदेवतेन मञ्जुला मन्त्रजपादिनेष्टसिद्धिर्भवतीति तान्त्रिकेषु प्रसिद्धम् । तथा मुमुक्षुमञ्जुलत्वाद्विद्याकल्पितेव शुक्ला श्रेयःसिद्धिश्चावश्यं भविष्यतीत्यर्थः । ३० । २११ ।

वस्तूनीति न्या० । १३८ । २१३ ।

बहूनामनुग्रहो न्याय्य इति न्या० । अत्र न्यायशब्दे इदं न्याय्यं प्राधान्येन विवक्षितम् । अनुग्रहः साहाय्यं न्याय्यः न्यायादनपेतो ऽर्थात्सयुक्तः कार्यसाधक इति यावत् । यथा ऽऽहुः । बहूनामप्यसाराणां मेलनं कार्यसाधकम् । तृणैः संपाद्यते रज्जुस्तया नागो ऽपि बध्यत इति १३९ । २१४ ।

के चिदेतन्न्यायान्तरत्वेनोदाहरन्ति । असाराणामपि बहूनामित्यन्वयः । १४० । २५ ।

पूर्वोक्तस्य तत्त्वज्ञानस्य जीवन्मुक्तिसुखातिशयावि-र्भावकार्ये वैराग्यादि सहकारि भवति । ज्ञानं च विषय-मिथ्यात्वबोधनेन वैराग्यादिपोषकं भवतीति तयोरन्यो-न्यसाहाय्यं वनान्धन्यायात्पङ्ग्वन्धन्यायाच्च बोध्यम् । यथा वनान्धयोः पङ्गुकयोश्च परस्परवियुक्तयोः नगर-प्राप्त्यां प्रवर्तनविफलता भवति युक्तयोस्तु परस्परसाहा-य्यमात्रतोऽर्थवत्ता भवति तथा प्रकृते ऽपि बोध्यम् । किं च यतो वेत्याद्यागमस्य क्षित्यङ्कुरादिकं सकर्तृकं कार्य-त्वादित्याद्यनुमानस्य चेतरेतरसाहाय्यमन्योन्यानुग्राह्यो-दाहरणम् । तथा हि । सत्यप्यागमश्रवणे जगतः कर्ता कश्चिदस्ति न वेति संदिहानं प्रति यत्र यत्र घटादिषु कार्यत्वमस्ति तत्र सर्वत्र सकर्तृकत्वं दृष्टमिति कार्यत्वं क्षित्यादौ गृहीतसहचारत्वेन कर्तुरस्तित्वकोटिमुत्कटतामापाद-यति । तावन्मात्रेण संभावितमतिर्बोध्यः श्रुत्या सुखेन बोधयितुं शक्यः । एवं न केवलानुमानेनापि परात्मा यथावदवगन्तुं शक्यः । अनेन हि जगदुपयोगिकृत्यादिमान् केवलमसौ कृत्यादिमं नित्यं सर्वविषयं च अवि-सिद्धे-

यद्वा खलु संसारिवैलक्षण्यं तत्र सिध्येत तु तदपि कार्यत्वहेतोस्तत्र सामर्थ्याभावात् । स हि सर्वोत्कर्षे-त्वे तदेकत्वे कुलालादिविलक्षणत्वादौ चोदासीन एव । किं च यथा किंचित्कार्यमात्रसंपादनकं किं चिज्जेति किं चित्कार्य सोपादानकं किं चिज्जेति तथा किं चित्कर्तृकं किं चिज्जे-त्यस्तु । एवं च लोके कुलालत्वेन घटादिव्यवहारो ऽङ्कुरत्वे-नाङ्कुरादिव्यवहारश्चोपपद्यते । तस्मात् केवलानुमानेनेश-सिद्धिः । अनुमानापेक्षा च श्रुतेरुक्तभावनादिपुरुषापराध-निमुक्तये न तु प्रमित्युत्पत्तौ तत्फले वा वेदान्तानां स्वतः-प्रामाण्यात् । तदुक्तं सर्वज्ञमुनिभिः । स्वाध्यायवत्र घटते करणं विचारो माध्यस्थ्य परमात्मविदः प्रसूतौ । सापेक्षता ऽऽपतति वेदगिरस्तथात्वे ब्रह्मात्मनः प्रमिति-जन्मनि तत्र युक्तमिति । १४ । २१५ १४२ । २१७ ।

रथवडवान्यायो ऽपीह प्रवर्तते । रथे नियुक्ते वडवे रथवडवे तद्विषयो न्यायः । ते यथा विविक्तयैव रथं वाह-यतः वियुक्ते तु न शक्नुतो वोढुं परस्परस्नेहातिशयात्कुत-स्तद्वदेवं तथा श्रुतियुक्ती ब्रह्मात्मसाक्षात्कारं बोधं तत्त्वादिरूपं च जीवन्मुक्तिरूपं मिलित्वैव निर्वाहयतः वियुक्ताश्च तदर्थमितरेतरमाकाङ्क्षन्तीति, पूर्वोक्तं सर्व-मनुसंधेयम् । १४३ । २१८ ।

ननु निर्दोषप्रमाणजन्य तत्त्वसाक्षात्कारस्य पुरुषापरा-धजन्याज्ञानकार्यनिवर्तनाक्षमत्वं येन तन्निरासायानु-मानाद्यपेक्षा भवेदिति चेद्वैरवन्यायेन चेत्य-वेहि । इत्थं हि लौकिकी गाथा । कस्युगीन कस्य विप्रस्या-र्थिनस्तद्वाज्ञया पूर्वदेशं तज्जन्यवस्तुपत्रार्थं गतः । तान्त-त्वा ऽपि तदीयगृहोद्वाराग्यापकार्यं भम चिरं विलम्बिने तस्मिंस्तज्जनकः स्वीयां दस्युकर्तृकं तस्य वधं निश्चि-

तन्नगरे घोषयित्वा राज्ञे ऽपि तदभिज्ञानं निवेदितवन्तः आगतांस्तत्सभाचारणज्ञांश्च मध्ये विक्षेपयामासुः स च कियत्कालानन्तरं स्वस्यानुयायिनः कांश्चित्तत्र स्थापयित्वा नृपदर्शनायागतो मार्गे स्वारिभिः सकलत्पुरे घोषयित्वा राज्ञे निवेदितं स्वचरवृत्तान्तं श्रुत्वा दैवविपर्ययाद्विपरीतबुद्धिः सेना बहिः स्थापयित्वैकाकी राजसदनं प्रविश्य नृपं दिदृक्षुः क विद्रुतारामङ्कुशे तस्थौ राजा च प्रासादैर्हिर्निःसृतस्तं साक्षाद्दृष्ट्वा ऽपि पूर्वोक्तमभिज्ञापककारणजविपरीतभावनावशात्पिशाचतां गतो ऽयमिति मेने इति ॥ १४५ । २१९ ।

एवं भैरवनामा कश्चिद्विप्रश्चकं सेव्यं नृपः सेव्यो न सेव्यः केवलो नृप इति न्यायमुद्दिश्य क्षितिपतिकुलसत्काराभिलाषजनितोत्सेकोऽहङ्कारकलङ्ककलुषितमनस्कैर्नृपानुगैर्विरोध । अतस्तैस्तस्य राजसभाप्रवेशं निरुध्य तन्मरणं च राज्ञे निवेद्य कतिपयदिनानन्तरं तत्पिशाचभावो ऽपि निवेदितः । स च कदा चिद्राज्ञि मृगयाविहारिणि सति तत्समागमेच्छया निरोधकभिया वा ऽश्वत्थमारूढः तस्थौ राजा चाश्वत्थारूढमूर्ध्वबाहुं भैरवो ऽहं नृपशार्दूल मां द्रष्टुमर्हसीत्याक्रोशन्तं तं पिशाचवदपश्यत् ततो विमुखो बभूवेत्यपि लौकिकी गाथा । तथा च यथा ऽत्रोभयत्रापि करणापाटवमन्दान्धकारादिदोषाभावे ऽपि पुरुषापराधादेव नृपनिष्ठसाक्षात्कारस्याबाधितत्वं नानुभूतं तथा प्रकृते ऽपि बोध्यम् । १४ । २२० ।

चक्रमिति प्रासङ्गिकः । अस्योदाहृतत्वं तु तच्चक्रभ्रमणेन केवलं अयमेव न सेव्यं किं तु तदनुभूताः सन्नाद्यो जनाद्यश्च सेव्याः । एवं स्वर्णादिकालेन न केवलं

प्रधानकमैव ज्ञेयं किं तु तन्तुजालमपीत्यादि योज्यम् । १ । २२१ ।

यथादेशत्वज्ञानस्य चान्योन्यसापेक्षत्वे किमपि न सिद्ध्येदित्यत्र ज्ञापकं पन्थिपूजान्यायः । यथा कपिलमतोक्त-रूपद्वारभेदादग्निधूमयोरितरेतरापेक्षत्वं न विरुध्यते तथा स्वरूपज्ञानभेदादेकरूपद्वारभेदाद्वात्रापि विरोधः । १।२२२।

यत्त्वेतावता ग्रन्थेन मननादिना पुरुषापराधापगमे प्रतिबन्धरहितेन तत्त्वसाक्षात्कारेण ज्ञानं बाध्यते इत्युक्तं भवति बाध्यबाधकभावश्च विरोधपूर्वक एव अतो ज्ञाना-ज्ञानयोर्विरोधः क इति विवक्षणीयं येन बाध्यबाधकता स्यात् । स किं गोमहिषादिन्यायेन नैमित्तिकः । यथा गवादेर्महिषादेश्च केन चिन्निमित्तेनान्योन्यं वैरी भवति येन चिर विरोधः । किं वा ऽहिनकुलन्यायेन स्वाभाविक इति चेच्छृणु । चैतन्यत्वेन ज्ञानमिति पक्षे रविमहत्वादिन्या-येनावगन्तव्यः । यथा ऽऽदित्यरश्मयः स्वभावतस्तमआदेर्बा-धका अपि सूर्यकान्तमणिना त्वाश्रितादाहका भवन्ति । तथा ऽज्ञानप्रकाशकमपि चैतन्यमन्तःकरणवृत्त्यारूढं तद्बाधकं भवतीति बोध्यम् । अखण्डाकारान्तःकरणवृत्तिर्ज्ञान-मिति पक्षे तु तमःप्रकाशन्यायेनोपमर्द्योपमर्दकभावत्व-मेव इति । १४६ । २२३ ।

तमःप्रकाशन्यायो ऽपि सुगमो बोध्यः । १४७ । २२४ ।

गोमहिषादिन्यायो ऽत्र प्रसङ्गाद्व्याख्यातः । १ । २२५ ।

अहिनकुलन्यायस्तु स्पष्टः । १ । २२६ ।

सिंहशृगालन्यायो ऽप्येवम् । १ । २२७ ।

प्रत्यक्षादिविरोधेनानुमानस्य बाधितत्वे गोमयपायसन्यायप्रवृत्तिः । यथा गोमयं पायसं गोविकारत्वात्संमतवदित्यस्य प्रत्यक्षबाधितत्वं न पक्षमात्रापनैकान्तिकत्वेन चाप्रामाण्यं तथा ऽन्येष्वप्येतादृशेषु बोध्यम् । १४८ । २२८ ।

प्रत्यक्षविरोधेन तदितरसंबंधाग्राह्यत्वे विवक्षिते उपजीव्योपजीवकयोरुपजीव्यप्राबल्यमिति न्यायः अयमन्यत्रापि तन्तुपटयोरुपजीव्योपजीवकभावे प्रवर्तते । १४९ । २२९ ।

उपदेशानुपदेशत्वे विपरीतं बलाबलमिति न्यायो ऽस्य बाधकः । दृश्यते हि चन्द्रादावतिविपुलप्रमाणोपदेशेन प्रादेशमात्रग्राहिणः प्रत्यक्षस्य बाधः । दृश्यते च ज्योतिः शब्दैकविषयवायुरूपोपदेशसहकृतेन नीलाद्यभावानुमानादिनोपजीव्यस्यापि नीलादिरूपप्रतियोगिप्रत्यक्षस्य बाधः । १५० । २३० ।

दामव्यालकटन्यायो न तत्र व्याख्याता च न । नीलभासहन्यायानन्त्वं यास्यति विवेकतामित्यादिना बालिशइदं न्यायद्वयं समुपन्यस्तम् । तत्रापत्योऽवतरं दयालापचलाप्यनुग्रस्यातिनीचदशाप्राप्तिरवश्यं कालेन भवतीति तत्परिहारे ऽवश्यं संपाद्य इति विवक्षायां प्रवृत्तिः । दामव्यालकटाख्यायो ऽसुरः शङ्करेण स्वमायया निर्मितास्ते च नक्रमकरादिना मेर्वादिचूर्णीकरणे शक्ता अप्यज्ञानप्रभावात्कालेन भस्मकादिपीनिं प्रापुरिति प्रसिद्धं तत्र । १५१ । २३१ ।

तत्त्वविद कदा ऽपि स्वपदात्पततीति विपर्ययो द्वितीयस्यावतारः । ते ऽप्यसुरास्तेनैव तथा निर्मिताश्च जीवन्मुक्तिसुखमनुभूय निर्वाणपदं प्रापुः इति संक्षेपः ।

प्रपञ्चस्तु तत्रैव प्रवृक्तः । सुन्दोपसुन्दादामावाख्यानवद्-न्यायान्तरव्याख्यानानि प्रायो न्यायतत्त्वोदाहृतौ लक्ष्यन्ते । एवं सर्वे लौकिका दृष्टान्ता लौकिक्यो गाथाश्च सर्वा न्यायत्वेनोदाहर्तुं शक्यन्तेऽत्यलमतिप्रपञ्चेन । १५२ । २३२ ।

व्याख्यातं न्यायवृन्दं निजमतिबलमतिक्रम्य यावन्मयाऽशे-
षाणां प्राप्तुं तु शक्तो न हि भवति गुरुः का पुनर्मादृशो ना ॥
सर्वः सर्वं न वेत्ति ग्रथितमिदमतो नास्ति मे ऽत्रापराध-
स्तिष्ठा ज्ञेयः स्वयं वै सुविमलमतिभिः सज्जनाराधितार्थैः ॥ १ ॥

अत्र प्रथमपादे यावत्तैलं तावद्व्याख्यानमिति न्यायविषयत्वं बोध्यम् । १५३ । २३३ ।

यावत् स्नाता तावत्सुपरमिति न्यायो ऽपीह बोध्यः । १५४ । २३४ ।

द्वितीये ऽनवक्लृप्तार्थे प्रवृत्तिर्विनिवर्तिषीयाभिमतन्यायेनाथवेति ध्वनितम् । १५५ । २३५ ।

यद्यभिकार्थाभावे ऽन्यार्थे प्रवृत्तिर्न दोषायेति विवक्षा तदभावे गत्वा कामिन्या दृष्टा तिर्यक्षु कामितेति न्यायः मत्ताकामिनी स्त्रीविशेषः । १५६ । २३६ ।

तृतीये न हि सर्वः सर्वं जानातीति न्यायो ऽत्र पठितः । १५७ । २३७ ।

न हि सर्वं सर्वेनीयमभिवरिति न्यायः । १५८ । २३८ ।

सर्वत्र साध्यानिवृत्तिर्निपतनाद्यायेति न्यायश्चात्र ध्वनितः १५९ । २३९ ।

पूर्वार्द्धन्यायाः १९१, २. । मिलिताः । ४० ।

वेदाग्न्यङ्गाय २०४ संख्याकलौकिकन्यायसंग्रहः ।
शिवयोः प्रीतये ऽयं स्यात्पितृभोगीशयोः गीरिव । २ ॥
मङ्गलश्रीनिवृत्तिस्सा श्रीधियस्स सत्सेव्यतां चैत्य मे

येतो याति सुखं सुखं मम मनो नित्यं यदीयाङ्घ्रिः स्मृताम्।
गुर्व्यादेर्घनैश्च दत्तमिलनं याता सतां सेव्यतां
साफल्यं भविता ततो मम कुलैः स्वात्मीकृतंप्रापयात्।३।
यो ब्रह्मा यश्च विष्णुर्यदुतनुरपि यो यश्च गौर्यादिशर्वी-
धेशात्मा सर्वजन्तोः श्रुतिशिखरगिरां यश्च तात्पर्यभूमिः।
यस्याबोधात्संसृत्यो व्रजति च विलयं यस्य बोधात्प्रपञ्च-
स्तं शुद्धं संप्रपद्ये शिवमजरमजं शंभुमीशानमीशम्।४॥

इति श्रीसाधुवृन्दवन्दितपादारविन्दवैराग्यादिर-
त्नाकरविद्वद्वरश्रीमद्रामदयालुशिष्येण सोमवंशीयचिन्द्रा-
वकुलोत्तंसभगवत्परायणश्रीसेवादेव्याश्रितपादारविन्द-
श्रीगुरुचरणपर्णोत्कण्ठेनोदासीनाभख्येन रघुनाथवर्मणा
विरचितो लौकिकन्यायसंग्रहः समाप्तः॥

दिगम्बरः । इति जलतुम्बिकान्या० ॥ ८ ॥

तदेकदेशिनस्तु पञ्जरशुकपरिन्यायेन सदोर्ध्वगमनमेव तस्य मोक्षं मन्यन्ते ॥ ९ ॥

विशेषगुणं यावन्नैव पुरुषार्थं मन्यमाना वाशेरनुपहसनीया इत्यलम् उन्मत्तप्रलपित काव्यदूषणोद्भावनेनेति न्यायेन नेह निरस्यते ॥ १० ॥

जीवः स्वर्गविद्यादिभिर्देहान्तरं निष्पाद्यैव पूर्वं त्यजतीति विवक्षायां तृणजलौकान्यायः सापि हि तृणान्तरमाश्रित्यैव पूर्वं त्यजति ॥ ११ ॥

एकसम्बन्धिदर्शनमपरसम्बन्धिस्मारकमिति न्यायेन मज्जोन्मज्जनन्यायादनन्तरा न्यायाः स्फुटोदाहृताः । हस्तिपकदर्शनस्य हस्तिस्मारकत्ववत्पुत्रादिज्ञानस्य तत्सम्बन्धिकृष्णादिस्मारकत्वम् इतरन्यायद्वये ऽपि पञ्जरशुकस्येव तथैवोदाहरणं द्वितीयस्य स्वाङ्गोपलब्ध्योदाहृतिः ॥ १२ ॥

स्थूणानिखननन्यायः । स्थूणा यथा ऽसकृत्खननस्य निखनने क्रियमाणे दृढा भवति तथोत्तरग्रन्थेन प्राक्प्रतिपादितार्थदार्ढ्यं भवतीत्यर्थः ॥ १३ ॥

सिंहावलोकनन्यायः । सिंहो यथा कञ्चिन्मृगं हत्वा ऽग्रे गच्छन्नपि पृष्ठस्थमपि हन्यामिति धिया पश्चात्पश्यति हन्ति च दृष्टिपथमागतं तथा बुद्धिपथमागतस्वपक्षपरिपन्थिपरपरिकल्पितयुक्त्याभासान्तरनिरासायाप्युत्तरग्रन्थप्रवृत्तिः इत्यर्थः ॥ १४ ॥

पारिषद्न्यायः । यथा पारिषदानामेकस्मिन्गते ऽप्यवशिष्टैस्तत्कार्यं निर्वाह्यत इत्यर्थः ॥ १५ ॥

नान्यदृष्टमिति ॥ १६ ॥

घट्टकुट्याकुट्टेति च स्पष्टौ ॥ १७ ॥

बहुराजकपुरन्यायो ऽप्येतादृशः ॥ १८ ॥

गोबलीवर्दन्या० । गोऽक्षिरन्योन्यवाचकौ परस्पराय गोऽक्षिर्यद्गोऽक्षिस्तथा यथा परमपूर्वमपूर्वादिकमन्ये सति वि-कल्पमेकं कार्यं निष्पाद्यते तथेत्यर्थः ॥ १९ ॥

- स्थाणुनिखननन्यायः ॥ २० ॥

कुशादिति न्यायः । कुशाद्यवलम्बनाद्दीर्घकाव्यं गर्भ-स्थं स्फुटं यथा अहिरावरकतया स्थितानां कुशकाशादीना-नां विघटनेन चक्षुरिन्द्रिये तथेत्यर्थः ।

गड्डलिकाप्रवाहन्यायः ॥ २१ ॥

गड्डलिकानामवीनां यथा एका चेत्कूपे पतिता तदा तत्पश्चाद्गता अपि सर्वाः तत्र पतन्तीति प्रसिद्धम् ॥ २२ ॥

एतत्सम एवान्धपरम्परान्यायः सोऽप्यूर्ध्वोक्तस्थल-वत्स्थलगतोदाह्रियते ॥ २३ ॥

अन्धचटकन्याये यदि वक्तृपरम्परोपदेशस्य मूलभूतो ऽनुभवो नास्ति तदा सोऽन्धेतरवत्ः अत्र तु विशेष इति बोध्यम् ॥ २४ ॥

मशकग्रामन्यायः । यथा ऽन्येषु सत्स्वपि मशकानां बहु-त्वान्मशकग्राम इत्युच्यते तथेत्यर्थः ॥ २५ ॥

एतेन ब्राह्मणग्रामाम्रवनादयो ऽपि न्याया वि-वृताः ॥ २६ ॥ २७ ॥

न हि निपुण इति स्पष्टार्थः ॥ २८ ॥

देवदत्तपुत्रन्यायः । न हि देवदत्तस्यैव पुत्रो भवति किन्तु देवदत्तस्यापि मत्याऽपि मातुः प्राधान्यविव-क्षया देवदत्तपुत्र इत्युच्यते ॥ २९ ॥

पितुः प्राधान्यविवक्षयामात्तु देवदत्तपुत्रन्यायेनैतदु-दाह्रियते ॥ ३० ॥

अत्रैव